पञ्चोपनिषदः

(ईशावास्य-केन-कठ-मुण्डक–माण्डूक्योपनिषदः)

बनखण्डिश्रीपीताम्बरापीठस्थस्वामिकृता

प्रकाशभाष्यसहिताः

प्रकाशक :

श्री पीताम्बरापीठ संस्कृत परिषद, दतिया (म० प्र०)

पञ्चोपनिषदः

(ईशावास्य-केन-कठ-मुण्डक–माण्डूक्योपनिषदः)

वनखण्डिश्रीपीताम्बरापीठस्थस्वामिकृता

प्रकाशभाष्यसहिताः

प्रकाशक :
श्री पीताम्बरापीठ दतिया (म० प्र०)

मूल्य– १०-००

प्रकाशक :

श्री सूर्यदेवजी शर्मा

श्री पीताम्बरापीठ दतिया (म० प्र०)

प्रथम संस्करण– २०१६

द्वितीय संस्करण– २०४२

मुद्रक :

रा. का. बेडेकर

व्यवस्थापक

शिवशक्ति प्रेस, प्रा. लि.

ग्रेट नाग रोड, नागपुर-९

ब्रह्मलीन
श्री पीताम्बरा पीठाधीश्वर राष्ट्रगुरु परमपूज्य अनन्तश्री श्री स्वामी जी महाराज, वनखण्डेश्वर, दतिया (म० प्र०)

समर्पणम्

सच्चिद्घनस्वरूपा या, निग्रहानुग्रहे क्षमा ।
सैषा कृतिर्मया तस्याः, पादयोःश्रद्धयार्पिता ।।१।।
वेदाब्धिः क्वाति गम्भीरः, क्व मेऽत्यल्पा मतिस्तरिः ।
कर्णधारं गुरुं कृत्वा, पारं प्राप्तं यथासुखम् ।।२।।

—व्याख्याकृताम्

प्राक्कथनम्

उपनिषदो हि नाम भारतीयानां महर्षीणामतिनिर्मले तपः पूते हृदि स्वतः प्रतिभाताः। एता हि तेषां चरमसाधनापरिणतेराध्यात्मिक्या अनुभूतेर्मूर्तिमन्तो ग्रन्थाः। सर्वजनप्रसिद्धानां वेदानामपि शीर्षण्यानामासां महत्वमनादिकालादद्यावधि भगवत्याः सुरसर्याः स्रोत इव निरवच्छिन्नं वरीर्वात। सर्वैरपि महात्मभिरासामाश्रयादेव परमा शान्तिरलभ्यत। अतोऽध्यात्म मार्गरुरुक्षूणामपि चैतद् ग्रन्थानां स्वाध्यायोऽतीवावश्यकोऽस्ति। अध्यात्मपथिकैः सर्वैरपि महात्मभिरतिदीर्घे पथिगच्छद्भिर्दिग्दर्शनाय प्रदीपस्तम्भवादासामाश्रयो गृहीतः। भारते प्रचारितानां सर्वासां साधनानां मूलमुपनिषद्ग्रन्थेषूपलभ्यते। वेदानां शीर्षण्यतयैतेग्रन्था वेदान्तशब्देनाभिधीयन्ते। वेदान्तानां चरमं तात्पर्यमुपनिषत्प्रोक्तेऽद्वैततत्त्वे पर्यवसीयते। अतएव वेदान्तो नाम उपनिषत्प्रमाणमित्युक्तं 'वेदान्तसारे। यत्तु वेदेभ्यः (ऋग्यजुःसामाथर्वेतिमूलसंहिताग्रन्थेभ्यः) अवरं स्थानमुपनिषदामिति केचिदास्थिषत, तदनार्षं युक्तिवहिष्कृतमपूर्णञ्चेत्यग्राह्यम्।

इदं वैदिकं विज्ञानं निगमशब्देनाभिधीयते। अस्त्येतत्सहोदरमेकमन्यद्विज्ञानमागमशब्दाभिधेयम्। तदपि तत्त्वदृशां महर्षीणां दिव्यानुभूतिप्रसूतम्। अतो वैदिको धर्मोऽनादिप्रवाहादेव निगमागमशब्देन व्याह्रियते। "आगमः पञ्चमो वेद" इति आगमिका मन्यन्ते।

आगतः शिववक्त्रेभ्यो गतश्च गिरिजामुखे।
मतश्च वासुदेवस्य तस्मादागम उच्यते॥

——इत्यागमिकानां डिण्डिमः।

अस्मिन् श्लोके शिववक्त्रेभ्य इति बहुवचनान्तपदेन षडाम्नायख्यातानां सर्वेषां मन्त्रतद्देवतादिस्वरूपाणामवरोधः कृतो भवति। षडाम्नायिकामन्त्राश्च पाञ्चब्राह्ममन्त्राणामेव विकास इति मन्त्रविदो विदन्ति। वैदिकमन्त्राणामिव आगमीयमन्त्राणामपि ऋषिच्छन्दोदेवतादयो भवन्ति। वशिष्ठविश्वामित्रनारदादयो बह्वो ऋषयस्तु उभयत्र समाना दृश्यन्ते। वीजशक्तिकीलकमिति त्रयमागमीयमन्त्रेष्वधिकम्। वैदिकेष्वपि क्वचित् फट्, वषट्, स्वाहेत्यादिवीजानि प्रयुज्यमानानि दृश्यन्ते। बीजादिज्ञानं तु अलौकिकानुभूतेरधीनम्। वैदिकमन्त्राश्चानेके तान्त्रिकपद्धत्या विनियुक्ता भवन्ति। महर्षेस्तत्रभवतो गौरीवीति

शाक्तस्य षाट्त्रिंशादिकं सर्वविदितं सत्रं तान्त्रिकं सदपि ताण्ड्यब्राह्मणेनाङ्गीकृतम्। एतद्विषयालोचनेन वैदिकधर्मस्यागमसोदरत्वमतिस्पष्टं भवति। एतयोर्मिश्रितयोरुभयोरपि वर्णनं पुराणोपपुराणेषूपलभ्यते।

वैदिकस्तान्त्रिको मिश्र इति मे त्रिविधो मखः।"

—भा० स्कं० ११

इत्याद्युक्तीनामयमेवाभिप्रायः।

वैदिको हि धर्मो यथा कर्म, ज्ञानञ्चेति काण्डद्वयेनोपवर्णितस्तथैवागमधर्मोऽपि द्विधा विभक्तो विलोक्यते पूर्वोक्तकाण्डाभ्याम्। वैदिकं कर्म, मीमांसा-कल्प-सूत्र-ग्रन्थाधारेण विविच्यते। उदात्तानुदात्तादिस्वरसंविधानोच्चारणदुःशकतया वैदिकं कर्म विलुप्तप्रायम्। तान्त्रिकं तु तत्क्लेशविनिर्मुक्तत्वात् कृतिसाध्यतासौकर्याद् बहुजनोपयोग्यसिध्यत। अत एव तस्य प्रचारो लोकप्रियता चाद्याप्यक्षुण्णा वरीवर्ति। ब्रह्म-दर्शनं तूभयत्र समानम्। एतच्च काश्मीरिकैर्दाक्षिणात्यैश्चाचार्यैर्विद्वद्भिश्च दार्शनिकपद्धत्या मीमांसितम्। वैदिकस्तान्त्रिकश्चेति द्विविध आगमो भवतीत्युक्तं शिवार्कमणिदीपिकायाम् अप्पय्यदीक्षितेन। तान्त्रिकेषु सप्ताचारेष्वेकस्याचारस्य वैदिकत्वं सर्वैरपि तान्त्रिकैराचार्यैरङ्गीकृतम्।

शिवावतारेण भगवता श्रीशङ्कराचार्येणोपनिषद्वेदान्तेष्वपूर्वं स्वीयं विवरणमलिख्यत जगत्प्रसिद्धम्; किन्तु तान्त्रिकज्ञानाद्वैतनिरूपणे तेन प्रमाणवादे सर्वत्र श्रुतीः समुदाहरता सर्वथा मौनमवलम्बितम्, तथापि तत्प्रणीतस्तान्त्रिकैर्ग्रन्थैः—तन्त्रसिद्धान्तस्तस्य सम्मत— इति सुस्पष्टं प्रतीयते, तन्मतस्यागमग्रन्थेभ्यः क्वचिदप्यविरोधात्। एतद्दृष्ट्वैव षोडश-सप्तदशेभ्यो वर्षेभ्यः पूर्वमुपनिषत्प्रकाश-भाष्यनाम्ना ईश-केन-कठ-माण्डूक्योपनिषदां विवरणमक्रियत। ईशोपनिषदि एकं योगपक्षीयं विवरणं पृथगपि कृतमिति पञ्चस्वुपनिषत्सु षडेव विवरणानि सन्ति। ईशावास्योपनिषद्धि काण्वमाध्यन्दिनशाखाभेदेन द्विविधोपलभ्यते। अद्यावधि समुपलभ्यमानेषूपनिषद्भाष्येषु ईदृक् प्रयासस्याकृतप्रायत्वात् कृतस्यापि चैकदेशीयत्वात् पक्षपातदृशोपरक्तत्वाच्च अभिनवस्यैतस्य प्रयासस्य सफलासफलत्व-निर्णये तु तद्विदो विद्वांस एव प्रमाणम्।

मया तु महामहिम्नः पराशक्तेः प्रेरणाया यथाशक्ति पालनं कृतम्। अन्यासूपनिषत्सु विवरीषायां सत्यामपि समुचितसामग्रीसौलभ्याभावात् कर्तव्यं पूरयितुं नाशक्यता यैर्महानुभावैरस्मिन् कार्ये साहाय्यमनुष्ठितं तेषां विस्मरणमनुचितं भवेदिति तेऽत्र सोपकारं स्मर्यन्ते।

राजकीयसंस्कृतपाठशालाध्यापकः श्री चिरञ्जीलाल शास्त्री अनेन महानुभावेन उपलब्धहस्तलिखितपुस्तकप्रतिलिपीकरणे मुद्रणोपयोगिसञ्चिका-

विधानेन च महान् परिश्रमो विहितः। स्वास्थ्ये दुर्बलेऽपि पण्डित श्रीचन्द्रभानुशास्त्रिणा प्रूफशुद्धि सम्पादनेऽतिश्रमः कृतः। श्री वैद्यनाथ आयुर्वेदभवन सञ्चालकेन पण्डित श्रीरामनारायणवैद्यमहानुभावेन एतत्प्रकाशनस्य सर्वं व्ययभारं स्वयमुदुह्य कलिकातायां स्वीये जनवाणी प्रिण्टिर्स एण्ड पब्लिसर्स प्रा० लि० नाम्नि यन्त्रालये मुद्रापयित्वैतत्प्रकाशितम्। इत्युपनिषत्प्रतिपाद्यपरादेवता पूर्वोक्तानां महानुभावानां सततमभ्युदयं निश्रेयसं च निदध्यादितिप्रार्थना,

वनखण्डिश्रीपीताम्बरापीठस्थस्य स्वामिनः।

ईशावास्योपनिषद्

भूमिका

सुविदितमेव सर्वेषां तत्वजिज्ञासूनां यन्मानवजीवनस्य परमलक्ष्यभूतमद्वैतरूपं ब्रह्मविज्ञानम्। तच्च परतत्त्वं केचिद् विष्णुं, शिवं, पराशक्तिमित्यादिना व्यवहरन्ति। तद्विषयकमिदं सर्वं वैमत्यजातं साधकरुचिभेदादेवेति निश्चितम्। तत्प्रतिपादनपराणामुपनिषदां चास्मिन् क्षेत्रे सर्वश्रेष्ठ्यं वरीवर्तीत्यप्यतिरोहितम्। उपनिषत्स्वपि ईशावास्योपनिषत् सर्वमूर्धन्यभूता, वैदान्तिकविषयान् संक्षेपेण सर्वोत्कर्षेण मन्त्रात्मकेन रूपेण प्रतिपादयन्ती सा सर्वमुपनिषत्समवायमतिशेत इति प्रमाणविदां। निर्णयः। सर्वेषामीश्वरवादिनामैक्यमस्यामुपनिषदि साधितम्, सर्वार्थस्य सम्भवात्। विशेषत आगमार्थमवलम्ब्य अस्या इदंभाष्यनिर्माणम्। अस्यां दिशि अद्यप्रभृतिकेषांचिदपि आचार्याणां प्रयत्नो नोपलभ्यते अतएव च इदं विवरणं कृतम्। तेन आगमविदामपि सुसमाधानं तथा तयोः आगमनिगमयोः ऐक्यं च भवेदिति मनोभिलाषो जागर्ति यथा वेदान्तिनां वैष्णवशैवप्रभृतीनामस्ति। एतस्याः पाठद्वैविध्यमुपलभ्यते---शुक्लयजुर्वेदमाध्यंदिनसंहिताऽनुसारि प्रथमं, काण्वानां च द्वितीयम्। काण्वपाठो मया व्याख्याने उपनिषत्पाठनाम्ना व्यवहृतः। प्रायेण सर्वैः व्याख्यातृभिः श्रीशङ्करप्रभृतिभिराचार्यैरन्यैश्चायमेव क्रमोऽवलम्बितो भाष्यकरणे। कश्चित्तु प्रथमः अस्य पाठभेदस्य किं कारणम्? इति क्वचिन्नोपलभ्यते। यथा उपनिषत्पाठे विद्याविद्येति मन्त्रत्रयं प्रथमं निर्दिष्टं, ततः पश्चात् सम्भूत्यसम्भूत्यादीनां क्रमः, संहिताक्रमे सम्भूत्यसम्भूत्यादीनां प्राथम्यं विद्याविद्यादीनां च पश्चाद्भावित्वं लभ्यते। उपनिषत्पाठे---"हिरण्मयेन" "पूषन्नेकर्षे" "वायुरनिलम्" "अग्ने नय सुपथा" इति। तथा पञ्चदशममन्त्रस्य "हिरण्मयेन पात्रेण सत्यस्यापिहितं मुख" मित्युक्त्वा संहितापाठे षोडशस्य "योऽसावसौ पुरुषः सोऽसावह" मिति लभ्यते। पञ्चदशमस्य द्वितीयं षोडशस्य पूर्वभागमात्रं च परित्यक्तम्। अन्ते ओं खं ब्रह्मेत्यधिकञ्च,षष्ठे "विजुगुप्सते" इतिस्थाने विचिकित्सतीति क्रियापदम्। सप्तदशे "ओं क्रतोस्मर" "क्लिबेस्मर" इतिदृश्यते इत्यादि उभयोः पाठयोः मौलिकार्थस्य यद्यपि नास्ति भेदः, तथापि पाठभेदेन प्रतिपादनक्रमवैचित्र्यमवगम्य द्विधा व्याख्यातम्। योगार्थमवलम्ब्य वेदान्तार्थमवलम्ब्य च उपनिषत्पाठः स्वीकृतः वदान्तार्थव्याख्याने, संहिताक्रमीयेण पाठेन, योगप्रधानार्थमद्वैतविज्ञानम् च व्याख्यातम् तद्यथा वेदान्तसिद्धान्ते क्रमसमुच्चयपक्षः, अद्वैतावगतौ ज्ञानमेवप्रधानम्, कर्म साधनम्। योगपक्षे कर्मणो ज्ञानदशायामप्यत्यागः। अद्वैतबुद्धिमास्थाय कर्मकुर्व-

तोऽपि योगिनो न कापि क्षतिः। यदि सन्यासविधिं कृत्वापि कर्माणि क्रियन्तेतदपि यथाकथंचित् सम्भवति, यथा शङ्करप्रभृतय आचार्या अकुर्वत। द्वयोरवस्थयोरद्वैतस्य तुल्यत्वमस्त्येव। इत्थं पाठभेदोऽर्थभेदेन संगच्छते, भाष्यद्वयनिर्माणप्रयोजनमेतदर्थम्। विशेषस्तु भाष्यतोऽवगन्तव्यः। अनया रीत्या उभयोर्मेलनं कृत्वा वेदार्थः स्फुटो भवतीति। योगार्थप्रतिपादकं भाष्यं न कस्याप्युपलभ्यते। सर्वं वेदात् प्रसिद्धयति, इति सिद्धान्तानुसारं योगार्थमूलकं तत्त्वमपि अस्यामुपनिषदि दृष्ट्वा व्याख्याकारणे प्रयत्नः कृतः। इति वेदान्तार्थव्याख्याने प्रथमतोऽद्वैतविज्ञानमष्टमन्त्रपर्यन्तम् तदनन्तरं क्रममुक्तिसाधनं विद्याविद्येति निरूपणम्। अस्मिन् पक्षे विद्यापदम् अपराविद्यापरम्, अविद्यापदं कर्मपरम्, उपासनापरम् वा, विद्यापदमपि अपराविद्याविषयकम् एव। अतएव विद्यापदं कर्मविज्ञानपरमुपासनापरं वा कृत्वा व्याख्यानेन न किञ्चित् दुष्यति। योगपक्षे विद्यापदमद्वैतब्रह्मविद्यापरमेव गृहीतम् मुख्यत्वात् गौणमुख्यन्यायेन। देवतावादस्य मन्त्ररूपत्वात् असम्भूतिसम्भूतिप्रकरणे सन्निवेश्य व्याख्यातमन्ते, सर्वसाधनानामैक्यं प्रदर्शितं सद्योमुक्तिविषयं च। वेदद्रष्टुर्भगवतोयाज्ञवल्क्यस्य इमानि द्विविधार्थबोधकानि स्मार्तवाक्यानि अपि भाष्यद्वयार्थपराणि योजयितव्यानि, तेन भाष्यद्वयस्य प्रयोजनं स्फुटी भवति :—
"ऊर्वस्थोत्तानचरणः सव्येन्यस्योत्तरं करम्। उत्तानं किञ्चिदुन्नाम्य मुखं विष्टभ्य चोरसा। निमीलिताक्षः सत्त्वस्थो दन्तैर्दन्तानसंस्पृशन्। तालुस्थाचलजिह्वश्च संवृतास्यः सुनिश्चलः। संनिरुध्येन्द्रियग्रामं नातिनीचोच्छ्रितासनः। द्विगुणं त्रिगुणंवाऽपि प्राणायाममुपक्रमेत्। ततो ध्येयः स्थितोयोऽसौ हृदये दीपवत् प्रभुः। धारयेत्तत्रचात्मानं धारणांधारयन् बुधः। सिद्धे योगे त्यजन् देहममृतत्वाय कल्पते।"
(१९८, १९९, २००, २०१,२०३) इत्येतैराध्यात्मिकस्य विषयस्य योगविषयकोऽभिप्रायः सिद्धयति। सन्यासप्रधानं च तत्त्वं पक्षान्तरं कृत्वा ब्रवीति :—अथवाऽप्यभ्यसन् वेदं न्यस्तकर्मा वने वसन्। अयाचिताशीमितभुक् परां शान्तिमवाप्नुयात्। (२०४)। याज्ञवल्क्यस्मृतिस्थयतिप्रकरणोक्तानि पद्यानि।।

श्रीपीताम्बरापीठ—दतिया

श्रीपीताम्बरपीठस्थः
स्वामी

ईशावास्योपनिषत्

प्रकाश-भाष्य-सहिता।

ओं पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।।
ओं शान्तिः शान्तिः शान्तिः ।

भाष्यम्

मङ्गलाचरणम्

नमः शान्तप्रकाशाय शिवाय परमात्मने ।
प्रत्यग्ब्रह्मरूपाय गुरवे हरिहरात्मने ।।१।।
श्रुतिशिरोऽर्थबोधाय व्याख्यां वेदार्थसम्मताम् ।
ऋज्वर्थबोधग्रन्थेन कुर्वे मोक्षार्थिनां कृते ।।२।।
शङ्करादिभिराचार्यैर्व्याख्यातं सूरिभिः परैः ।
तथापि स्वात्मतुष्टचर्थं प्रयत्नो मे विभाव्यताम् ।।३।।

चतुर्विधपुरुषार्थप्राप्तये पूर्वकृतसुकृतपुञ्जेन मनुष्यजन्मलब्धमिति शास्त्रेषु निश्चितम् । तेषु धर्मार्थकामात्मानः पुरुषार्था जन्यत्वादनित्या उपजमापायधर्मवन्तस्तेषां मोक्षशास्त्रेषु विचारो नाङ्गी क्रियते अनुपयोगात्, चतुर्थस्तु परमपुरुषार्थोऽनावृत्तिफलकस्तस्य "न च पुनरावर्तते, न च पुनरावर्तते, 'ब्रह्मविदाप्नोति परम्, नान्यः पन्था विद्यतेऽयनाय' " इत्यादिवचनैर्नित्यत्वावगमात् । उपनिषदामयमेवार्थः प्रतिपाद्यत्वेनाभिमतः । अन्येषां त्रयाणां "यथेहकर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इत्यादिना अनित्यत्वबोधनात् मुमुक्षुणा एष्वर्थेषु वैराग्यं कार्यमिति हेतोः ईशावास्यादिमन्त्राः शुक्लयजुर्वेदान्तिमेऽध्याये पठिताः, काण्वमाध्यन्दिनानामुभयेषा-मस्मिन्नेवार्थे प्रयोगः । ननु क्वचिदेषां कर्मकाण्डे विनियोगो दृश्यते येनैषां कर्माङ्गता भवेत्, भूतवस्तुबोधकत्वात् । कर्मणि एतदर्थस्यानुपयोगो भव्यार्थत्वात्

तस्येति। ननु 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतर्थानां तस्माद-नित्यमुच्यते' इति वेदस्य क्रियापरकत्वेन भव्यार्थकत्वात् कथं सिद्धवस्तुप्रतिपादकानां वेदान्तानां प्रामाण्यमितिचेन्न—प्रकरणभेदात् व्यवस्थोपपत्तेः क्रियार्थप्रकरणे पठितानामाख्यानादिकानामनुपयोगिनां तथात्वात्, नतु वेदान्तानामिति व्यवस्थोपपत्तेः इति हेतोः कथयति ईशावास्यमिति :—

ईशा वास्यमिदꣳ सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम् ॥१॥

यत्किंच जगत्यां संसारे जगत् नामरूपाभ्यां व्याकृतमिदं सर्वं प्रत्यक्षजातमीशा ईश्वरेण आवास्यं व्याप्यमाच्छादनीय-मित्यर्थः, 'वस आच्छादने' इति निष्पत्तेः। ईशेति'ईश ऐश्वर्ये' कर्तरि क्विपि तृतीयान्तं पदम्, ईष्ट इतीट् तेन ईशा परमेश्वरेणेत्यर्थः। अथवा 'वस निवासे' इति निष्पन्नत्वाद् इश्वरस्य आवास्यं वासस्थान-मिदं जगदित्यर्थः। ननु सर्वाधारस्य ब्रह्मतत्वस्येदं जगत् कथं निवास-स्थानं भवितुमर्हति ? नहि कार्याश्रितं कारणं भवतीतिवाच्यम् ? तथापि सर्वसामर्थ्यस्य ब्रह्मणोमहिमरूपेण शक्यत्वात्। अतएव 'एतावानस्य महिमा' इत्यादि मन्त्रवर्णोऽपि सङ्गच्छते, ऐश्वर्यार्थकधातु-प्रयोगोऽपि पुष्णातीममर्थम्। तेन हेतुना त्यक्तेन त्यागेन संन्यास-विधिना भुञ्जीथा लौकिकं व्यवहारं वर्तेथाः ; प्रारब्धाधीनं लौकिकं व्यवहारं कृत्वा निर्द्वन्द्वः सन् वर्तेत मुमुक्षुरित्यर्थः। गृधस्तृष्णां मा कुरु, धनं कस्यस्वित् ? स्विदिति वितर्के अर्थात् न कस्यापि इत्यर्थः ; कस्यचिद् धने विषये तृष्णा न कार्या इत्यपि सम्भवति,धनस्य लौकिकस्य क्षणिकत्वात्तस्मिन् रतिं कर्तुं मौर्ख्यमितिश्रुतिर्मुमुक्षुं तस्मान्निवर्तयति यतस्तस्यावृत्तिजनकत्वात् स्वविषयतो विपरीतत्वाच्च।

केचिदस्य जगत ईशिता परमेश्वर एव परन्तु अस्योपरि स्व-स्वामि त्वमहन्वममत्वरूपमनादिकालतो जीवेनाक्रान्तं तस्मात् कारणात् शोकमोहात्मके दुःखाब्धौ तेन पातितः, तेन हेतुना अनिशं जन्ममरणा-

त्मकं जीवः क्लेशं प्राप्नोति अतस्तं प्रत्युपदेशो मा गृधः कस्य ईशस्येति 'कस्मै देवाय हविषेति' दर्शनात्। ननु कस्मै इत्यत्र सर्वादित्वात्स्मायादेश इति चेन्न वैदिकत्वात् स्मायादेश इति मन्तव्यम्, उक्तं च उव्वटेन 'कस्मै काय इति प्राप्ते स्मै आदेशश्छान्दसः' (य. १३-४)। अर्थात् त्यागेन ईश्वरार्पणबुद्ध्या हे जीव! त्वया स्वात्मा रक्षणीयः, इदं दृश्यमानं जगत्त्वदीयं नास्ति, एतत्स्वत्वसम्पादकत्वेन दुःखावाप्तिस्तव तस्मादिदं हातव्यमिति कथयन्ति।

एवमपि संन्यासविधिं न व्यभिचरति भगवच्छरणो भूत्वा जगति सर्वलौकिकस्य व्यवहर्तव्यत्वस्य सन्यासान्तर्गतत्वात्। केचित् 'ईशानः सर्वभूतानाम्' तथा 'शम्भुरीशः पशुपतिरिति' कोशोक्तेर्भगवति शिवे ईशशब्दस्य रूढत्वाद् अस्या उपनिषदः प्रतिपाद्यो भगवान् शिव इति वदन्ति। तदपि ईशस्य आवास्यमिति विग्रहेण युक्तमेव सम्प्रचक्षते।

केचित् शक्ति-शक्तिमतोरभेदमाश्रित्य 'ईशा' इति पदच्छेदेन पराशक्त्या ग्रहणं कुर्वन्ति, तदपि सम्भाव्यते विद्याविद्यासम्भूत्यसम्भूत्यादीनां ग्रहणात् 'सोऽहमस्मीति' वाक्येनोपसंहारदर्शनाच्च। वस्तुतस्तु परतत्वविषयिणी अनेकात्मिका कल्पना साधकरुचिभेदादेव, वस्तु तस्तु एकरूपमेव; वस्तुनोऽनेकाकारस्य प्रतिषेध विषयत्वादितिभावः ॥१॥

त्यागेन ब्रह्मविद्यां मोक्षसाधनां सम्पाद्य जीवन्मुक्तः सन् कर्मानुष्ठानं कुर्वन्नपि न लेपाय भवतीति बोधयन्नाह कुर्वन्नेवेहेतिः—

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥२॥

यद्यपि कर्मकाण्डप्रसङ्गः समाप्तस्तथापि कर्मप्रसङ्गेन तदाचरणतत्वं प्रकटयन्नाह—इह लोके यथाप्राप्ताधिकारं कर्माणि नित्यनैमित्तकादीनि कुर्वन्नेव विनिवर्तयन्नेव शतं समाः शतसंख्याकान् संवत्सरान् जिजीविषेत् जीवितुमिच्छेत्। एवमनुष्ठातरि त्वयि नरे

मनुष्ये कर्म न लिप्यते बन्धादिना क्लेशजनकं न भवति। इतः परमन्यथा मोक्षस्य नास्त्युपायः इत्यर्थः। ननु पूर्वेण मन्त्रेण सन्न्यास-विधानं तस्य च कर्मत्यागस्वरूपत्वात् तथाऽनेन च मन्त्रेण कर्माणि विधित्सता विरोध इतिचेन्न अविशेषात् अयं कर्मविधिः सामान्यः, संन्यासाभावे सर्वान् प्रत्यविशेषेण विधानात् यतो विदुषः सर्वकर्म-त्यागिनो महापुरुषस्य संन्यास एवाधिकारः। 'ज्ञानं संन्यासलक्षणम्' तस्मात्कर्मणि अज्ञस्यैवाधिकारः। एवं प्रतिपादिते प्रकरणविरोधः सम्पद्यते, प्रकरणात् ज्ञान्येवाधिक्रियते तथा सति स्मार्तसिद्धान्तेन समर्थ्यते 'आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय। लिप्यते न च पापेन पद्मपत्रमिवाम्भसा' इत्यादि वेदाचार्यो भगवान् व्यासोऽपि 'नियमाच्च' (वे० ३-४-७) इत्यनेन पूर्वपक्षीकृत्य 'नाविशेषात्' (वे० ३-४-१३) इत्यनेन पूर्वोक्तमेव पक्षं स्वीचकार। ननु आत्मनोऽकर्तृत्व भोक्तृत्वबोधने प्रवृत्ता ब्रह्मविद्या एवं सति कर्मणा सार्धं समुच्चिता स्यादितिचेन्न 'गुणागुणेषु वर्तन्त इति मत्वा न सज्जते', इति न्यायाद-विरोधः। कर्तृत्वभोक्तृत्वबुद्धौ सत्यां विरुद्ध्यते तदैव समुच्चयश्च, ज्ञानिनस्तथा अभावात्। अत एवोक्तविरोधमाशंक्य अत्रत्यः कर्म-विधिस्त्यागविधेः स्तुत्यर्थ एवाङ्गीकृत आचार्यैः 'स्तुतयेऽनुमतिर्वा', (वे० ३-४-१४) अर्थादयं कर्मविधिर्विद्यां स्तौति यद् यावज्जीवं विद्वान् कर्माण्यनुतिष्ठन्नपि कर्मबन्धेनास्पृष्ट एव भवति विद्यासाम-र्थ्यात् इति विद्यामाहात्म्यप्रदर्शनार्थेयं श्रुतिः तस्मान्नास्ति समुच्चया-शङ्काऽपि। श्रीशङ्कराचार्यैः अस्मिन् मन्त्रेऽज्ञस्यैवाधिकारः प्रदर्शितः। तच्च न्यूनमेव अस्मदुक्तविधया पूरयितव्यमन्यथा प्राकरणिको विरोधः स्यात्, प्रथमेन मन्त्रेण सांख्यनिष्ठां, द्वितीयेन कर्मनिष्ठां च प्रति-पादयन् गीतोक्तं सांख्यं योगं च प्रत्यपादयत्। ज्ञाननिष्ठा मुख्या, कर्मनिष्ठा च गौणी इति प्रसङ्गतो लभ्यते। अनयोर्विशेषविवरणं वक्ष्यामोऽग्रे, मोक्षस्य प्रक्रान्तत्वात् केवलेन ज्ञानेनैव मोक्षः 'ज्ञानादेव कैवल्यमिति' श्रुतेः इति वैदिकः पन्थाः। समुच्चयवादिनस्तु ऐककालिक ज्ञानकर्मोभयसाध्यं मोक्षं वदन्ति तच्च श्रुतिविरुद्धमेव मन्तव्यम् 'नान्यः पन्था विद्यतेऽयनायेति' निषेधात् ॥२॥

अथ काम्यकर्मानुष्ठातृन् अज्ञान्निन्दति असुर्येति—

असुर्या नाम ते लोका अन्धेन तमसा वृताः ।
तांस्ते प्रेत्याभिगच्छन्ति ये केचात्महनो जनाः ॥३॥

असुषु रमन्त इत्यसुरास्तेभ्यो हिता अर्हा वा असुर्या भोगप्रधानस्थानानि योनिविशेषाश्च तेषु अहं ममेत्यभिमानरूपाः क्लेशात्मका नाम प्रसिद्धा ये लोकाः श्व-सूकरादियोनिगताः, स्थान-विशेषा रौरवादयश्च आत्मज्ञानापेक्षया स्वर्गोऽपि असुर्यस्थानमिति सांख्यवृद्धाः । अन्धेन तमसावृता ज्ञानावरकेणाऽज्ञानेनाच्छादितास्तान् प्रेत्य मृत्वाऽभिगच्छन्ति,ये आत्महन आत्महन्तारः काम्यकर्मदूषितान्तः-करणत्वादात्मयाथात्म्यज्ञानरहिता इत्यर्थः । ननु नित्यत्वादात्मनः कथं हननमितिचेन्न गौणत्वात् सम्भवेत्, यथा हि आत्मज्ञानसाधनं मानवं विग्रहमवाप्य ये विषयादितुच्छपदार्थेषु रमन्ते नित्यमात्म-सुखं च परित्यजन्ति ते आत्महन्तारः इत्थमेव हननं, तदपराधेन अधम-योनिषु जायन्ते म्रियन्ते च एवं तेषां जननमरणरूपः संसारोऽनुपरतो भवति, मोक्षावसरं प्राप्य स्वहस्तादेव नाशयन्ति अतस्ते निन्द्याः । असूर्या इति पाठे—न विद्यते सूर्यो येषु तेऽसूर्याः प्रकाशरहिता अतएव तमसा वृता जडात्मका योनय अन्धतामिस्रादिस्थानविशेषाश्च एत-त्सर्वमज्ञानात्मकमेवेति वेदान्तिनः । अस्मिन् मन्त्रेऽज्ञनिन्दया ज्ञायते पूर्वोक्तमन्त्रः 'कुर्वन्नित्यादिः' ज्ञानिप्रशंसापरक एव निन्दास्तुत्योः सापेक्षत्वादिति ॥३॥

यस्यात्मनः साक्षात्कणात् मोक्षाख्यः परमः पुरुषार्थः सिध्यति तदज्ञाने च संसरणमितिनिश्चितं तत्तत्वं कीदृशमिति जिज्ञासाया-माह अनेजदितिः—

अनेजदेकं मनसो जवीयो नैनद् देवा आप्नुवन् पूर्व मर्षत् ।
तद् धावतोऽन्यानत्येति तिष्ठत् तस्मिन्नपोमातरिश्वा दधाति ॥४॥

अनेजत् 'एजृ कम्पने' इतिनिष्पन्नं, न एजदनेजद् अर्थात् क्रियारहितं षड्भावादिविक्रियारहितत्वेन सर्वदैकरूपमित्यर्थः ।

एकं प्रतियोगिद्वैतरहितम्, एतेन ज्ञायते आत्मैक्यवाद एव वैदिकः नहि अस्यामुपनिषदि नित्यभेदात्मकं द्वैतत्वेनप्रसिद्धमीश्वरजीवयोः पार्थक्यमुपलभ्यते। मनसो जवीयः अतिवेगवत्, देवा इन्द्रियाणि देवनाद् देवाश्चक्षुरादीन्द्रियाणि विषयप्रकाशकत्वेन प्रसिद्धानि, न एनत् परमात्मतत्वमाप्नुवन् तत्सामर्थ्यमादायैव मन आदीन्द्रियाणि स्वस्व-विषयाणि ग्रहीतुं समर्थानि भवन्ति, आत्मानं विषयीकर्तुं पुनस्तानि कथं प्रभवेयुरित्यर्थः, 'विज्ञातारमरे केन विजानीयाद्'इतिश्रुतेः यत्रेन्द्रि-याणि गच्छन्ति तद्गमनात् पूर्वमेवात्मतत्वमर्षत् 'ऋषी गतौ' इत्य-स्मात् 'ये गत्यर्थास्ते ज्ञानार्था अपि' इतिन्यायेन पूर्वमपि ब्रह्मादिभ्योऽपि प्रथमं ज्ञानविषयकमासीत् 'एकमेवाद्वितीयम्'इतिश्रुतेः पूर्वं सृष्ट्यग्रे वा सर्वव्यापित्वान्मन आदीन्द्रियाणां गमनात् पूर्वमेव सर्वत्रात्मतत्वं विद्यमानमित्यर्थः। तदात्मतत्वं धावतोऽन्यान् ये गतिमन्तः पदार्था-स्तान् सर्वान् अत्येति अतिक्रामतीव वस्तुतः क्रियारहितत्वात्, तिष्ठत् इति क्रियावतां तस्मादेव क्रियाकरणसामर्थ्यसमर्पणादित्यर्थः। तस्मिन्नेव मातरिश्वा हिरण्यगर्भो मातरि आकाशे श्वयत इति हिरण्यगर्भोऽपो अप्सध्यानि कर्माणि दधाति, विभज्य सर्वान् नियोजयति सर्वाधारभूत-मात्मतत्वमितिभावः, तत्वशब्दमन्ते प्रयुज्य शिवशक्त्यादीनामर्थानां निर्वाहः कर्तव्यः। यतो मन्त्रस्थपदानां क्लीबत्वात् ॥४॥

'द्विर्बद्धं सुबद्धं भवतीति' न्यायेनोक्तार्थ एवापरेण मन्त्रेणाह तदेजतीति—

तदे॑जति॒ तन्नै॑जति तद्दू॒रे तद्व॑न्ति॒के
तद॒न्तर॑स्य॒ सर्व॑स्य॒ तदु॒ सर्व॑स्यास्य बाह्य॒तः ॥५॥

तदात्मतत्त्वमेजति जगत्कर्तृत्वरूपेण, स्वात्मशक्त्युपाधिना क्रियात्मकेन स्वतः क्रियाशून्यत्वान्नेजति विभुत्वात् 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' इतिश्रुतेः तद् दूरे सर्वोपाधिधर्म-मतिक्रम्य विद्यते त्रिपाच्छ्रुतेः। अथवा जन्मसहस्रेणापि प्राप्तु-मशक्यत्वाद् दूर इति। तद् उ अन्तिके तदात्मतत्वमपि समीपे सर्वो-पाधिष्वनुगतत्वात् अथवा विदुषां सर्वसाधनसम्पन्नानानां प्रत्यग्ब्रह्म-

योगे प्रवणानां समीप एव सर्वत्र ब्रह्मबुद्धित्वात्तेषाम् 'सर्वं खल्विदं ब्रह्म' इति श्रुतेः स आत्मा आन्तरस्य बाह्यस्य च सर्वस्य ज्ञानशक्त्युपाधिकस्य क्रियाशक्त्युपाधिकस्य च जगतोऽस्य ईशिता भवतीति शेषः। एवं भूतमेवार्याणां शिवशक्तिसारस्याभिधेयतत्त्वमितिभावः ॥५॥

ज्ञानस्वरूपं तत्फलं चाह यस्त्वित्यादिना—

यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥६॥

यस्तु य एवात्मवित् सर्वाणि भूतानि आब्रह्मस्तम्बपर्यन्तानि, सर्वं चराचरात्मकं जगदित्यर्थः। आत्मन्येवानुपश्यति आत्मतत्वतोऽविभागेन पश्यति, 'अहं ब्रह्मास्मि' इत्यनुसारेण अभेदात्मकं पश्यति, यथाचाहुः 'अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः। हकारोऽन्त्यः कलारूपो विमर्शाख्यः प्रकीर्तितः अकारहकाराभ्यामस्मि क्रियापदेन च शिवशक्तितत्वयोस्तथा जीवतत्वस्य चाव्यतिरेकेणायं मन्त्र ऐक्यं समर्थयति, एवं नामरूपाभ्यां व्याकृतस्य जगतो मृद्घटवद् ब्रह्मविदभेदं पश्यति, अर्थात् सर्वेषु भूतेषु आत्मानमेवमात्मनि सर्वाणि भूतानि इति प्रकारकं ज्ञानं तस्य जायते ततो न विजुगुप्सते तस्य परम योगिनो रागद्वेषयोरभाव एव भवति सर्वत्र ब्रह्मदृष्टित्वात्। परमतत्वस्य ज्ञानस्येदमेव फलं यदभेददर्शनम् उक्तं च 'यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति। तस्याहं न प्रणश्यमि स च मे न प्रणश्यति ॥' इति ॥६॥

उक्तमेवार्थं प्रकारान्तरेणाह :—

यस्मिन्त्सर्वाणि भूतानि आत्मैवाभूद् विजानतः।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥७॥

यस्मिन् लयचित्तके विदुषि सर्वाणि भूतानि स्थूलसूक्ष्मरूपाणि आत्मैवाभूत् ब्रह्मभावमेवोपगतानि भवन्ति जगतः पारमार्थिकरूपेण ब्रह्मरूपत्वात् एवं प्रयोगेण तथैकत्वेन च कार्यस्य कारणे लयः

सूच्यते। एवं विजानतः तत्वसाक्षात्कुर्वत एकत्वमनुपश्यतोऽद्वैत-बुद्धिमतो महाभागवतस्य शोको मोहश्च कः न कुत्रापीत्यर्थः। अविद्या-वस्थायामेव शोकमोहौ भवतः, अद्वैतब्रह्मविद्यायामधिगतायां सा समूलं निवर्तते तन्मूलकावेव शोकमोहौ अपवादं चिन्तयतुः सम्यग् ज्ञानाधिगमे सर्वक्लेशनिवृत्तिः कृतकृत्यता च; औपनिषदमते जीवन् मुक्तिरपि सैव। तथाहि—"एष नित्यो महिमा ब्राह्मणस्य न वर्धते कर्मणा नो कनीयान् ... ...' तस्मादेवं विच्छान्तोदान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यति सर्वमात्मानं पश्यति।" ... ... इत्यादि स्वब्राह्मणेनैक्यं गम्यते मन्त्रब्राह्मणयोरैक्यं न्याय्यम्। आत्मानं ज्ञात्वैव स्मार्तयोः सांख्ययोगयोरपि सम्यक् सिद्धिर्भवति, एवमेव प्रतिपादितं भगवता वासुदेवेन गीतायां तत्रतत्रेति ॥७॥

ब्रह्मणो याथात्म्यं ब्रुवन्नाह स पर्यगादिति—

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳशुद्धमपापविद्धम्। कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥८॥

स अद्वैतात्मा परितः समन्ततः अगात् व्याप्तवान् तद् ब्रह्मतत्वं शुक्रं दीप्तिमद् सर्वप्रकाशकमकायं लिङ्गशरीरवर्जितम्-अव्रणं छिद्ररहितमस्नाविरमविगलितमथवा स्नावाशिरास्तद्वर्जितम् अपाप-विद्धं पुण्यपापरहितमत एव शुद्धमिति एताभ्यां स्थूलकारणयोरपि निषेधः। स एव आत्मा चिन्मयीं स्वात्मशक्तिमुपारूढः सन्नतीताना-गतादिकालत्रयं पश्यति, कविः क्रान्तदर्शी, मनीषी मनीषा यस्यास्तीति, सर्वज्ञानसाधनत्वेन सर्वज्ञ इत्यर्थः। परिभूः परितो भवति नाना-रूपैः। ननु नानारूपैर्ब्रह्मणो भवनं विप्रतिषिद्धं यतोविकाराभावेना-परिणामित्वात्तस्येतिचेन्न—अविकृतपरिणामसंभवात् विवर्तोपादान त्वाच्च तस्मान्नास्ति विप्रतिपत्तिः। उक्तञ्च संवित्प्रकाशे इति-निर्मलबोधैकरूपे देहपरिग्रहः। "विवर्तपरिणामाभ्यां द्वाभ्यामप्युप-पद्यते। विवर्तेऽप्यतथारूपः तथाभासितवमच्युते। परिणामे स एव त्वं सुवर्णमिव कुण्डले।" अभेदार्थकारिकास्वपि निषेधविधेयमुखेन च प्रद-

र्शितम् :—'नेत्थं विभोर्विवर्तोऽस्ति परिणामश्च न क्वचित् । अथवा द्वयमप्यस्तु तथाप्यस्य न खण्डना' इति । स्वयम्भूः स्वयं भवतीति जगत्कार्यकरणे निरपेक्षं कारणं ब्रह्म, यत्र साक्षेपत्वं तत्रैव विकारादिसम्भावना, यथा मृद्घटयोः । शाश्वतीभ्यः निरन्तरेभ्यः समाभ्यः संवत्सराख्येभ्यः प्रजापतिभ्यः सकाशात् याथातथ्यतः साध्यसाधनादिनियतंस्वरूपेणार्थान् चराचरात्मकान् व्यधात् कल्पितवानित्यर्थः ॥८॥

एतेषां मन्त्राणां तात्पर्यम् :—

पूर्वोक्तैरष्टाभिर्मन्त्रैः ससाधनं ब्रह्मतत्वं निरूपितं तत्सर्वं संक्षिप्य विव्रियते—उपनिषद्-विद्यायाः प्रतिपाद्य आत्मा निरतिशयानन्दस्वरूपो हेयोपादेयरहितः कर्मविद्याया अनङ्गभूत इति । तन्मुख्यं साधनं ज्ञानं, गौणसाधनं कर्म । उक्तं च 'न कर्मणा न प्रजया धनेन त्यागेनैके मृतत्वमानशुः' । एतमेव विदित्वा मुनिर्भवति एतमेव प्रव्रजिनो लोकमिच्छन्तः प्रजन्ति एतद्धस्म वै पूर्वे विद्वांसः प्रजां न कामयन्ते किं प्रजया करिष्यामः," इत्यादि प्रसङ्गः संन्यासमेव दृढयति तदपरे कर्मिणो न क्षमन्ते अतएव निर्णयाय संवादरूपेण किंचित् प्रस्तूयते—

क०—पूर्वस्मिन्मन्त्रे 'एके' इति वचनाज् ज्ञायते यद् ब्रह्मप्राप्तेरन्योऽपि मार्गो विद्यते, स कर्ममार्गस्तस्यैव कुर्वन्नेवेहेत्यादिना अत्रापि प्रतिपादनमभिप्रेतम् । 'एके' इति कथनेनामुख्यत्वं सांख्यस्य कर्मणश्च प्रधानत्वं सूचितं, न कर्मणेति निषिद्धं तत्सकामविषयकमेवावगन्तव्यमेवमेवाऽन्यत्रापि ज्ञेयम् ।

सां०—'एके' इति पदेन यदप्रधानत्वं सांख्यस्य कर्मिणः प्रत्यपीपदन् तदयोग्यमेव यतः प्रधानार्थेऽपि एकशब्दः प्रयुज्यमानो दृश्यते, यथा 'एष्वयमेक एव' तस्मात्प्रधानार्थेऽपि एक शब्दः स्वीकर्तव्यः 'एके' मुख्यान्यकेवलाः' इतिकोशात् अभ्यर्हितत्वादत एव प्रथमेन मन्त्रेणात्रापि स्वीकृतम् । गीतायां च "ज्ञानयोगेन सांख्यानां कर्मयेगेन योगिनाम्" इत्यादिग्रन्थेन इयमेव शैली स्वीकृता, कर्मणा सार्धं ज्ञानस्य विरोधात् । कर्तृत्वादिबुद्धिनिवृत्तिरेव ज्ञानिनस्तस्मात्तं प्रति कर्मणोऽभावः । सत्वशुद्धये यत्कर्माचरणं तदज्ञावस्थायामेव सिद्धावस्थायां

कर्तृत्वादि बुद्धिरहितमेव कर्माचरणमत एव नास्ति तेन सार्धं विरोधः। कुर्वन्नेवेहेत्यादिना इदमेव स्वीकृतम् तथापि 'स्तुतयेनुमतिर्वा' इत्यनेन ज्ञानिकर्माचरणं स्तुतिमात्रमेव आचार्यैः स्वीकृतमित्यादिप्रमाणैः सांख्यस्यैव मुख्यत्वमभ्युगन्तव्यमर्हति।

क०—जनकाश्वपतिप्रभृतयो राजानस्तथानेके ब्राह्मणाश्च कर्मत्यागमकृत्वैव ब्रह्मभावमध्यगच्छन्, श्रुतौ च कर्मविधिरुपलभ्यते "तमेनं वेदानुवचनेन ब्राह्मणा विविदिषन्ति, यज्ञेन, दानेन, तपसा, नाशकेन," तस्मादनुपायभूतएव कर्मत्यागविधिः। ईशावास्योपनिषदो व्याख्यानभूते बृहदारण्यकेऽपि महर्षेः याज्ञवल्क्यस्य प्रधानशिष्यो जनको जीवन्मुक्तः सन्नपि कर्मविधिमपरित्यज्यैव लोकसंग्रहमकार्षीत् तस्मात् संन्यासिभिरपि कर्मयोगिवत्कर्मकार्यमेव 'काम्यानां कर्मणांन्यासः संन्यासं कवयो विदुः' इति, काम्यकर्मणामेव त्यागोऽनुमन्यते नाऽन्येषामिति।

सा०—भोगसाधनसमाप्तौ जीवन्मुक्तेर्विलक्षणानन्दानुभवार्थं सांख्यविधे: स्वीकारः ब्रह्मानुभूतेः पराकाष्ठा सांख्यमार्गे एव तत् प्रदर्शनार्थमेवौपनिषदविज्ञानस्यारम्भः। 'गुणा गुणेषु वर्तन्त' इतिन्यायेन कर्माचरणमपि न निषिध्यते यदनेके ब्राह्मणा राजर्षयश्च शरीरत्यागपर्यन्तमनुतस्थुः तथापि सत्वगुणप्रकृतेर्ज्ञानिनो राजसप्रकृतेः कर्मिणश्च गौणत्वमङ्गीकर्तव्यमेव यतः सत्वगुणाज् ज्ञाने प्रवृत्तिः, राजसात् कर्मणि 'नहि ज्ञानेन सदृशं पवित्रमिह विद्यते' इति प्रमाणात् सात्विकोऽपि कर्ता स्मर्यते, परन्तु तत्सत्वं रजसोपसर्जनीभूतमेव क्रियाबहुलत्वात् अत एव विलक्षणानन्दाऽभावश्च। अन्यच्चेयमुपनिषत् शुक्लयजुर्वेदान्तर्गता इमं वेदं महर्षिर्याज्ञवल्क्योऽधिजगे सूर्यनारायणादिति इतिहासप्रसिद्धम्, एतद्वेदाभिप्रायं सम्यग् विज्ञाय प्रकृतमन्त्रोपनिषदभिप्राय प्रकाशनार्थमेव शातपथीये बृहदारण्यके स व्याचष्टेस्म संन्यासविधानम् 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः। नानुध्यायाद् बहूञ्छब्दान् वाचा विग्लापनं हि तत्।' इति संन्यासमूलकं वचनं तथान्यान्यपि बहूनि वाक्यानि सन्ति। मैत्रेय्यै ब्रह्माद्वैतमुपदिश्य सम्यग् गृहस्थं च परिपाल्य ततः पश्चात् पर्यव्राजीत्, 'याज्ञवल्क्यो विजहार' इति

ज्ञायत अस्याचारो मुख्यः संन्यास एव। अस्य वेदस्य तात्पर्यं संन्यास-विधावेव मुख्यत्वेन सिद्धयति। इत्थमविचार्य समसमुच्चयम् ब्रुवाणानां मतं चिन्त्यमेव; स्मार्तं हारीतप्रोक्तं समुच्चितं विद्याविद्येत्यादि-श्रुत्यनुकूलमेव मन्तव्यम् तच्च अनुपदमेव वक्ष्यते। इति संक्षेपः।

प्रधानतो मोक्षविषयकं तत्वं प्रतिपाद्य तत् पिपालयिषोरधिकारिण आचारद्वैविध्यं च प्रदर्शितम्। साम्प्रतं ये मन्दाधिकारिणस्ताननु-गृह्णन् क्रमेण तेषामपि शाश्वतं ब्रह्म प्राप्तं भवेदिति हेतोर्वेदः कथयति अन्धन्तम इति—

अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते तमो य उ विद्यायां रताः॥ ९॥

येऽज्ञानिनोऽविद्यां कर्म उपासते अर्थात् कामोपभोगदुष्टान्तः-करणाः केवलं ज्ञाननिरपेक्षं कर्मैव स्वर्गफलार्थिनो यातायातफलं भोग्यत्वेन सेवन्ते, अत्र अविद्यापदं कर्मपरकमेव मन्तव्यमुपचारेण विषयपरत्वात्, यद्यपि कर्मस्वरूपमपि विद्यैव बोधयति तथाप्यत्र विद्या-मविद्यान्तर्गतां कृत्वाह—अविद्यामिति ते अन्धंतमः जननमरणादि-फलकमज्ञानविषयं प्रविशन्ति प्राप्नुवन्ति, अन्धेन तमसावृता' इतिश्रुतेः आत्माहन्तृत्वात् ततो भूयोऽधिकतरं तमः प्रविशन्ति ये उ एव विद्यायां रताः कर्मनिरपेक्षं केवलं तज्ज्ञानमेवोपासते। इव शब्दो निश्चयार्थे यतः कर्मविना दम्भाचरणसम्भवात्। मुण्डके विद्या द्वैविध्यं प्रोक्तम् 'द्वे विद्ये वेदितव्ये परा अपरा च' इत्यादि। परा उपनिषद्विद्या, अपरा विषयकाश्चत्वारो वेदास्तद् विषयकं कर्म, तद्भिन्नं पराविषयं ब्रह्म अकर्तृत्वादिविषयं यत्तत्वमष्टाभिर्मन्त्रैः पूर्वं निरूपितम्। अत्र मन्त्रे विद्याविद्यापदाभ्याम् अपरैव विषयविषयिरूपेण गृह्यते, तद् विषय-भेदात् अर्थात् एके केवलं कर्मैवानुतिष्ठन्ति, अपरे केवलं तद्विषयक-ज्ञानचर्चायामेव रमन्ते, एतस्माच्छुष्कज्ञानात् कर्मानुष्ठानं श्रेय इति भावः। अग्रे चैतत्स्फुटीभविष्यति। केचिदविद्यापदेन कर्म विद्या-पदेनोपासनां गृह्णन्ति, 'कर्मणा पितृलोकः' 'विद्यया देवलोक' इति प्रमाणात्। अयमर्थोऽपि घटते। परन्त्वत्रविद्यापदेन येषां मते ब्रह्मविद्या

तेषां मतं सर्वथा असमञ्जसमेव, 'यस्तद्वेदोभयꣳ सह' इत्यग्रिमवचनेन विरोधात्, यतो वृहदारण्यके उपासनाप्रकरणे एवेयं श्रुतिः समुपन्यस्ता विरोधात् 'तस्मिन्शुक्लमुतनीलमाहुःपिङ्गलं हरितं लोहितं च । एषपन्था ब्रह्मणा ह्यानुवित्तस्तेनैति ब्रह्मवित् पुण्यकृत् तैजसश्च' (बृ० ४-४-६) । अस्मिन्मन्त्रे उपासनां प्रकृत्याग्रे 'अन्धंतम' इत्यादिमन्त्रो निर्दिष्टस्तेन ज्ञायते पुण्यकृदादिलिङ्गेनायं प्रसङ्गः कर्मोपासनाविषयक एव, यतः तस्मिन्नादिमन्त्रतः पूर्वमेव पराविद्याविषयः समाप्तः 'न तस्य प्राणा उत्क्रामन्ति' इत्यादि, तस्मादत्र मन्त्रे विद्यापदेनोपासना अथवा कर्मविषयकं ज्ञानमेव ग्रहीतुं न्याय्यम् । उपासना विवरणं श्रीशङ्कराचार्यैः प्रदर्शितमानन्दमयाधिकरणे कानिचिद् ब्रह्मण उपासनानिअभ्युदयार्थानि, कानिचित् क्रममुक्त्यर्थानि, कानिचित् कर्मसमृद्धयर्थानि, एष सर्वोऽपि प्रकारो विद्याविद्याविषयेषु पूर्वोक्तेष्वन्तर्भवति । पराविद्याग्रहणं त्वत्रायुक्तमेव तस्मादस्मदुक्तमेवानवद्यम् ॥९॥

विद्याविद्ययोः पृथक्-पृथक् फलमाह अन्यदिति—

अन्यदाहुर्विद्ययान्यदाहुरविद्यया ।
इति शुश्रुम धीराणां ये नस्तद् विचचक्षिरे ॥१०॥

विद्यया कर्मविषयकज्ञानेन अनया रीत्या करणेन बन्धः, अनया रीत्या विमुक्तिरिति ज्ञानमिह विवक्षितं तस्यफलमन्यदेव 'महतोभयात् त्राणात्मकमाहुः' कथयन्ति । 'कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदामिति' । अविद्यया केवलेन कर्मणा तस्मादन्यदेव फलमाहुः । इति एतादृश्येव आचार्यपरम्परा दृश्यते धीराणां ये महात्मानो नोऽस्मभ्यं तत्त्वं विचचक्षिरेव्याख्यातवन्तस्तथा वयं शुश्रुम अश्रौष्म इत्यर्थः ।११।

उभयोः समुच्चयमाह—

विद्यां चाविद्यां च यस्तद्वेदोभयꣳ सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ।११।

वेत्त्यनयेति विद्या, यया कर्मस्वरूपपरिज्ञानं जायते नित्यनैमित्तकादिभेदभिन्नस्य कर्मण आचरणं कथं कर्तव्यमिति या सम्यग् बोधयति, विद्यया रहितैरेभिः कर्मभिः स्वर्गसुखमनुभूय कर्ता पुनः संसारमेव प्रतिपद्यते, अत एव क्षणिकत्वेन त्याज्यकोटावेव मन्तव्यम्। विद्यया कर्मणां स्वरूपं विज्ञाय निष्कामबुद्धया क्रियते तदैव विद्याविद्ययोः सम्यक् फलं लभ्यते। यः समुच्चयोपासक उभयोस्तत्वं सहभावेन वेद जानाति स अविद्यया कर्मणा मृत्युं जननमरणात्मकं यद् दुःखं तत् तीर्त्वा विद्यया तद्विषयकज्ञानेनामृतं विष्णोः पदमश्नुते-प्राप्नोति। क्रमेण ज्ञानसाधनं कर्म तेन च मोक्ष इति सिद्धान्तः। साक्षात्तु मोक्षो ज्ञानादेव भवति, उक्तं च 'कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः। जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम्॥ स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः। 'मुच्यन्ते तेऽपि कर्मभिः' 'एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः। कर्मणैव हि संसिद्धिमास्थिता जनकादयः'। इत्यादिवचनैरिति अयमपि समुच्चयो यावदाचरणकालभाव्येव, नत्वेकस्मिन् काले, एककालावच्छेदेन द्वयोरसम्भवात्॥११॥

कार्यकारणयोरुपासनं पृथक् पृथक् निन्दति अन्धेतम इति—

अन्धन्तमः प्रविशन्ति येऽसम्भूतिमुपासते।
ततो भूयं इव ते तमो य उ सम्भूत्यांरताः॥१२॥

येऽसम्भूतिं कारणब्रह्म प्रकृतिं वा उपासते ते अन्धन्तमः प्रविशन्ति, 'क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्' इति क्लेशाधिक्यमेवात्र अन्धंतमस्त्वेन गृह्यते, प्रकृतिं वा ये उपासते ते प्रकृतिलयत्वं गच्छन्ति, प्रकृतेरन्धतमस्त्वं प्रसिद्धमेव 'पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः' (सां० का० २१)। पुरुषाश्मवदितिचेत्तथापि (वे० २-२-७) इति सूत्रे भाष्ये वा पूर्ववदेव अन्धन्त्वं प्रकृतेः स्वीकृतम्। ततो भूय इवाधिकतरमेव तमोऽज्ञावस्थां गच्छन्ति ये सम्भूतिं कार्यब्रह्महिरण्यगर्भमुपासते अणिमाद्यर्थमनेकक्रियाकलापसाध्यत्वात्, देवयानमार्गसाध्यत्वादन्ते विनाशित्वाच्च तमसो बाहुल्यं प्रदर्शितम्। तदुक्तं गीतायाम् 'आब्रह्मभुवना-

ल्लोका: पुनरावर्तिनोऽर्जुन' इति प्रमाणात् । अतएव एकैकमुपासनं विप्रतिषिद्धम् । केचित् सम्प्रज्ञातासंप्रज्ञातयो: समाध्योर्ग्रहणं सम्भूत्यसम्भूतिपदाभ्यां कुर्वते । केचित् सम्भूतिपदेन ईश्वरम्, असम्भूतिपदेन कार्यं कल्पयन्ति । एतत्तु सर्वथा विपरीतार्थपरं लोकवेदाप्रसिद्धत्वात्, व्युत्पत्यापि दुष्टत्वाच्चासमञ्जसं तस्मादस्मदुक्तमेत्र संगतम् ॥१२॥

उभयो: पृथक्-पृथक् फलमाह अन्यदिति —

अन्यदाहुः सम्भवात् अन्यदाहुरसम्भवात् ।
इति शुश्रुम धीराणां ये नस्तद् विचचक्षिरे ॥१३॥

सम्भवात् कार्यब्रह्मोपासनात् अन्यदेव भिन्नमेव फलं ब्रह्मलोकप्राप्त्यात्मकं, तथा कारणब्रह्मोपासनात् अन्यदेव कारणब्रह्मस्वरूपप्राप्त्यात्मकं फलं भवतीति धीराणामुभयतत्वविदां महात्मनाम् उपदेशं वयं शुश्रुम श्रुतवन्तो ये महात्मनो नोऽस्मभ्यं पूर्वोक्तं तत्त्वं विचचक्षिरे व्याख्यातवन्त: इति ॥१३॥

उभयो: समुच्चयं प्राह सम्भूतिं चेत्यादि —

सम्भूतिं च विनाशं च यस्तद्वेदोभयथं सह ।
विनाशेन मृत्युं तीर्त्वा सम्भूत्यामृतमश्नुते ॥१४॥

विचचक्षिरे सम्भूतिं चेत्यत्र संहितापाठमाश्रित्य एङ: पदान्तादति (पा० ६-१-१०६) इत्यनेनाकारलोपो द्रष्टव्य: । तेन असम्भूतिं कारणब्रह्म, विनाशं हिरण्यगर्भं च, सम्भूतिस्थाने विनाश शब्दप्रयोगोऽन्त्यविकारमासाद्योक्त: सम्भवनक्रियाया विनाशेनाविनाभूतत्वात्, य: समुच्चयोपासक उभयं सह वेद अर्थात् उभयोपासनं य:करोति स हिरण्यगर्भोपासनया मृत्युं जननमरणमतिक्रम्य असम्भूत्या कारणब्रह्मोपासनया अमृतं क्रममुक्तिप्राप्तिफलकं मोक्षमश्नुते प्राप्नोति । 'भोगमात्रसाम्यलिङ्गाच्च' 'जगद्व्यापारवर्जमित्यादि' सूत्रोक्तं तया प्रकृतिलयत्वं वा । एतत्तत्त्वं पूर्वोक्तं श्रीआनन्दगिरिस्वामिना

माण्डूक्यभाष्यविवरणे त्रिधाकृत्य व्याख्यातम् 'आश्रमिणो वर्णिनश्च कार्यब्रह्मोपासकाः हीनदृष्टयः, 'कारणब्रह्मोपासका मध्यमदृष्टयः, (असम्भूतिपदेनात्र यन्निर्दिष्टम्) अद्वैतब्रह्मदर्शनशीलास्तु उत्तम दृष्टयः (अस्यामुपनिषदि प्रथममन्त्रमारभ्य अष्टममन्त्रपर्यन्तं यद् रहस्यमुक्तम्), उत्तमदृष्टिप्रवेशनार्थं दयालुना वेदेनोपासना उपदिष्टा' (३, १६)। विद्याविद्येतिमन्त्रविषये ललितासहस्रनामभाष्ये 'विद्याविद्यास्वरूपिणी' इति व्याख्यानावसरे श्रीभास्करदीक्षितेन यद्वेति-पक्षान्तरं कृत्वा इत्थं व्याख्यातम् विद्यैव चरमरूपज्ञानम्। अविद्या भेदभ्रान्तिरूपं ज्ञानम्। स्वः परब्रह्मात्मकं ज्ञानम्। स्वपदस्यात्मवाचित्वात् 'स्वज्ञातावात्मनि' इतिकोशात्। एतत् त्रयं रूपमस्याः (एतेनेयमुपनिषत् शक्तिपरेति सिद्धं भवति)। उक्तं च लैङ्गे "भ्रान्तिर्विवद्यापरं चेति शिवरूपमिदं त्रयम्। अर्थेषु भिन्नरूपेषु विज्ञानं भ्रान्तिरुच्यते। आत्माकारेण संवित्तिर्बुधैर्विद्येति कथ्यते। विकल्परहितं तत्वं परमित्यभिधीयते।" इति पूर्वोक्तं समस्तं वेदव्याख्यानतत्त्वमनेन प्रकारेण सङ्गच्छते ॥१४॥

एतेषां मन्त्राणां तात्पर्यम्

विद्यां चाविद्यां चेत्यादिना कर्माचरणसिद्धान्तो निरूपितः, विद्यां विना कर्मानुष्ठानं जननमरणलक्षणं संसारप्रापकमिति श्रुतिन्यायतः सिद्धम्। तत्कर्मस्वरूपं व्यवसायात्मिकया ईश्वरार्पणधिया वाऽनुष्ठीयते तच्छ्रेयोमार्गप्राप्तये भवति। असम्भूतिविनाशयोश्चोभयोरुपासनयोरपि फलमेतादृशमेव। एतद् विवरणमित्थं भवति येऽसम्भूतिमुपासते ते क्रमेणाद्वैतनिष्ठामनावृत्तिलक्षणां ब्रह्मलोकान्ते प्राप्नुवन्ति विनाशेन सार्धं समुच्चित्वन्तः। ये च पुनः सम्भूतिमेवोपासते ते कल्पान्ते ब्रह्मलोकसुखमनुभूय संसारमेवायान्ति। यद्यपि महर्षिणा व्यासेन "कार्यात्ययेतदध्यक्षेण सहातः परमभिधानात्" (वे० द० ४-३-१०) 'स्मृतेश्च' (वे० ४-३-११) इतिसूत्राभ्यां ब्रह्मलोकगतानामनावृत्तिरेव सिद्धान्तिता। तथापि कारणब्रह्मोपासकानामियं गतिः 'एकया यात्यनावृत्तिमन्यया़ऽऽवर्तते पुनः' इति स्मृतेः पुनरपि तत्रैव 'आब्रह्म-

भुवनाल्लोकाः पुनरावर्तिनोऽर्जुन,' इत्यनेन ब्रह्मलोकगतानामावृत्तिः प्रदर्शिता। एतेन ज्ञायते आवृत्तिः कार्यब्रह्मोपासकानामनावृत्तिः कारणोपासकानामहङ्ग्रहे लग्नचितानामिति विवेकः। कठभाष्ये श्रीशङ्कराचार्येणोक्तम् 'आदित्यद्वारेणामृतत्वममरणधर्मत्वमापेक्षिकम्। आभूतसम्प्लवं स्थानममृतत्वं हिभाष्यते'(वि० पु० २-८-९७) इति स्मृतेः। ब्रह्मणा सह वा कालान्तरेण मुख्यममृतत्वमेति "भुक्त्वा भोगाननुपमान् ब्रह्मलोकगतान्(क० २-३-१६)। 'नच पुनरावर्तते' इतिव्याख्यानावसरे आनन्दगिर्यादयो व्याख्यातारो ब्रह्मलोकतोऽपि आवृत्तिमिच्छन्ति, एतत्सर्वं पूर्वोक्तानुकूलमेव मन्तव्यम्। अन्येषां प्रतीकोपासकानां तु ब्रह्मलोकप्राप्तिरेव न भवति अप्रतीकालम्बनान्नयतीति सिद्धान्तितम्। 'केचित् ते ब्रह्मलोकेषु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे'। इति मन्त्रादपि ब्रह्मलोकाद् आवृत्तिमिच्छन्ति। एतत्सम्भूत्युपासकानामेव भवितुमर्हति। कैश्चित् सम्भूत्यसम्भूतिप्रसङ्गे देहात्मवादिनां मतं, तथा कैश्चित् प्रतिमापूजनं च निषिध्यते तत्सर्वमसम्बद्धमेवावगन्तव्यम्, यतः सम्भूत्यसम्भूतिसमुच्चयेन विरुद्धत्वात्, उक्तं ललितासहस्रनामसु सम्भूत्यसम्भूतिविषये 'मूलप्रकृतिरव्यक्ता व्यक्ताव्यक्तस्वरूपिणी' (श्लो० १३७) इति सङ्क्षेपः।

उपासनापि मानसी क्रियैव तच्च कथं श्रेयः प्राप्तये भवतीति प्रदर्शितैःषड्भिः मन्त्रैः स्पष्टीकृतः। साम्प्रतं समुच्चयोपासकः स्वात्मसाक्षात्करणाय आदित्यमण्डलस्थं पुरुषं याचते, यत आदित्य एव देवयानमार्गाश्रितानां मुख्यः प्राप्यस्तं प्राप्यैव ते ब्रह्मलोकं यान्ति, अतः कथयति हिरण्मयेनेति —

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥ १५ ॥

हे पूषन् पुष्णातीति उपासनाफलपोषक! हिरण्मयेन पात्रेण स्वर्णमयेनात्यन्ततेजोमयेन पात्रेण पात्रसदृशपिधानेन,पिहितं प्रच्छन्नभूतं, सत्यस्य ब्रह्मणो लोकस्य मुखं द्वारं, सत्यधर्माय दृष्टिनिरोधक-

मावरणमपावृणु निवर्तयेति प्रथमः। हे पूषन् अन्तर्यामिन्! पुष्णाति स्वोपासकानिति सम्बोध्य साधको ब्रवीति—त्वं हिरण्मयेन पात्रेण आनन्दमयकोशेन, उक्तं च "हिरण्मये परे कोशे विरजं ब्रह्मनिष्कलम्। तच्छुभ्रं ज्योतिषां ज्योतिस्तद् यदात्मविदो विदुः॥" तेन पात्रस्वरूपेण कोशेन सत्यस्य सच्चिदानन्दरूपस्य ते तव मुखं स्वरूपं पिहितमावृतमस्ति, मे मम दर्शनाय साक्षात्कारणाय तदपगमयेति द्वितीयोऽर्थः॥१५॥

आदित्यमभिलक्ष्य परमपुरुषो निर्दिष्टस्तमेव पुनर्विशेषणान्तरैर्विशिनष्टि तथाऽहङ्ग्रहोपासनया अद्वैततत्त्वप्राप्ति ब्रुवन् तात्त्विकविषयं चोपसंहरन्नाह पूषन्नादि—

पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन् समूह। तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि योसावसौपुरुषः सोऽहमस्मि।१६।

हे पूषन्! पोषक! एकर्षे एकेन ऋषतीति, यम सर्वान् यमयतीति, सुवतीतिसूर्यः,आहयास्कः'सूर्यःसर्तेर्वा सुवतेर्वा स्वीय्यतेर्वा' इति। प्राजापत्य प्रजापतेरपत्य, स्वस्मिन् रश्मीन् व्यूह उपसंहर, तेजः समूह स्वस्मिन्नेकी कुरु, एवं प्रार्थिते भगवत्कृपामनुभूय उपासको ब्रवीति हे भगवन्! यत्ते कल्याणतमं रूपं स्वतः प्रकाशमानन्दस्वरूपं तदहं पश्यामि साक्षात्करोमि। नत्वेतद् याञ्चामात्रमपितु परमार्थत आवयोरैक्यमस्ति, यः असौ प्राणे हिरण्यगर्भेऽसौ पुरुषः, पुरिशयनात् पूर्णाद्वा,सोऽहमस्मि अहङ्ग्रहोपासनयापि ब्रह्माद्वैतोपलब्धिर्झटिति भवतीतिमहावाक्यपरमार्थः। दर्शितं च प्राक्, अकारेण शिवतत्त्वं, हकारेण शक्तिपदार्थोऽस्मिन्क्रियया शिवशक्तिभ्यां सार्धं जीवतत्त्वस्य च ऐक्यमनुमन्यते तदत्र समन्वितं भवति। उक्तं च स्पन्दशास्त्रे—"ज्ञानज्ञेयस्वरूपिण्या शक्त्या परमया-युतः। पदद्वये विभुर्भाति तदन्यत्र तु चिन्मयः॥" (स्पं०का०१८) तत्रैव जीवविषये प्रोक्तं "यस्मात्सर्वमयो जीवः सर्वभावसमुद्भवः। तत्संवेदनरूपेण तादात्म्यप्रतिपत्तितः। तेन शब्दार्थचिन्तासु न सावस्थान यःशिवः। भोक्तैव भोग्यभावेन सदा सर्वत्र संस्थितः। उक्तं च संवित्प्रकाशे "एतावतैव भेदोऽस्य यदहम्मानितात्मनि। सा चेद् विलीना त्वद्भक्त्या नष्टो भेदः स्थितैकता॥" ब्रह्मणा सार्धं शक्तितत्त्वस्य ब्रह्मरूपतामाह उक्तं

ललितासहस्रनामसु. "सच्चिदानन्दरूपा सा ब्रह्मात्मैक्यस्वरूपिणी । ध्यानध्यातृध्येयरूपा धर्माधर्मविवर्जिता।।" (ल०स०११३) तत्र कोमोहः, कः शोकः, एकत्वमनुपश्यत इति उपसंहृतं चात्र । अकारमारभ्य हकार-पर्यन्तं शब्दतत्त्वं तथा सोऽहं वादिनां योगिनां चास्मिन् वाक्ये संनिवेशो भवितुमर्हति महावाक्यत्वात्, तथा च वक्ष्यते द्वितीयभाष्ये । असाविति वचनव्यत्ययो वैदिकः, 'पुंसिभूम्नि असवः प्राणाः' इतिकोशात् ।।१६।।

मरणकाले कथं स्मर्तव्यमिति प्रकारमाह वायुरिति :—

वायुरनिलममृतमथेदं भस्मान्त ᳯ शरीरम् । ॐ३ क्रतोस्मर कृत ᳯ स्मर क्रतोस्मर कृत ᳯ स्मर ।१७।

—वातीति वायुः प्राणः अनिलं बाह्यवायुममृतं देवात्मकं प्रविशतु इति शेषः,वायूपलक्षितं सूक्ष्मशरीरमुत्क्रामतु । अथ प्राणत्यागा-नन्तरमिदं शरीरं स्थूलं भस्मान्तं दाहकर्मणा अथर्वप्रोक्तदिशा भस्मरूपं भवतु । ननु "सर्वसङ्गनिवृत्तस्य ध्यानयोगरतस्य च । न तस्य दहनं कार्यं नैव पिण्डोदकक्रिया । निदध्यात् प्रणवेनैव विले भिक्षोः कलेवरम् । प्रोक्षणं खननं चैव सर्वं तेनैव कारयेत् ।।" इति शौनकस्मृते-र्भस्मान्तं शरीरमितिवचनेन कथं संगच्छते, यतः श्रुतिस्मृत्योर्विरोधा-दितिचेन्न 'ये निखाता ये परोप्ता ये दग्धा ये चोद्धिताः' (अथर्व० १८-२-३४) इति प्रमाणेन स्मृतिवाक्यस्य श्रुतिमूलकत्वं सिद्धचति भस्मान्तमिति प्राधान्यनिर्देशेनोपपद्यते 'अग्निरितिभस्म जलमितिभस्म स्थलमितिभस्मेत्यादि श्रुतेश्च, संन्यासपद्धतौ च 'कुटीचरं तु प्रदहेत् बहूदकं जले क्षिपेत् । परमहंसं विले रक्षेद्, हंसन्तु विकीरयेत् ।' इतिप्रमाणात् सुसम्बध्यते, कुटीचरोपलक्षितत्वस्य भस्मीकरणस्यान्येषा-मपि यतिभेदानां खननादि विधानात् ग्रहणं न विरुद्धचते तस्मा-न्नास्ति श्रुतिस्मृत्योः विरोधः । हे ओंकारवाच्यरूपब्रह्माभिन्नादित्य ! हे आदित्याभिन्नसंकल्पात्मन् ! हे यज्ञरूप त्वदुपासकं मां स्मर, मम कृतं-विद्याविद्ययोः समुच्चयमसम्भूतिसम्भूत्यनुष्ठातारं वा स्मर, आदरार्थो-ऽभ्यासः । ओंकारस्मरणं गीतास्वपि "ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन् । यः प्रयाति त्यजन् देहं स याति परमां गतिम् ।।" १७।।

अविद्यया मृत्युं तीर्त्वा इति मन्त्रोक्तं तीर्त्वा, इति पदस्य सार्थक्यं कर्तुं कर्मसाधनीभूतमग्निं प्रार्थयते अग्ने नयेति —

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥१८॥

हे अग्ने ! अग्रणीत्वादग्रेनयतीति वा सुपथा शोभनेन-मार्गेण नय प्रापय, अस्मान् समुच्चयोपासकान् राये समृद्धये उपासना-फलप्राप्तये आवृत्तिरहितेन देवयानेन पथा इत्यर्थः । हे देव ? विश्वानि सर्वाणि वयुनानि कर्माणि उपासनानि च विद्वान् जानन् सन् त्वमस्मज् जुहुराणं कुटिलमेनः पापं यन्मनसा वचसा कायिकेन वा निमित्तेन भूतं मम निरोधकं युयोधि वियोजय ते तुभ्यं भूयिष्ठामधिकतरां नम उक्ति प्रणतिं विधेम कुर्महे इत्यर्थः ॥१८॥

(ईशावास्यमिति, एकानुवाके अष्टादश)

उपसंहारः

'विद्यां चाविद्यां च' इत्यारभ्य 'अग्ने नय सुपथे' ति यावत् कर्मविषय उपासनाविषयश्च मन्त्रैः प्रदर्शितः, तल्लक्ष्यभूतमादित्यमग्निं च प्रादर्शयत्, तेन स्पष्टं भवति यदस्य विषयस्य कर्मोपासनापर एवोपसंहारः, उपक्रमोपसंहारयोरैक्यं समीचीनमेव । षड्विंशब्राह्मणे समाम्नातं "ब्रह्म च वा सुब्रह्म अग्रे चास्ताम्, देवा अग्निं यज्ञेन कर्मणा पर्यगृह्णताग्निर्वै ब्रह्मासौ आदित्यः सुब्रह्म" ब्राह्मणा अग्निं यज्ञेन कर्मणा आदित्यमुपासनया च गृहीतवन्त इत्यर्थेनाऽपि कर्मोपासनयोः समुच्चयः सिद्ध्यति, पराविद्यया सार्धमपरायाः समुच्चयस्तु असङ्गत एव, वेदान्तदर्शने 'उपमर्दं च' इत्यादि सूत्रेषु प्रत्याख्यातश्चायं पक्षः । तस्मादयमपराविषयक एव विद्याविद्येति सम्भूत्यसम्भूति इति विभागः । इति ।

इति शुक्लयजुर्वेदान्तर्गतकाण्वशाखीयेशावास्योपनिषदः प्रकाशभाष्यं समाप्तम् ।

ईशावास्योपनिषत्

योगपक्षीय प्रकाशभाष्यसहिता।

पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ओं शान्तिः शान्तिः शान्तिः।

मङ्गलाचरणम्

प्राणापानसमायोगाच्छब्दतत्त्वसमाश्रयात्।
विज्ञानतत्त्वसापेक्षात् ब्रह्माद्वैतं प्रकाशते ॥१॥
व्याख्यानं विस्तरेणास्या एतदर्थानुगं मया।
प्रणिपत्य गुरुं देवं क्रियते चात्मशुद्धये ॥२॥

अध्यात्मशास्त्रे प्राणतत्त्वं शब्दतत्त्वं विज्ञानतत्त्वं चाध्यात्मविद्भिर्महर्षिभिः परमलक्ष्यसिद्धौ साधनत्वेन स्वीकृतम्। तेषु प्रधानं प्राणतत्त्वं तदाश्रित्यैव शब्दतत्त्वं विज्ञानतत्त्वं च स्वं स्वं रूपं लभेते। अतएव प्राणतत्त्वे सम्यक् परिचिते शब्दतत्त्वं विज्ञानं च स्वयमेव स्वस्वप्रयोजनं कुरुत अतः प्राणतत्त्व व्याख्यानार्थं आरम्भः। अद्यप्रभृति अस्या उपनिषदो व्याख्यानमेतदर्थकं नोपलभ्यते। साम्प्रतिकं व्याख्यानबाहुल्यमयोगिभिरेव निर्मितमस्ति, स्पष्टं सदपि सर्वैरुपेक्षितं यौगिकमर्थजातमतस्तदाविष्करणाय प्रयत्नः। यथा हि—"पूषन्नेकर्षे-यमेत्यादि"मन्त्रेण तथा वाजसनेयिसंहितापाठानुसारेण "हिरण्मयेन-पात्रेण" ······ "योऽसावादित्ये पुरुषः सोऽसावहमि"ति प्राणविद्यायां मुख्यत्वेनोपसंहार दर्शनात्, योऽसौ प्राणे आदित्ये च पुरुषः सोऽसा-वहमिति स्पष्टार्थत्वात्, तदर्थान् आविष्कर्तुं संक्षेपेण विव्रियन्ते क्वचिद् विस्तरेण च। यद्यपि पूर्वतनेभाष्ये उपनिषत् सिद्धान्तो निरूपित-स्तथापि प्राणविज्ञानवैशद्यार्थं समस्तो मन्त्रार्थोऽस्मिन्नेवार्थे योज्यते "सोऽहमस्मि" इति षोडशे मन्त्रभाष्ये सोऽहमिति पदेन प्राणविद्याया अपि ग्रहणस्याङ्गीकृतत्वादाह ईशावास्यादि :—

ॐ ईशावास्य मिदꣳ सर्वं यत् किंच जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद् धनम् ॥१॥

इष्ट इतीशः कर्त्रर्थेऽच् पचादित्वात् प्राणस्तस्यावास्यं निवासभूतं यत् किंच जगत् क्रियावद् वस्तुजातं जगत्यामस्मिन् संसारे सर्वेषु चराचरेषु गतिदर्शनात् परिवर्तनशीलत्वेन प्रत्यक्षमेतदित्यर्थः, इदं सर्वं समस्तमित्यर्थेन व्यापकोपलब्धिर्गम्यते। ननु वायुत्वेन प्रसिद्धं प्राणतत्त्वं तस्य जन्यत्वाच्च ईशत्वं कथमितिचेन्न वायुत्वावच्छिन्नमेव प्राणतत्त्वं तच्च ब्रह्म पञ्चतत्त्वादतिरिक्तं तस्याजन्यत्वमेव सर्वत्रोपनिषत्सु स्वीकृतं—यथा—"स ब्रह्मा स स्वरः शान्तः स शिवः परमः स्वराट्। स एव विष्णुः सः प्राणः स कालाग्निः स चन्द्रमाः" (कै० उ० १०-१०)। रहस्यपाठश्च स्वरोदये च—"स्वरे वेदाश्च शास्त्राणि स्वरे गान्धर्वमुत्तमम्। स्वरे च सर्वं त्रैलोक्यं स्वरमात्मस्वरूपकम्" (शि० स्व० १६)। स्वर एव प्राणतत्त्वम्। "प्राणस्तथानुगमात्" (वे० १-१-२८) इति सूत्रप्रमाणाच्च प्रश्नोपनिषदाख्यायिकया च सर्वेन्द्रियश्रेष्ठत्वेन ईशत्वमविरुद्धम्। ननु "एतस्माज्जायते प्राणः मनः सर्वेन्द्रियाणि च" इतिजन्यत्वाभिधानेन कथं ब्रह्मत्वं प्राणस्येति चेन्न, स्थूलसूक्ष्मभेदेन व्यवस्थोपपत्तेः। सूक्ष्मं ब्रह्मस्वरूपं स्थूलं पञ्चवृत्यात्मकम्, प्राणेन्द्रियसम्बादे प्रश्ने छान्दोग्ये वृहदाण्यके च प्राणश्रैठ्यं निर्दिष्टम्। प्राणाश्रितत्वेनेन्द्रियाणामपि प्राणेति संज्ञा, वृत्यात्मकं हि प्राणतत्त्वं कार्यं तस्यैवजन्यत्वाभिधानमित्यविरोधः। बुद्धिवृत्त्यवच्छिन्नं हि विज्ञानतत्त्वं तदपि प्राणाधीनं तद् यथा "यो प्राणे यो विज्ञाने" (सुबाल० ५) इति। प्राणानन्तर्यश्रवणात् प्राणादेव विज्ञानतत्त्वमपि स्वरूपं लभते अतो विज्ञानमपि प्राणाश्रितमेव, सुषुप्तौ विज्ञानस्य लयदर्शनात् तदापि प्राणस्य विद्यमानत्वम्। संवर्गविद्यायां प्रसिद्धमेतदन्येषां सर्वेषां मृत्युनाग्रस्तत्वात् प्राणस्यामृतत्वेनाभिधानममृतं हि ब्रह्मतत्त्वम्। विज्ञानस्याधीनत्वेन शब्दतत्त्वमपि तादृशमेव। ननु प्राणे स्थूलसूक्ष्मभेदः कथमिति चेन्न, तत्त्वसंनिवेशात् इत्यविरोधः, जल हिमोपलन्यायेन। पुनश्च प्राणतत्त्वं द्विधा विभज्यते, प्राणापानो-

दानव्यानसमानभेदैराद्यं, विज्ञानात्मकेन च द्वितीयं, द्वाभ्यामाभ्यां प्रकाराभ्यां शास्ति सर्वं जगत्, विज्ञानतत्त्वग्रहणार्थं ज्ञानेन्द्रियाणि प्रधानानि क्रियां गौणत्वेनापेक्षन्ते कर्मेन्द्रियाणि तु केवलं क्रियात्मकमेव रूपं गृह्णन्ति विज्ञानव्यतिरिक्तम्। तथाचाहुर्मैत्रायणीया: "स वा एष पञ्चधा आत्मानं विभज्य निहितो गुहायां मनोमय: प्राणशरीरो बहुरूप: सत्यसंकल्प आत्मेति, स वा एषोऽस्य हृदन्तरे तिष्ठन् कृतार्थोऽमन्यतार्थानसानि तत्त्वानीमानि भित्त्वोदित: पञ्चभीरश्मिभिर्विषयानत्तीति बुद्धीन्द्रियाणि यानीमान्येतान्यस्य रश्मय: कर्मेन्द्रियाण्यस्य हय: रथ: शरीरमित्यादि" (द्वि० प्र०)। तत्रैव च "एष हि खल्वात्मा ईशान: शम्भु:·····प्राण: हंसो विष्णुरित्यादि आम्नातम्" पं० प्र० मुण्डकेऽपि "तदेतदक्षरं ब्रह्म स प्राणस्तदुवाङ्मन:" (मु० २-२-२)। त्रिविधं विज्ञानं सहैवैक्य प्रदर्शनार्थायाम्नातम्। "हंस" इति नाम्नो विवरणं क्रियते प्राणाभ्यासे तस्य मुख्यत्वात् "हकारेण वहिर्याति, सकारेण विशेत् पुन:। हंसहंसेत्यमुं मन्त्रं जीवो जपति सर्वदा ।।" अस्यैव सोहमिति नामान्तरं यच्चोपनिषदि "सोहमस्मीति" स्वीकृतम्, हंसमन्त्रचिन्तनस्यैवात्र प्राधान्यमुपदर्शितम् सम्भूत्यसम्भूत्यविद्याविद्यादीनां अत्रैव पर्यवसानात् उक्तं च योगचूडामणौ, "प्राणविद्या महाविद्या यस्तां वेत्ति स वेदवित्" (योग चू. ३५)। तान्त्रिका: पञ्चधाविभक्तं प्राणतत्त्वंरूपकेण "पञ्चमुखो भगवान् शिव:" इति ब्रुवन्ति, स एव च गणानां पञ्चानां प्राणानामीश: गणेश इति गाणेशाश्च कथयन्ति। तद्वाचिकां पराप्रसादरूपां हंसेति महाविद्यां मन्यन्ते, सैव महाविद्या पञ्चप्राणक्रममालम्ब्य सौम्योग्रभेदेन दशधा भवति "प्राणा वै दशवीरा: प्राणानेवात्मन् धत्ते" इति श्रुते: (श० प० १२-८-१-१२)। दशमहाविद्येति नाम्ना व्यवह्रियते इति तेषां रहस्यम्। "हंस:शुचिषद्वसुरन्तरिक्ष सद्धोतेति" मन्त्रेण स्फुटं चैतत्तत्त्वम्। एतद् व्याख्यातृभि: ब्रह्मज्ञानोपलब्धिरस्याभ्यासेन मन्यते। स्वरोदये च "हकारो निर्गमे प्रोक्त: सकारेण प्रकाशकम्। हकार: शिवरूपेण सकार: शक्तिरुच्यते। शक्तिरूपस्थितेचन्द्रो वामनाडीप्रवाहक:। दक्षनाडी प्रवाहश्च शम्भुरूपो दिवाकर: ।।" इडापिङ्गलासुषुम्नाख्यास्तिस्रोनाड्य: प्राणप्रचारार्थं योगिभिर्मन्यन्ते, तासां

ब्रह्मा विष्णुः अग्निरिति क्रमेण देवाः, क्वचिदग्निस्थाने शिव इति दृश्यते, शिवोऽपि अग्निस्वरूप एव । उक्तं च "इडायां तु स्थितश्चन्द्रः पिङ्गलायां च भास्करः । सुषुम्ना शम्भुरूपेण शम्भोर्हंसस्वरूपता ॥" इत्थमेव वेदेऽपि दर्शनात् "सुषुम्नः सूर्यरश्मिश्चन्द्रमागन्धर्वस्तस्य नक्षत्राणि अप्सरसो भेकुरयो नाम" (य० अ० १८-४०) । सुषुम्नैव प्राण-प्रवाहस्य मुख्योमार्गः, सौषुम्नं मार्गमाश्रित्यैव सूर्यचन्द्रनक्षत्रादिषु प्राणः प्रवर्तते तत्र कृताभ्यासो योगी अनेकाः सिद्धिर्लभते । आह च पतञ्जलिः "भुवनज्ञानं सूर्ये संयमात्, चन्द्रे ताराव्यूहज्ञानम्, ध्रुवे तद्गति-ज्ञानम्" (वि० २६-२७-१२८) । सुषुम्नैव ध्रुवपदेन गृह्यते । आकाश-वायुतेजोजलपृथिवीति पञ्चतत्त्वरूपेण प्राण एव सर्वं शास्ति । नक्षत्राणां सन्निवेशस्तत्त्वक्रमेण चन्द्रसूर्ययोः सम्बन्धः स्वरज्ञैरेवं निर्दिश्यते— "धनिष्ठा रोहिणी ज्येष्ठाऽनुराधा श्रवणं तथा । अभिजिद् उत्तराषाढा पृथिवी तत्त्वमुच्यते । पूर्वाषाढ़ा तथा श्लेषा मूलमार्द्रा च रेवती । उत्तराभाद्रपत्तोयं तत्त्वं शतभिषा प्रिये । भरणी कृत्तिका पौष्यं मघा पूर्वा च फाल्गुनी । पूर्वाभाद्रपदा स्वाती तेजस्तत्त्वमिति प्रिये । विशा-खोत्तर फाल्गुन्यौ हस्तचित्रे पुनर्वसु । अश्विनी मृगशीर्षे च वायुतत्त्व-मुदाहृतम् । "चन्द्र सूर्ययोः स्वरूपं प्राणाव्यतिरिक्तमाह मन्त्रः "सहस्र-रश्मिः शतधावर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः" तथा "अथैतस्यापः शरीरं ज्योतीरूपमसौ चन्द्रस्तद् यावानेव प्राणस्तावत्यः आपस्तावा-नसौ चन्द्रः" (बृ० १-५-१३) । सर्वत्र विद्यमानमपि प्राणतत्त्वं नासिका-छिद्राभ्यां प्रवहति, "नसोः प्राण" इति श्रुतेः, "नासिकापुटयोः प्राणः पर्यायेण प्रवर्तते" एतदुक्तप्रकारैराध्यात्मिकाधिदैविकस्वरूपं च प्राणस्य ज्ञातं भवति । प्राणाभ्यासेन योगिनो वार्धक्यनिवृत्तिः, तत्प्रसादादेव च्यवनः पुनर्यौवनं लेभे, अश्विनीकुमारयोरेव प्रसादं लब्ध्वा । "प्राण-स्वरूपेण प्रसिद्धौ सूर्यचन्द्रमसौ एवाश्विनीकुमारौ" इति यास्कः । यथा-"सूर्याचन्द्रमसावित्येके" (नि०अ० १२-१७) । आध्यात्मिके विषये नासिकाछिद्रयोः प्रवहनशीलयोः प्राणापानयोः संज्ञा, सदा तौ कौमार-मेवानुभवतः । प्राणापानसंयमनेनैव यौवनप्राप्तिरित्याशयः पौराणिक-कथानामितिरहस्यज्ञाः । अश्विनीकुमाराभ्यां मधुविज्ञानं दध्यङ्ङथर्वण-

मुनिरुपदिदेश, स एवर्षिरस्या उपनिषदो मन्त्राणांमपि द्रष्टा अत एव तदेव तत्त्वमत्रापि सूत्ररूपेणोपदिष्टमितिसंगतिः। बृहदारण्यके चैतत्स्पष्टम्। प्राणविज्ञानमेवाध्यात्मिकमश्वमेधयज्ञं मन्यन्ते योगिनः "एष ह वा अश्वमेधो य एष तपतीत्यादिना बृहदारण्यके प्रसिद्धम् "प्राणस्येदं वशे सर्वं त्रिदिवे यत्प्रतिष्ठितम्। मातेव पुत्रान् रक्षस्व श्रीश्च प्रज्ञां विधेहि" इति प्राणस्याधिपत्यं श्रीप्रज्ञयोश्च प्रदातृत्वं श्रूयते। पुनश्च वेदे त्रिविधानां विज्ञानानां सरस्वतीरूपकेण प्रदर्शनं सङ्घटते "पञ्चनद्यः सरस्वतीमपि यन्ति सस्रोतसः सरस्वती तु पञ्चधा सो देशे भवत्सरित्" (य० ३४-११)। सस्रोतसः पञ्चनद्यः प्राणापानोदानसमानव्यानाख्या नदनशीला नवनादमया वर्णरूपाश्च "णद अव्यक्ते शब्दे" सरस्वतीं विज्ञानरूपां जलात्मिकामपियन्ति सङ्गतीभवन्ति। सा सरस्वती एव सरित् ज्ञानरूपा सर्वदा वहनस्वभावा आन्तररूपा वा देशे एकस्मिन्नधिष्ठाने ब्रह्मणि पञ्चधाऽभवत्। जलं प्राणरूपेण प्रसिद्धमत एवात्रोपन्यस्तं सरिद्रूपेण "आपोमयाः प्राणाः" इति श्रुतेः। इयमेव हंसवाहिनी सरस्वतीति वैदिकाः। वर्णव्यत्ययेन इयमेव सिंहवाहिनी पराशक्तिरिति शाक्ताः। तस्मात्प्राणतत्त्वमेव सर्वमित्यनेन व्याख्यानेन स्फुटीभवति। तेन प्राणेन त्यक्तेन भोगार्थं प्रदत्तेन भुञ्जीथाः यावदावश्यकं तावदेव लौकिकं वस्तुजातं वर्तेथा व्यर्थं मा सङ्गृहाणेतिभावः। कस्यस्विद्धनं भोगसाधनं मा गृधः कस्यापि धनं ग्रहीतुं तृष्णां मा कार्षीः इत्यर्थः। एष विधिः परतोऽन्यायपूर्वकग्रहणनिवृत्तिपरः। जीवोरागद्वेषात्मकबुद्ध्या सर्वमिदं ममैवेति कृत्वा व्यवहरति तेन संसरणं दुःखं शोकमोहौ च तं पुनस्तस्मान्निवर्तयन्ती श्रुतिरुपदिशति यन्ममैवेति बुद्धिं परित्यज्य सर्वं प्राणस्यैव ईशस्यैव, इति त्वया व्यवहर्तव्यमेवं कृते तव क्लेशाभावश्चसम्पद्यते अतएव सोऽहंभावनया एव यतितव्यमितिभावः।१।

जीवनरीतिमाह कुर्वन्निति :—

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्मलिप्यते नरे॥२॥

इह जगति कर्माणि, क्रियन्त इति कर्मणि गत्यात्या(?)-लोचनात्मकानि कुर्वन्नेव सम्पादयन्नेव शतं समा बहुकालपर्यन्तं जिजीविषेत् जीवनं कर्तुमिच्छेत्, "जीव प्राणधारणे" इतिस्मरणात् वैदान्तिकमतेऽयं मन्त्रः अर्थवादरूपः, योगमते विधिर्यतः "जिजीविषेत्" इति दर्शनात्, अस्मिन् मानवे देहे लब्धे कर्माणि लेपराहित्यसम्पादकानि प्राणवत् सर्वेषु व्यवहारेषु च प्रवृत्तिं कुर्वन्नपि यथा प्राणो निर्लिप्तः तद्वत् तद्विज्ञानं सम्पादयन्नेव वर्तेत इत्यर्थः। दीर्घजीवित्वे सत्येव विज्ञान साकल्यं सम्पाद्यं भवेत्। एवं त्वयि योगिनि कर्म न लिप्यते बन्धजन्यक्लेशादिप्रदातृत्वं (तस्य) न स्यात्, रागद्वेषपूर्वकानुष्ठितस्य कर्मण एव बन्धजनकत्वात्। "लिप्यते न स पापेन पद्मपत्रमिवाम्भसा" इतिप्रमाणात्। इतः अस्मादन्यथा प्रकारो नास्ति मोक्षस्येत्यभिप्रायः। उक्तविषये शास्त्रप्रमाणानि :—"कालस्य वञ्चनार्थं हि कर्म कुर्वन्ति योगिनः। गच्छन् तिष्ठन् सदाकालं वायुस्वीकरणं परम्। सर्वलोकप्रयोगेण सहस्रायुर्भवेन्नरः॥" (उ० गी० १-८)। तथा च "प्रकटप्राणसंचारं लक्षयेद् देहमध्यतः। इडापिङ्गलसुषुम्नाभिर्नाडीभिस्तिसृभिः क्रमात्। चन्द्रसूर्यसमाभ्यासं ये कुर्वन्ति सदानराः। अतीतानागतज्ञानं तेषां हस्तगतं भवेत्। वामे चामृतरूपास्याज् जगदाप्ययनं परम्। दक्षिणे चरभागेन जगदुत्पद्यते सदा। मध्यमा भवति क्रूरा दुष्टा सर्वत्र कर्मसु। सर्वत्र शुभकार्येषु वामा भवति सिद्धिदा। चन्द्रनाडीप्रवाहेण सौम्य–कार्याणि साधयेत्। सूर्यनाडी प्रवाहेण रौद्रकर्माणि कारयेत्। सुषुम्नायाः प्रवाहेण भुक्तिमुक्तिफलानि च॥" एवं स्वरज्ञानं सम्पाद्य कर्माणि कुर्वन् योगी निर्लेपतां गच्छति। अन्यच्च "यथाक्रतुर्लोके भवति" इति सिद्धान्तानुसारेण निर्लिप्तस्वभावं प्राणमनुचिन्तयन् साधकः कर्माण्यनुतिष्ठन्नपि तादात्म्यमेवोपगच्छति, प्राणनिर्लेपत्वमाहवेदः "सप्तऋषयः प्रतिहताः शरीरे सप्त रक्षन्ति सदमप्रमादम्। सप्तापः स्वपतो लोकभीयुस्तत्र जागृतो अस्वप्नसन्नसदौ च देवौ" (य० ३४-५५)। प्राणविज्ञानमनुभवन् योगी भयक्लेशादिद्वैतजन्यमतिक्रामति आह च श्रुतिः "सा पुनरेकैव देवता भवति मृत्युरेव अपमृत्युं जयति, नैनंमृत्युराप्नोति मृत्युरस्यात्माभवति"। ननु "न प्राणेन नापानेन

मर्त्यो जीवति कश्चन। इतरेण च जीवन्ति यस्मिन्नेतावुपाश्रितौ।।" इतिप्रमाणादन्येन जीवनं तत्कथं स्यादिति चेन्न—प्राणापानयोर्विशेष-विधानार्थत्वेनाविरोधात्। जीवनं तु स्वाभाविकया गत्या भवति बहिर्गतिनिषेधाय वचनम्। "प्राणापानगती रुध्वा प्राणायाम-परायणाः" इति स्पष्ट विधानात् प्राणस्वभावविज्ञानेन सार्धं कर्माणि कुर्वन्नपि दीर्घायुष्ट्वं निर्लेपत्वं च सम्पादयेदिति वाक्यार्थः। इदं सर्वं प्राणस्यैव भोग्यं तथाप्येतद्विज्ञानरहिता अज्ञाः स्वात्मीयमेव मत्वा दानादिसद्भावरहिता रागद्वेषात्मकेन भावेन युज्यन्ते, तेषां नरक-प्राप्तिर्भवति इति तान् निन्दत्यसुर्यानामेति :—

असुर्या नाम ते लोका अन्धेन तमसावृताः।
तांस्ते प्रेत्यापि गच्छन्ति ये के चात्महनो जनाः ॥३॥

सुष्ठुरान्तीतिसुरा न सुरा असुरास्तेभ्योऽर्हा असुर्याः, दानयज्ञाद्यात्मभावप्रकाशरहितत्वात् स्थानविशेषा रौरवादयश्च अतएवान्धेन तमसावृता नाना योनिगताः प्राणिनो वा तान् प्रेत्य मृत्वा अपि गच्छन्ति अपिर्लयार्थत्वं द्योतयति, के इति पृच्छायामुत्तरयति—ये आत्महनः आत्मज्ञानरहिता अमृततत्त्वमज्ञात्वा मरणं तेषां दुर्वारमेव। विषयवैराग्यार्थमुपदेशः "अभ्यासवैराग्याभ्यां तन्निरोधः" इत्युक्तत्वात्। असुरपदमस्मिन्नेवार्थेऽन्यत्रापि स्वीकृतम् "विश्वस्यारातेः उत द्विषो मर्त्यस्य" (सा० वे० आ० ६) अरातिपदमसुरपदं चाभिन्नार्थकम्। "तमेतमात्मानं विविदिषन्ति दानेन तपसा नाशकेन" इति मन्त्रद्वयेन योगसाध्यं तत्त्वं प्रदर्श्य अनेन च मन्त्रेण तत्प्रत्यनीकभूतमुपदिष्टमिति-सङ्गतिः ॥३॥

प्रसङ्गागतं व्यापकमात्मतत्त्वमाह अनेजदिति :—

अनेजदेकं मनसो जवीयो नैनद् देवा आप्नुवन् पूर्वमर्शत्।
तद् धावतो ऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥४॥

अनेजत् कारणरूपेण क्रियारहितमिति यावत् एकं भेदरहितम् अद्वैतं मनसो जवीयः मनस्यपि तेनैव मननसामर्थ्यसमर्पणात्

तस्मिन्नेव मातरिश्वा समष्टिकार्याभिमानी सूत्रात्मा वायुरतिप्रसिद्धः, अपो दधाति अबुपलक्षितानि पञ्चभूतानि धारयति, पूर्वोक्तचन्द्रसूर्याग्नितत्त्वानामपि कारणं वायुतत्त्वमेव, यथाहि "यदाग्निरस्तमेति वायुमप्येति,यदा सूर्योऽस्तमेति वायुमप्येति, यदा चन्द्रोऽस्तमेतिवायुमप्येति" (छा० ४-५-१)। सूत्रात्मा हि वायुः क्रियोपाधिमान् प्राणः, व्यक्तिरूपात्मकं कार्यं तस्मादेव भवति, सर्वस्य कार्यजातस्य नियामकः सूक्ष्मरूपोऽसौ। योगशास्त्रे जलतत्त्वस्यैव मुख्यत्वमुरीकृतमतएव अप् शब्दनिर्देशः। उक्तं च—"पृथिवी जले शुभे तत्त्वे, तेजो मिश्रं फलोदयम्। हानिमृत्युकरौ पुंसामशुभौ व्योममारुतौ। पृथिव्यां स्थिरकर्माणि चर कर्माणि वारुणे। तेजसि क्रूरकर्माणि मारणोच्चाटनेऽनले। पृथिवीजलाभ्यां सिद्धिः स्यान्मृत्युर्वह्नौ क्षयोऽनिले। नभसो निष्फलं सर्वं ज्ञातव्यं तत्त्ववेदिभिः। व्योम्नि किञ्चिन्न कर्तव्यमभ्यसेद् योगसेवनम्॥" इत्यादि। एनदात्मतत्त्वं प्राणाख्यं देवा इन्द्रियाणि नाप्नुवन् पराजेतुं समर्थानि नाभूवन्, देवा इन्द्रादयो वा न ज्ञातुं प्रबभूवुः, यतः पूर्वमर्शत् नाशरहितत्वेन अविनाशी अनादिनिधनमित्यर्थः। देवास्तु पश्चाद् भाविनः मृत्युना पराभूतत्त्वात्तेषाम्। तद्धावतो अन्यान् क्रियावतः सर्वान् अत्येति अतिक्रामति, तेनैव सर्वेषां सक्रियत्वात्, स्वयं च तिष्ठत् पूर्णं, स्वस्मिन्नन्यानपेक्षत्वात् क्रियासमर्पणस्येति ॥४॥

पुनश्च तदेव स्फुटं ब्रवीति तदेजतीति :—

तदेजति तन्नैजति तद्दूरे तद्वन्तिके।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः॥५॥

तदेव प्राणतत्त्वं सृष्टिकायार्थमेजति व्याप्रियते, सृष्टिकार्यस्य कादाचित्कत्वात् तन्नेजति, तद् दूरे अन्तिके च सर्वत्र पूर्णं विभुत्वात् तद् उ अस्य दृश्यमानस्य जगतः अन्तरं बाह्यञ्च व्याप्य स्थितमित्यर्थः।

सृष्टिमध्ये स्थितानां तत्त्वानां स्थितिमाह यस्त्वित्यादिना :—

यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विचिकित्सति॥६॥

यस्तु योगी सर्वाणि भूतानि पृथिवीजलाग्निवाय्वाकाशाख्यानि आत्मन्येव प्राणाख्ये तत्त्व एवारोपितानि अनुपश्यति अनुभवति तथा सर्वभूतेषु चात्मानमेव ओतप्रोतरूपेण पश्यति, ततस्तस्माज् ज्ञानान्न विचिकित्सतीति संशयविपर्ययादिबुद्धिदोषैर्नाभिभूयते। "तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः" इत्युक्तत्वात् भूतानां प्राणस्वरूपतामाह— "पृथिव्यां या देवता सैषा पुरुषस्यापानमवष्टभ्यान्तरा यदाकाशः स समानः वायुर्व्यानस्तेजो ह वा उदानः" (प्र० ३-८-९)। जलं प्राणस्वरूपमिति पूर्वमुक्तमेव, तद्विज्ञानफलं चाह—"य एवं विद्वान् प्राणं वेद न हास्य प्रजा हीयते अमृतो भवति" (प्र० ३-११)। "पृथिव्यापस्तथा तेजो वायुराकाशमेव च। पञ्चतत्त्वात्मकं विश्वं यो जानाति स पूजितः। पञ्चतत्त्वात्परं तत्त्वं तत्त्वातीतं निरञ्जनम्" योगिभिर्यथा तत्त्वानि चिन्त्यन्ते तदाह यतो लयस्योपदिष्टत्वात् अस्मिन् मन्त्रे तच्चिन्तनप्रकारकं लयानुगतिकम्। "लं बीजां पृथिवीं ध्यायेच्चतुरस्रां सुपीतभाम्। सुगन्धां स्वर्णवर्णाभां प्राप्नुयाद् देहलाघवम्। वं बीजं वरुणं ध्यायेत्तत्त्वमर्धं शशिप्रभम्। क्षुत्तृष्णादि सहिष्णुत्वं जलमध्ये च मज्जनम्। रं बीजमग्निजं ध्यायेत्त्रिकोणमरुणप्रभम्। वह्व्न्नपानभोक्तृत्वं जायते च सहिष्णुता। यं बीजं पवनं ध्यायेद् वर्तुलं श्यामलप्रभम्। आकाशगमनाद्यं च पक्षिवद्‌गमनं तथा। हं बीजं गगनं ध्यायेद् निराकारं बहुप्रभम्। ज्ञानं त्रिकालविषयमैश्वर्यमणिमादिकम्॥" इत्यादि प्राणतो येषां प्रादुर्भावो लयश्च भवति इति निश्चित्य लयचिन्तकयोगिनो अद्वैतनिष्ठा भवति। ननु किमिदं प्राणतत्त्वमिति चेन्न, वायुत्वावच्छिन्नं ब्रह्मैव प्राणतत्त्वमित्यर्थाद् ब्रह्मणः प्राणस्य वाय्ववच्छेदेन प्रतीयमानत्वात् वायुः प्राण इति। एवमेव विज्ञानावच्छेदेन ज्ञानं, शब्दत्वावच्छिन्नं शब्दतत्त्वमेतत्त्रिविधं ब्रह्मैव त्रित्वविवक्षायां भेदः परमार्थतस्तु एकमेवेति पूर्वमेवोपदर्शितम्। एवमभेदभावनां कुर्वन्नद्वैतनिष्ठो योगीभवति ॥६॥

तत्त्वज्ञानफलमाह यस्मिन्निति :—

यस्मिन्त्सर्वाणि भूतान्यात्मैवाभूद्विजानतः।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥७॥

यस्मिन्नद्वैतबोधकाले सर्वाणि भूतानि पूर्वोक्तानि विजानतः ज्ञानसहिताभ्यासवतो योगिन आत्मैवाभूत् स्वरूपमेव प्राप्तं तत्र तस्मिन् काले एकत्वमनुपश्यतः अद्वैतमनुभवतः को मोहः कः शोक अर्थात् शोकमोहयोरवसरो नास्ति निवृत्ताज्ञानत्वात्। ननु क्रियाज्ञानयोः कथं साहचर्यं यावता पूर्वपश्चिमसमुद्रयोरिव विरुद्धत्वात् तयोरितिचेन्न। निवृत्ताज्ञानस्य योगिनः आत्मनि युञ्जतः कर्तृत्वभोक्तृत्वबुद्धय-भावाज्ज्ञानेन सार्धं विरोधाभावः। अतएवाह—"ज्ञानं केचिद् वदन्त्यत्र केवलं तन्न सिद्धये। योगहीनं कथं ज्ञानं मोक्षदं भवतीह भोः। योगोऽपि ज्ञानहीनस्तु न क्षमो मोक्षकर्मणि। तस्माज्ज्ञानं च योगं च मुमुक्षुर्दृढमभ्यसेत् ॥" (यो० सि० १२-१३-१४)। अहं ब्रह्मास्मि इति ज्ञानस्य उभयत्र समत्वात्। ज्ञानिनस्तु केवलं शब्दवृत्तिमाश्रित्यज्ञानमेव परमलक्ष्यसिद्धौ यतन्ते, योगिनस्तु प्राणाभ्यासं पुरस्कृत्य शब्दवृत्या ज्ञानं प्रयुञ्जते। यतो ज्ञानस्याविद्यानिवृत्तिमात्रप्रयोजनत्वात्। ब्रह्मसाक्षात्कारस्तु योगेनैव सिध्यति। यथाह भगवान् श्रीकृष्ण उत्तरगीतायाम्—"अहं ब्रह्मेति मां ध्यायेदेकाग्रमनसा सकृत्। सर्वं तरति पाप्मानं कल्पकोटिशतैः कृतम्। (अ० २-३१)। अहं ब्रह्मेति नियते मोक्षहेतुर्महात्मनाम्। (अ० २-४५)। नाहं ब्रह्मेति जानाति तस्यमुक्तिर्न संशयः ॥" (अ० २-४८) इत्यादि। अत एव कर्तृत्वभोक्तृत्वबुद्धय-भावान्नास्ति ज्ञानेन सार्धं विरोधो योगस्य। मीमांसककर्मवादस्तु कर्तृत्वभोक्तृत्वाक्रान्तत्वाद् विरुद्धयते समसमुच्चयपदेनास्यैव निषेधः अयं तु अविरुद्ध एव ॥७॥

उक्तमुपसंहरन्नाह स पर्यगादिति :—

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ शुद्धमपापविद्धम्। कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥८॥

स प्राणतत्त्वापरपर्याय आत्मा पर्यगात् प्रेरकत्वेन रूपेण शुक्रं प्रकाशात्मकमकायं शरीरवर्जितम् अव्रणमत एव स्फोटादिरहित-

मस्नाविरं शिराबन्धरहितं शुद्धं निर्मलं अपापविद्धमसुरैः पापविद्धत्व-दोषरहितम् । उक्तं च एतत्सर्वं बृहदारण्यके प्रथमाध्यायस्य तृतीय-ब्राह्मणे । स कविः सर्वशब्दानामाश्रयः मनीषी मनीषा यस्यास्ति इति बुद्धितत्त्वाश्रयः परिभूः परितो भवतीति सर्वत्र स्वाभिन्नसत्तया वर्तमानः, स्वयंभूः स्वयं भवतीति स्वेतरसत्ताशून्यसत्तावानित्यर्थः । उक्तं च—"तद्यथा अग्निर्नामकस्मिश्चिद् दाह्ये नान्यत् किञ्चिदुपादत्ते तेन धक्ष्यामीति स्वयमेव दहति एवमयमात्मानुपादाय ज्ञातानुपादायकारी स्वात्मनैव सर्वकरः ।" इति भट्टोत्पलेन षाड्गुण्यविवेके च "नहि बोधो विचित्रार्थनिर्माणेऽन्यमपेक्षते । संकल्पादेव यो रूपसहस्राणि सृजत्यजः।" इत्यादि । एतेनाभिन्ननिमित्तोपादानकारणत्वमवगम्यते, 'ये केवलं निमित्तकारणं स्वाभाविकभेदभिन्नं परतत्त्वं मन्यन्ते तेषां मतमाक्षिप्तमागमरहस्ये "येपीश्वरं व्यपदिशन्ति निमित्तहेतुं तैरर्पितः स्थलजलाञ्जलिरीशितायै । अन्याङ्गनोपगमनेन वशीकृतस्य कामीश्वरस्थितिममी वत सङ्गिरन्ते ।।" इति याथातथ्यतोऽर्थान् व्यदधात् शाश्वतीभ्यः समाभ्यः कालतत्त्वं निमित्तीकृत्य सर्वान् व्यावहारिकान् व्यधात् अकल्पयदित्यर्थः । क्लीबान्तपदं तत्त्वशब्दान्तं कृत्वा योज्यम् ।।८।।

सम्भूत्यसम्भूत्योः समुच्चयं प्रतिपिपादयिषुः प्रत्येकमुपासनं पृथगनुष्ठानरूपं निन्दति अन्धन्तम इति । ननु उपनिषत्पाठे प्रथमं विद्याविद्ययोर्ग्रहणं कथं सङ्गच्छते वाढम्—विषयप्राधान्यमवलम्ब्य संहिताक्रम एतयोर्ग्रहणं यतो विद्याविद्ययोर्विषयाधीनत्वात् । उपनिषत्क्रमे तदभावात् विद्याविद्ययोः प्राथम्यम् ।

अन्धन्तमः प्रविशन्ति येऽसम्भूतिमुपासते ।
ततो भूय इव ते तमो य उ सम्भूत्याᳬ रताः ।।९।।

ये जना असम्भूतिं सम्यग्भूतिरैश्वर्यं सम्भूतिरणिमाद्याः सिद्धयः यँल्लब्ध्वा योगिन ऐश्वर्यवन्तो भवन्ति, तद्भिन्ना असम्भूतिः कारणस्वरूपं प्राणतत्त्वमुपासते ध्यायन्ति, तेऽन्धन्तमोऽन्धकारं क्लेशं

प्राप्नुवन्ति निराधारत्वात् । ये च सम्भूत्यां रता ये समानोदानरूपामेवोपासतेऽसम्भूत्युपासकेभ्योऽपि भूय इव अधिकतरमेव तमोऽन्धकारं प्रविशन्ति जन्यत्वात्तस्याः फलस्यानित्यत्वमवश्यम्भावि इति भावः । पुनर्जननमरणमेव ते गच्छन्ति आह च योगशास्त्रम् "उदान जयाज् जलपङ्ककण्टकादिषु असङ्ग उत्क्रान्तिश्च, समानजयाज् ज्वलनम्" इत्यादयो वर्णिताः सिद्धयः । तेसमाधावुपसर्गा व्युत्थाने सिद्धयः अत एव सम्भूतिचिन्तनजन्यफलस्य योगोद्देश्याद् बहिर्भूतत्वादधिकं तमस्त्वं सङ्गच्छते ॥९॥

अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात् ।
इति शुश्रुम धीराणां येनस्तद् विचचक्षिरे ॥१०॥

अन्यदेवाहुः सम्भवादन्यदेव फलं चमत्कारात्मकमाहुः कथयन्ति, असम्भवात् अन्यदेव कारणतत्त्वबोधात्मकं फलमाहुः कथयन्ति, इति धीराणां योगतत्त्वविदां निर्णयं वयं शुश्रुम श्रुतवन्तः, ये नः अस्मभ्यं विचचक्षिरे व्याख्यातवन्त : ॥१०॥

उभयोः समुच्चयं प्राह सम्भूतिं चेति :—

सम्भूतिञ्च विनाशञ्च यस्तद् वेदोभयथं सह ।
विनाशेन मृत्युं तीर्त्वा सम्भूत्यामृतमश्नुते ॥११॥

असम्भूतिं कारणं, विनाशं कार्यं सम्भूतिमुभयं सह वेद यः अङ्गाङ्गिभावेन उपास्ते, विनाशेन सम्भूत्या मृत्युं जननमरणात्मकं तीर्त्वा, असम्भूत्या कारणरूपप्राणतत्त्वेनामृतं मोक्षमश्नुते, उभयं साहाय्यं प्राप्य प्रत्येकमुपासनाजन्यं न्यूनत्वं जहातीतिभावः ॥११॥

अन्यथा व्याख्यायते पूर्वोक्तमन्त्रत्रयं, यतोऽन्यार्थस्यापि सम्भवात्— सम्भूत्यसम्भूतिपदे न कस्मिंश्चिदर्थे रूढे अतएव सर्वैर्व्याख्यातृभिर्व्युत्पत्त्या-एवानयोर्यौगिकार्थस्य स्वमतपोषकत्वमभिमन्यते । अतोऽत्र यौगिकार्थ-मनुसृत्य शब्दतत्त्वेऽपि योजयितुं शक्यते, अन्ते ओं खं ब्रह्मेति उपसंहारेण ऐक्यात् । सम्भूतिः सम्भवनं वर्णादिरूपेणाविर्भावस्तद्भिन्ना असम्भूतिः

पराख्या वाणी शब्दब्रह्मेति यावत् तदन्तर्गतं नादतत्त्वं च सर्वेषामर्थाना मादिकारणभूता सर्वार्थव्यञ्जिका स्फोटरूपा तां ये उपासते ते अन्धन्तमः प्रविशन्ति व्यक्तशब्दवदाश्रयरहितत्वात्। उक्तं च "अघोषमव्यञ्जनमस्वरं चाप्यतालुकण्ठोष्ठमनासिकं च। अरेखजातं परमूष्मवर्जितं तदक्षरं न क्षरते कथंचित्।" (उ० गी० १-५२ अमृत०उ० ३)। 'ओमित्येकाक्षरं ब्रह्म' इति गीता। तथा ये तु सम्भूत्यां रताः शब्दानां व्यक्तिमेवोपासते शास्त्रजालात्मिकां ते ततोऽसम्भूत्युपासकेभ्योऽपि अधिकतरं तमः प्रविशन्ति। "शास्त्रगर्तेषु मुह्यताम्" योगवाशिष्ठे च "अन्यथा शास्त्रगर्तेषु लुठतां भवतामिह"। (३ स० ७ श्लो०, वैराग्यप्रकरणे) इति निषेधात्, नामरूपात्मक मिथ्याभूत विषयत्वात् ॥९॥

सम्भवात् व्यक्तशब्दोपासनात् अन्यदेव फलमाहुः कथयन्ति, पुनरावृत्तिजनकम् असम्भवादव्यक्तशब्दोपासनादव्यक्तस्वरूपं ज्ञानात्मकं फलमाहुः, ये धीराऽस्मभ्यमुक्तवन्तस्तेषां वचो वयं श्रुतवन्तः ॥१०॥

सम्भूतिं विनाशं च यः साधक उभयं सह तद् वेद विनाशेन व्यक्तशब्देन मृत्युं विनाशशीलमेतज्जगत् तीर्त्वा सम्भूत्या शब्दब्रह्मसाक्षात्कारेण अमृतं मोक्षं परतत्त्वमश्नुते लभते। "शब्दब्रह्मातिवर्तते, शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति" इति शब्दब्रह्म च 'ओं' इति सम्भूतिपदेन शिरः पल्लवादियुक्ता मन्त्रा अपि ग्राह्या, देवतास्वरूपबोधकत्वेन प्रसिद्धास्तेषामपि व्यक्तत्वात्। शब्दब्रह्मैव सम्भूत्यसम्भूतिरूपेण विभक्तम्। अत एव विभागेन विज्ञाय समुच्चित्य च अमृतत्वमिति तात्पर्यम्। एतज्जन्या एव सविकल्पनिर्विकल्पसमाधयः शब्दतत्त्वावच्छिन्नं ब्रह्मैव कार्यं कारणं चोपाधिवशेन व्यवह्रियते इति शाब्दिकाः, तदुक्तं वाक्यपदीये "अनादि निधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥" (वा० प० १)। 'शब्दस्यानारोपितं यद्रूपं तदेव शब्दतत्त्वं ब्रह्म। यत्वारोपितं रूपं न तद् ब्रह्म।' (परमलघुमंजूषाया रत्नदीपिका)। सम्भूत्यसम्भूतिविषये उक्तमुत्तरगीतायाम्—"सालम्बस्याप्यनित्यत्वं निरालम्बस्य शून्यता। उभयोरपि दोषत्वात् कथं ध्यायन्ति

योगिनः।" (अ० १-३६) । उत्तरमस्य तत्रैव—"हृदयं निर्मलं कृत्वा चिन्तयित्वाप्यनामयम्। अहमेव इदं सर्वमिति पश्येत् परं सुखी" (अ०१-४०) । यद्यपि समुच्चयं तत्र नाकथयत्तथापि "सोऽसावहम्" इत्यनेन मन्त्रांशेन सार्धं समुच्चयात् श्रुतिस्मृत्योः सङ्गतिः । अग्रिमेण विद्याविद्याप्रतिपादकेन मन्त्रेण शब्दविषयकं व्याख्यानं सुसम्बध्यते यतो विद्याविद्ययोः शब्दपूर्वकत्वात् । उक्तं च भट्टकल्लटेन "स्वरूपावरणे चास्य शक्तयः सततोद्यताः । यतः शब्दानुबोधेन विना न प्रत्ययोद्भवः।" (स्व० ४७) । हरिरप्याह "न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते । अनुविद्धमिवज्ञानं सर्वं शब्देन भासते ।।" (वा० पदीय १२४) इति ।।११।।

ज्ञानयोगयोः समुच्चयं ब्रुवन् पार्थक्येन प्रत्येकं निन्दति अन्धन्तम इति :—

अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते तमो य उ विद्यायाꣳ रताः ।।१२।।

ये साधका अविद्यां न विद्यामविद्यां विद्याभिन्नविद्यासदृशीं योगविद्यामुपासते केवलां ज्ञाननिरपेक्षां सादृश्यार्थे नञ् प्राणाभ्यासरूपां सोऽहं विद्यां चिन्तयन्ते तेऽन्धन्तमः प्रविशन्ति वास्तविकीं सिद्धिं नोपयन्ति इत्यर्थः । ये च विद्यां केवलां सोऽहं रूपाम् अहं ब्रह्मास्मि इति ज्ञानरूपां प्राणाभ्यासवर्जितामुपासते ध्यायन्ति ते ततो योगिभ्योऽपि भूय इवाधिकमेवान्धन्तमः प्रविशन्ति चित्तविक्षेपनिवृत्त्यभावात्, दम्भाचरणसम्भवाच्च । आह च योगशास्त्रं ज्ञानयोगयोः साहचर्यं "ज्ञानेनैव विना योगो न सिध्यति कदाचन । जन्मान्तरैश्च बहुभिर्योगो ज्ञानेन लभ्यते । ज्ञानं तु जन्मनैकेन योगादेव प्रजायते। योगेन रहितं ज्ञानं न वै मोक्षाय कल्पते।" इत्यादि(यो० शि० ५२-५३) । गीतायां च "यं सन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव । एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् । 'एकं सांख्यं च योगं च' 'तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ।।' इति ।।१२।।

अन्यदेवाहुर्विद्ययाऽन्यदाहुरविद्यया ।
इति शुश्रुम धीराणां येनस्तद् विचचक्षिरे ॥१३॥

विद्यया ज्ञानेन ब्रह्मस्वरूपबोधात्मकमविद्यानिवृत्तिपरमन्यदेव फलमाहुः कथयन्ति तथा अविद्यया योगेन अन्यदेव फलं चित्तवृत्तिनिरोधात्मकेन प्राणाभ्यासेन मृत्योस्तरणात्मकमाहुः कथयन्ति इति धीराणामुभयतत्त्वविदां वचो वयं शुश्रुम ये नः अस्मभ्यं विचचक्षिरे व्याख्यातवन्तः ॥१३॥

प्रत्येकमुपासनाजन्यं न्यूनत्वं समुच्चयेन परिहरति विद्यां चाविद्यां चेति :—

विद्यां चाविद्यां च यस्तद्वेदोभयथं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ॥१४॥

यः साधको ज्ञानं योगं चोभयं सम्मिलितं सह अङ्गाङ्गिभावेन योगस्य ज्ञानस्य च वेद जानाति स अविद्यया योगेन मृत्युं तीर्त्वा जननमरणं जराव्याध्यादिं वातिक्रम्य, तथाचाहुः—"नासौ मरणमाप्नोति पुनर्योगबलेनच ।" (यो० शि० ४५)। "न तत्र रोगो न जरा न व्याधिः प्राप्तस्य योगाग्निमयं शरीरम्" इति श्रुतेः । विद्यया ज्ञानेन मोक्षमश्नुते लभते "ज्ञानादेव कैवल्य" मितिश्रुतेः । उक्तं चेश्वरगीतासु "योगात्सञ्जायते ज्ञानं ज्ञानाद् योगः प्रवर्तते । योगज्ञानाभियुक्तस्य नावाप्यं विद्यते क्वचिद् ॥" (अ० २-४२) । प्रथमे भाष्ये विद्याविद्याविषये यदुक्तं तन्नात्र विरुध्यते विषयभेदात् । शब्दाभ्यासेन प्राणाभ्यासेन च नित्यं दिव्यं मन्त्रात्मकं शरीरं योगिनो भवति, यत्र सर्वाः सिद्धय आविर्भवन्ति इति सङ्क्षेपः ॥१४॥

सर्वं कार्यजातं पञ्चतत्त्वात्मकं तस्य च निर्वाहकं प्राणतत्त्वमिति पूर्वोक्तेन प्रमाणजातेन निरूपितम् "तस्मिन्नपो मातरिश्वा दधाति" इति मन्त्रांशेन अप्पदेन पञ्चतत्त्वानामुपलक्षणं स्वीकृतम् तथापि अप्शब्दो मुख्यया वृत्या जलभूमी एवाभिधत्ते, अन्तरिक्षनामसु "आपः पृथिवी" इति यास्केन सह पठितम्, एतेन उभयोरैक्याभिप्रायेण

मन्त्रकृता एक एव अप्शब्दो व्यवहृतः न पृथङ्निर्दिष्टः। इदानीं अवशिष्टं तत्त्वत्रयं मन्त्रत्रयेणोपदिश्यते पार्थक्येन तत्त्वानां कार्यपरिचयाय प्रायेण पृथिवीजलयोः प्रयोगः सिद्धिष्वेव योगिभिः क्रियते। एषां त्रयाणां वाय्वग्निव्योम्नां मोक्षविषये इति पृथङ्निर्देशप्रयोजनम्। पृथ्वीजलयोः कार्यं प्रायेण एकमेव अत एव तन्त्रेण 'अप्' शब्दप्रयोगः। तत्त्वव्यवस्थायामाह—"इडा च सिद्धिदा प्रोक्ता योगाभ्यासादिकर्मसु। तत्राऽपि वर्जयेद् वायुं तेज आकाशमेव च।" (शि० स्व० ११३)।

शब्दतत्त्वस्मरणप्रकारमाह वायुरिति :—

वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम्।
ॐ क्रतो स्मर क्लिबे स्मर कृतꣳ स्मर ॥१५॥

वायुः प्राणतत्त्वमनिलं न लीयत इत्यनिलमत एवामृतमिदमेव प्राणतत्त्वं, वायुतत्त्वन्तु तत्प्रतीकभूतम्। अथेदं शरीरं भस्मान्तं मृतं मृतस्य भस्मीभावविधानात् "मघवन् मर्त्यं वा इदं शरीमात्तं मृत्युना" इतिश्रुतेः। हे क्रतो उपासक "यथाक्रतुः पुरुषः" इति श्रुतेः ओमिति स्मर चेतसा चिन्तय यथा हि "ओंकारध्वनिनादेन वायोः संहरणान्तिकम्। निरालम्बं समुद्दिश्य यत्र नादो लयं गतः॥" (उ० गी० १-४३)। अर्थात् अमृततत्त्व चिन्तनोद्देश्यकं प्रणवविज्ञानमित्यर्थः। शरीरानित्यत्वेन वैराग्यं चिन्तनेन चाभ्यासः सर्ववृत्तिनिरोधात्मक उपदिष्टः। क्लीबे स्मर क्लृप्तं यन्मोक्षाख्यं फलं तस्मै स्मर स्मरणं कुरु, कृतं यत् कर्तव्यं ज्ञानयोगाभ्यासरूपं विद्याविद्या समुच्चयरूपं स्मर; मनसा चिन्तय, स्मर त्रितयेन सर्वेषां मोक्षसाधनानां सङ्ग्रहः। ननु हंसः सोहमितिमन्त्राभ्यास एव पूर्वं प्रतिज्ञातः, इदानीमोमिति कथमुच्यते इति चेन्न-ऐक्यात्। उक्तं च "प्रतिलोमात्मके हंसे वक्ष्यामि प्रणवोद्भवम्। तव स्नेहाद् वामदेव सावधानतया श्रृणु। व्यञ्जनस्य सकारस्य हकारस्य च वर्जनात्। ओमित्येव भवेत् स्थूलो वाचकः परमात्मनः॥" तस्मान्नास्ति भेदः। क्रतो इति विषये आह कात्यायनः "क्रतो इत्यादिभिस्त्रिभिर्यजुर्भिरन्ते

यज्ञान् योगी स्मारयति' "योगी" इत्यनेन योगविषयिकेयमुपनिषदिति स्पष्टं भवति ।१५।

ज्ञानिनां कर्मिणां च स्वस्वोद्देश्यसिद्धये मार्गद्वयं वेदेषु प्रसिद्धं यथा "द्वे सृती अशृण्वं पितृणामहं देवानामुत मर्त्यानाम्" (य० १९-४७)। तयोः प्रापकः समानरूपेणाग्निः "अग्निर्देवानां दूतः" इति श्रुतेः। सूर्यद्वारेण सम्बद्धो देवयानमार्गश्चन्द्रेण पितृयाण इति सूर्यद्वारेण गतस्य क्रममुक्तिः फलमनावृत्तिलक्षणम् चन्द्रेण पुनरावर्तनम्। यथाह श्रुतिः "तद्येह वै तदिष्टापूर्ते कृतमित्युपासते ते चन्द्रमसमेव लोकमभिजयन्ते त एव पुनरावर्तन्ते तस्मादेते ऋषयः प्रजाकामादक्षिणं प्रतिपद्यन्ते एष ह वै रयिर्यः पितृयानः। अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययात्मानमन्विष्यादिति अभिजयन्त एतद् वै प्राणानामायतनमेतदमृतमेत्परायणमेतस्मान्न पुनरावर्तन्ते इत्येषनिरोधः।" (प्र०१-१०) तत्त्वानां सन्निवेशविशेषोऽपि प्राणतत्त्वात्मक इति पूर्वमुक्तमत एव "तेज एवोदानः स एव लोकान्तरं प्राणिनं नयते, अथैकया ऊर्ध्वोदानः पुण्येन पुण्यलोकं नयति पापेन पापमुभाभ्यां मनुष्यलोकम्।" (प्र०उ० ३-७)। "ऊर्ध्ववाही च यः क्रूरकर्मकारी स तैजसः।" इत्युद्दिश्य आह श्रुतिरग्ने नयेति :—

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥१६॥

हे अग्ने! अग्रे नयत इत्यग्निः "अग्निर्देवानामभवत् पुरोगाः" (य० वे०२९-३६)। अङ्गं नयतीति वा तादात्मीकृत्य साधकं प्रापयतीत्यर्थः। सुपथा आवृत्तिरहितेन देवयानमार्गेण अस्मान् सगुणतत्त्वनिष्ठान् योगिनो राये समृद्धये नय प्रापय। उक्तं च "अग्ने पवस्व स्वपा अस्मे वर्चो दधद् रयिं मयि पोषम्" इति मन्त्रान्तरम्। यद्यपि रयि शब्दो हि चन्द्रे प्रसिद्धश्चन्द्रेण प्राप्यः पितृयान आवृत्तिफलकस्तथापि सुपथेति विशेषणेन व्यवच्छेद्यो यतश्चन्द्रलोकस्यापि प्रापकोऽग्निरेव। हे देव! द्योतनस्वरूप! विश्वानि समस्तानि वयुनानि प्रज्ञानानि विद्वान्

जानानः यतोऽन्तर्यामिरूपेणसर्वत्रासि त्वमित्यर्थः "प्रतत्ते शिपिविष्टाना-मार्यः शंसामि वयुनानि विद्वान्।" (ऋ० ५-६-२५-५)। इति मन्त्रा-न्तरम्। अस्माकं यज्जुहुराणं मार्गावरोधकं तत्त्वाबोधनिमित्तमेनः पापं युयोधि नाशय, ते तुभ्यं भूयिष्ठामधिकतरां नम उक्तिं विधेम कुर्म इत्यर्थः ॥१६॥

गतेन मन्त्रेण देवयानप्राप्यं तत्त्वमुपदिष्टं तच्च सगुणविद्या-रतानां योगिनां फलं चन्द्रसूर्याग्निरूपाणां प्राणतत्त्वानां त्रिविधनाडी-प्रवाहस्थानां बाह्यान्तरभेदभिन्नानां स्वराणां च कार्यं प्रदर्शितम्। एतत्पूर्णाद्वैतज्ञानरहितानामेव यतो भोगमात्रार्थे ब्रह्मणा सार्धं तेषां साम्यं भवति, ते कालान्तरेणाद्वैतमवगच्छन्ति इत्यर्थो देवयानमार्गस्य श्रुतिनिर्दिष्टः। इदानीं सद्योमुक्तिविधायकं साक्षात् अद्वैतबोधकं गत्यागतिवर्जितं तत्त्वमुपदिशन्नाह हिरण्मयेनेति :—

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।
योऽसावादित्ये पुरुषः सोऽसावहम्। ॐ खं ब्रह्म ॥१७॥

हिरण्मयेन प्रकाशमयेन पात्रेण पिवत्यनेनेति पात्रं तेन पात्रेण परमामृतस्वरूपस्य ब्रह्मणः प्राप्तिसाधनत्वेनोपमितः सूर्यः स बाह्यः प्राणः "आदित्यो ह वै वाह्यः प्राणः" (प्र० ३-८)। सत्यस्या-पिहितं मुखं परमसत्यस्वरूपस्य सर्वकारणस्य ब्रह्मतत्त्वस्य मुखं स्वरूपं पिहितमाच्छन्नमस्मिन् शरीरे च सूर्यस्वरेण अर्थात् सूर्यात्मक प्राणादेव ब्रह्मावबोद्धुं शक्यम्। योऽसावादित्ये पुरुषः सोऽसावहम् यः असौ प्राणतत्त्वे कार्ये हिरण्यगर्भे आदित्ये वाह्ये प्राणे पुरुषःपूर्णत्वात् पुरुषोऽसौ मम शरीरे प्राणतत्त्वे अहं अहंरूपेण साक्षात्कर्तव्य इत्यर्थः। व्यवहितेन तदा अस्मच्छब्दं संयोज्य सोऽहमिति विभावनीयम्। आह च शास्त्रम्— "हकारेण बहिर्याति सकारेण विशेत् पुनः। हंस हंसेति मन्त्रोऽयं सर्वै-र्जीवैश्च जप्यते। गुरुवाक्यात् सुषुम्नायां विपरीतो भवेज्जपः। सोऽहं सोऽहमितिप्रोक्तो मन्त्रयोगः स उच्यते। प्रतीतिर्मन्त्रयोगाच्च जायते पश्चिमे पथि। हकारेण च सूर्यः स्यात् सकारेणेन्दुरुच्यते। सूर्यचन्द्रमसोरैक्यं हठ इत्यभिधीयते। हठेन ग्रस्यते जाड्यं सर्वदोष-

समुद्भवम् । क्षेत्रज्ञः परमात्मा च तयोरैक्यं यदा भवेत् । तदैक्ये साधिते ब्रह्मन् चित्तं याति विलीनताम् । पवनः स्थैर्यमायाति लययोगोदये सति । लयात्संप्राप्यते सौख्यं स्वात्मानन्दं परं पदम् ।।" इदं योगत्रयं क्रमेणात्रैव पर्यवसीयते । चतुर्थो राजयोगः शिवशक्त्याश्रितः सोऽप्यत्रैव समाप्यते तल्लक्षणमाह—"योनिमध्ये महाक्षेत्रे जपाबन्धूकसन्निभम् । रजो वसति जन्तूनां देवीतत्त्वं समावृतम् । रजसो रेतसो योगात् राजयोग इति स्मृतः । अणिमादि पदं प्राप्य राजते राजयोगतः । प्राणापानसमायोगो ज्ञेयं योगचतुष्टयम् ।।" (यो० शि० १३० मन्त्रमारभ्य १३८ पर्यन्तम्) बहिर्वृत्तिरपानोऽन्तर्वृत्तिः प्राणस्तयोर्विच्छेदः समायोग इति चतुर्णां योगानां संनिवेशः । अहमिति पदं महामाहेश्वरैरेवं व्याख्यायते "अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः । हकारः शक्तिरूपोऽसौ विमर्शाख्यः प्रकीर्तितः ।।" इत्यनेन शिवशक्त्यात्मकमुभयोस्तत्त्वयोरैक्यमनुसंधातव्यम् राजयोगात्मकम् । (ओं खं ब्रह्म) । अहमित्यत्र अकारमारभ्य हकारपर्यन्तं वाचकतत्त्वमपि संक्षिप्तेन रूपेण ज्ञातव्यम् । एतद् रहस्यमाह वेदः "गौरीर्मिमाय सलिलानि तक्षती एकपदी द्विपदी सा चतुष्पदी अष्टपदी नवपदी वभूवुषी सहस्राक्षरा परमे व्योमन्" । (ऋ० सं० १-१६४-४१) गौरीः वाक् कुण्डलिनी महाशक्तिः गौरवर्णत्वाद् गौरीस्तदुक्तं—"नीवारशूकवत्तन्वी पीताभास्वत्यणूपमा । तस्याः शिखायामध्ये तु परमात्मा व्यवस्थितः । पाशबद्धो भवेज्जीवः पाशमुक्तः सनातनः । तुषेणबद्धो व्रीहिः स्यात्तुषाभावेन तण्डुलः । परं ब्रह्म स्वयं चात्मा साक्षान्नारायणः स्मृतः ।।" (ना० ता०) सलिलानि तक्षती सलिलानि स्वाधिष्ठानोपलक्षितपञ्चतत्त्वसहितानि षट्चक्राणि बोधव्यानि, तक्षती भिन्दती सती मिमाय शब्दायते प्रथमं मूलाधारे एकपदी ओंकाररूपा. स्वाधिष्ठाने द्विपदी सोऽहंरूपा "सा" इति पदेन, तृतीये मणिपूरे त्रिपदी भूर्भुवःस्वरिति, अनाहते ओं भूर्भुवःस्वरिति चतुष्पदी, आह च यास्कोमुनिः—"ओंकारो महाव्याहृतयश्चेत्यार्षम्", विशुद्धे अष्टापदी 'अवर्ग कवर्ग चवर्ग टवर्ग तवर्ग पवर्ग यवर्ग शवर्गरूपा, आज्ञायां नवपदी नवनादमयी, परमेव्योमन् सहस्रारे सहस्राक्षरा बभूवुषी भवति इति

मन्त्रार्थः। ओं खं ब्रह्मेति यजुषा प्रदर्शितः। यतः अ शब्दस्याकाशव्यञ्जकत्वात् ओं ब्रह्मशब्द ब्रह्मखोपलक्षितं ध्येयं वाचकात्मकं पूर्वव्याख्यातसमस्तमातृकामण्डलस्य नादतत्वस्य च कारणरूपं ब्रह्मप्रतीकभूतमेतदुक्तमन्त्राभिप्रायः। परमं व्योम चात्रेदमेव सोऽहं चिन्तनेन यदोद्बुध्यते कुण्डलिनी तदा एतत्सर्वमनुभूयते योगिभिः। सम्भूत्यसम्भूतिचिन्तनस्य अत्रैव पर्यवसानम्। जीवब्रह्मणोरैक्यमद्वैतरूपमपि "सोऽहं" इतिपदेन विज्ञानाद्वैतं विद्याविद्ययोः समुच्चयरूपं मन्तव्यं यच्च प्रथमे भाष्ये दर्शितम्। यथाह भगवान् व्यासः "अहं ब्रह्मेति यत्सर्वं विजानाति नरः सदा। हन्यात्स्वयमिमान् कामान् सर्वाशी सर्वविक्रयी। सर्वं निषिद्धं कृत्वापि कर्मभिर्न स बध्यते।" (उ०गी०३-१४)। "ब्रह्माग्निना विद्वान् निर्दहेत् कर्मबन्धनम्। यथा जलं जलेक्षिप्तं क्षीरे क्षीरं घृते घृतम्। अविशेषो भवेत् तद्वज्जीवात्मपरमात्मनोः॥" (उ०२-२)। "एवं मुनेर्विजानत आत्मा भवति गौतम" इति श्रुतेरैक्यार्थात्। एवं त्रिविधानां विज्ञानानामेकत्रोपदेशोपसंहारेण पूर्णाद्वैतमवगतम्। ये च केवलं शाब्दाद्वैतं ज्ञानाद्वैतं योगाद्वैतं वा अभ्युपगच्छन्ति त एकदेशिन एव, वस्तुतस्तु श्रुत्या त्रिविधानामैक्ये एव पूर्णाद्वैतं प्रतीयते प्राणाभ्यासं पुरस्कृत्य शब्दतत्त्वमाश्रित्य ज्ञानेन ब्रह्माद्वैतमनुभवन् योगी कृतकृत्यो भवति, अर्थात् ईशावास्यमिदं सर्वमिति प्रतिपाद्यार्थापरोक्षत्वं गच्छति, न कुत्रापि गमनागमनादिना क्लिश्यत इति वाक्यार्थः, "न तस्य प्राणा उत्क्रामन्ति" "इहैव ब्रह्मसमश्नुते" इतिवचनाभ्यां विशदोवेदार्थं इति।

इति वाजसनेयिसंहितायामुपनिषदध्यायस्य योगपरकं प्रकाशभाष्यं सम्पूर्णम्।

केनोपनिषत्

ओं आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुःश्रोत्रमथोबलमिन्द्रियाणि च। सर्वाणि सर्वं ब्रह्मोपनिषदं माहं ब्रह्मनिराकुर्यां मा मा ब्रह्मनिराकरोत् अनिराकरणमस्तु अनिराकरणमस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ॥ ओं शान्तिः शान्तिः शान्तिः ।

भाष्यम्

मङ्गलाचरणम्

ज्ञाताज्ञातविहीनं यद् वेद्यावेद्यविवर्जितम् ॥
सच्चिदानन्द रूपं तद्, उमया बुध्यते बुधः ॥

सामवेदस्य तलवकारशाखीयेयमुपनिषत् केन शब्दादित्वात् केनेति व्यवह्रियते। यद्यपीयं शाखा साम्प्रतं नोपलभ्यते तथापि वेदान्तशैलीमनुसृत्य कर्मोपासनयोरन्तिमे भाग एव भविष्यति अतएव श्रीशंकराचार्यैरुक्तम्—"समाप्तं कर्मात्मभूत प्राणविषयं विज्ञानं कर्मचानेकप्रकारम्" कर्मणामुपासनानां च फलं जन्यत्वादनित्यं परिमितत्वात् 'न कर्मणेति' तथा "तदेव ब्रह्मत्वं विद्धि नेदं यदिदमुपासते" इति उभयोः फलं श्रेयोऽविषयाद् हीनमवगम्यते द्वैतविषयत्वादेतयोः तस्माद् हेतोः अद्वैतविज्ञानाद् ऋते न भवति श्रेयः प्राप्तिरिति हेतोः सुगमतया तद् वोधार्थं विषयस्यातिसूक्ष्मत्वाद् गुरु-शिष्य संवादेन श्रुतिरधिकारिवर्गानुपदिशति केनेत्यादिः—

केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैतियुक्तः ।
केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति ॥१॥

अधिकारिशिष्यो गुरुं प्रणिपातादिना आनुकूल्य पृच्छति केन अनिर्दिष्टनाम्ना चेतनेन अन्येन केनचिद् वा इषितम् इच्छाविषयीभूतमिदं

जगत् तथा केन प्रेषितं संकल्पविकल्पात्मकं मनः पतति नियमेन स्वविषयं प्रति याति । यद्यपि प्रश्नोत्तराभ्यां व्यष्टिरेवापगम्यते तथापि इषितमिति योगात् समष्टिरपि गृह्यते समष्टिं विना व्यष्टेरसम्भवात् इषित प्रेषित शब्दयोरेकार्थत्वेऽपि एवं भेदः । केन कर्त्रा प्रथमः आदिभूतः प्राणो हिरण्यगर्भो व्यष्टिभूतः शरीरान्तः संचारी च प्रैति उत्पद्यते "हिरण्यगर्भः समवर्तताग्रे" तथा "यो ह वै ज्येष्ठं च श्रेष्ठं च वेद" (बृ० ६-१-१, छां० ५-१-१) केनेषितां प्रेरितामिमां प्रत्यक्षभूतां वाणीं जना वदन्ति वाग् व्यापारं विदधत्ते, क उ देवः चक्षुः श्रोत्रं चक्षुः श्रोत्रोपलक्षितानि सर्वाणि बुद्धीन्द्रियाणि वागुपलक्षितानि सर्वाणि कर्मेन्द्रियाणि च युनक्ति—स्वस्वव्यापारेषु योजयति इति प्रश्नाभिप्रायः तं देवं द्योतनात्मकं सर्वं विषयावभासकं मामुपदिशतु तत्र भवानित्यभिप्रायः, ननु निष्क्रियस्य ब्रह्मात्मतत्त्वस्य प्रवृत्त्यनुपयुक्तत्वात् कथं व्यापारप्रयोजकत्वं स्यादितिचेन्न, ब्रह्माभिन्नशक्तितत्त्वादिति अदोषः, उक्तं च—"चितिः स्वतन्त्रा विश्वसिद्धि हेतुः" इत्यभिलक्ष्य प्रश्नोत्तरपरम्पराक्रमः ॥१॥

एवं पृष्ठवते शिष्याय श्रीगुरुराह श्रोत्रस्य श्रोत्रमिति :—

श्रोत्रस्य श्रोत्रं मनसो मनो यद् वाचो ह वाचं स उ प्राणस्य प्राणश्चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति ॥२॥

श्रूयते अनेनेति श्रोत्रमिन्द्रियं शब्दग्रहण सामर्थ्यं शक्तितत्त्वं तच्च प्रेरकतत्त्वं यद् विना श्रोत्रेण स्वकार्यं सम्पादयितुं सर्वथा अशक्यम् । मनसो मनः मननसामर्थ्यमपि तदेव वाचो ह वाचं वागिन्द्रियसकाशात् शब्दोच्चारणसामर्थ्यमपि तदेव प्रसिद्धं वाचमिति प्रथमया विपरिणेयं स उ एव प्राणस्य चेष्टात्मक क्रियाशक्तेरपि प्राणः कारणम् चक्षुषः दृष्टेः दर्शनसामर्थ्यमपि तदेव एवं भूतं ब्रह्मतत्त्वं धीराः स्थितप्रज्ञाः अतिमुच्य देहगेहादौ आत्मबुद्धिं परित्यज्य तत् प्रेत्य प्रकर्षेण ज्ञात्वा ब्रह्माभेदेन स्वात्मानमनुभूय अस्मात् जननमरणात्मकाविद्याभयात् लोकात् रहिताः सन्तः अमृता जन्ममृत्युभावमुक्ता भवन्ति । पञ्चकञ्चुकाविष्टस्य जीवतत्त्वस्यैव संसारभावः शिवत्वे परिचिते तन्निवृत्तिः "प्रपञ्चोपशमः शान्तःशिव इति श्रुतेः" शक्तितत्त्वादेव जगदा-

विर्भावः सैव शक्तिः सर्वकारणम् उक्तं च—"जगत्कारणमापन्नः शिवो यो मुनिसत्तमाः। तस्यापि साभवच्छक्तिस्तया हीनो निरर्थकः" ॥१॥ तथा—"उमाशंकरयोर्भेदो नास्त्येव परमार्थतः। द्विधासौरूपमास्थाय स्थित एको न संशयः॥" इति ॥२॥

आत्मनोऽन्यानपेक्ष प्रकाशत्वमाह न तत्रेति :—

न तत्र चक्षुर्गच्छति न वाग्गच्छति न मनो न विद्मो न विजानीमो यथैतदनुशिष्यादन्यदेव तद् विदितादथो अविदितादधि इति शुश्रुम पूर्वेषां ये नस्तद् व्याचचक्षिरे ॥३॥

तत्र ब्रह्मणि शिवतत्त्वे चक्षुर्नेत्रं न गच्छति नीरूपत्वाच्चक्षुषा गृहीतुमनर्हम्। ब्रह्मप्रकाशादेव नेत्रस्य दर्शनसामर्थ्यमाविर्भवति, पुनस्तत्कथं ब्रह्मप्रकाशयितुं समर्थं भवेदित्यर्थः। एवमेव न वाग्गच्छति तत्र वाग्व्यापारोऽपि नास्ति शब्दातीतत्वात् तत्कारणत्वाच्च, नहि-कारणं कार्याश्रितं भवतीतिभावः। न मनः मनोऽपि मननव्यापारेण मन्तुमशक्यमेव तदाश्रितत्वात्। एवं तर्हि कथं ब्रह्मोपदेशःस्यादितिहेतोः आचार्य उपदिशति न विद्मो न विजानीम इति सामान्यविशेषरूपेण ज्ञातुं वयं सर्वथा असमर्था एव, एवमेव कश्चिद् गुरुः शिष्यमनुशिष्यात् शिक्षयेत् यद् विदितादथोऽविदितादधि ज्ञाताज्ञातविषयाद् भिन्नमेव ब्रह्मतत्त्वमद्वैतत्वात् वेद्यावेद्यभिन्नत्वमित्यभिप्रायः। एवमेव पूर्वेषामाचार्याणामुपदेशं श्रुतवन्तस्ते ब्रह्मविद एवमेव नोऽस्मभ्यं व्याचचक्षिरे व्याख्यातवन्तः। यदि ज्ञातविषयत्वेनोपदिश्येत परिच्छिन्नपरिमाणत्वेन अपूर्णं तत् स्यात् तथा च जडकोटौ प्रविष्टं स्यात् स्वतस्त्व हानिश्च। यद्यज्ञातविषयत्वेनाभ्युपगम्येत तदा शून्यवादप्रसङ्गःस्यात् तेन जगदान्ध्यं प्रसज्जेत अथ च क्षणिकं विज्ञानं स्वीकुर्यात्तदा पूर्वापरानुसन्धानाभावः प्रवाहानुपपत्तेश्च, तस्मादुभयविलक्षणमुपदिष्टम्। श्रीगुरुमुखादेव सम्यग् ज्ञानोपदेशो भवतीतिभावः, यथा हैमवती उमा इन्द्राय उपदिदेश। ब्रह्मैव साधकाननुगृह्णन् वा स्वस्वरूपं दर्शयति यथा यक्षः। केवलेन तर्केण एतदसम्भव इति अभिप्रायः। तस्मान्मुमुक्षुभिरुभयं सम्पाद्यम् ॥३॥

वाक् चक्षुरादीन्द्रियविषयत्वेनैव ब्रह्मणो ज्ञानमिति मन्त्र पञ्चकेन स्पष्ट प्रतिपत्यर्थमाह यद्वाचेति :—

यद् वाचानभ्युदितं येन वागभ्युद्यते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ।।४।।

यत् पूर्वोक्तं ब्रह्मतत्त्वं वाचा वागिन्द्रियेण अनभ्युदितं अविषयत्वेन प्रोक्तं प्रत्युत वागिन्द्रियं येन वदनशीलं भवति तदेव हे शिष्य ! त्वं ब्रह्म विद्धि, इदं यन्नामरूपात्मकमुपासते भेदज्ञानविषयकं तद् ब्रह्म न भवितुमर्हति । केनेषितां वाचमित्यस्योत्तरम्,"यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इति श्रुतेः ।।४।।

पुनश्चाह यन्मनसेति :—

यन्मनसा न मनुते येनाहुर्मनोमतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ।।५।।

यद् ब्रह्मतत्त्वं मनसा न मनुते मनोव्यापारेण न परिच्छिद्यते किन्तु येन ब्रह्मणा मनोमतं मननव्यापारवद् भवति हे शिष्य ! तदेव त्वं ब्रह्मतत्त्वं विद्धि जानीहि, यदिदं नामरूपात्मकं भेदज्ञानविषयकमविद्याकार्यं स्थूलमुपासते मनसा इन्द्रियेण तन्न ब्रह्म । ननु "सर्वं खल्विदं ब्रह्म" इति श्रुत्या जगतोऽपि ब्रह्मरूपप्रतिपादनात् कथमिदं निषेधविषयकं संगतं भवेदितिचेन्न—"असदितिचेन्न प्रतिषेधमात्रत्वात्" (वे० द० २-१-७) इति सूत्रे प्रतिषेधविषयकत्वाद् भेदस्यकारणात्मना ब्रह्मरूपत्वेनादोषात् इति प्रतिपादनात् संगच्छते ।५।

चक्षुषश्चक्षुरिति विशदयति यच्चक्षुषेति :—

यच्चक्षुषा न पश्यति येन चक्षुꣳषि पश्यति ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ।।६।।

यद् ब्रह्मतत्त्वं चक्षुषा नेत्रेन्द्रियेण ग्रहीतुं न शक्यते किन्तु येन चक्षूंषि नेत्राणि पश्यति दर्शनसामर्थ्यवन्ति भवन्ति बहुत्वं छान्दसं व्यत्ययो बहुलमिति । हे शिष्य ! तदेव त्वं ब्रह्मतत्त्वं विद्धि यदिदं नामरूपात्मकं भेदज्ञानविषयकमुपासते तद् ब्रह्म नेति ।६।

श्रोत्रस्य श्रोत्रमित्याह यच्छ्रोत्रेणेति :—

यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ।।७।।

यत्परमात्मतत्त्वं श्रोत्रेण न शृणोति श्रोत्रविषयं न भवति किन्तु येन श्रोत्रं श्रवणसामर्थ्यवद् भवति तदेव त्वं ब्रह्म विद्धि ; इदं यदुपासते तद् ब्रह्म न भवितुमर्हति ।।७।।

प्राणस्य प्राणमिति स्फुटयति यत्प्राणेनेति :—

यत्प्राणेन न प्राणिति येन प्राणः प्राणीयते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ।।८।।

यत् परमात्मतत्त्वं प्राणेन न प्राणिति क्रियाकरणसामर्थ्यवन्न भवति किन्तु प्राणो हिरण्यगर्भो वा तेनैव प्राणीयते चेष्टते हेशिष्य ! तदेव ब्रह्मतत्त्वं विद्धि जानीहि, यदिदमुपासते मायिकं रूपं तन्न ब्रह्म इति ।।८।।

इति प्रथमः खण्डः

द्वितीयः खण्डः

प्रथम खण्डे ब्रह्मज्ञानस्य सामान्योपपत्तिं प्रदर्श्य विशेषयुक्तितो निश्चयार्थं द्वितीयः खण्डः प्रारभ्यते यदीत्यादि :—

यदि मन्यसे सुवेदेति दभ्रमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपम् ।
यदस्य च देवेष्वथ नु मीमांस्यमेव ते मन्ये विदितम् ।।१।।

शिष्यं प्रबोध्य पुनरपि श्रीगुरुराह—हे शिष्य ! यदि त्वं ब्रह्मतत्त्वं सुवेद सुष्ठु जानामि इति मन्यसे नूनं निश्चयेन त्वं दभ्रमेव अल्पमेव ब्रह्मणस्तत्त्वं जानासि । अपि नूनमिति शब्दौ इममेवार्थं दृढयतः । यदस्याध्यात्मिकं रूपं त्वं जानासि यस्य रूपं देवेषु आधिदैविकं रूपं ज्ञातं मन्यसे तदपि अल्पमेव, अथ नु तस्मात्त्वया मीमांस्यं विचार्यमेव ब्रह्म इति मन्ये । यत्किञ्चिद् ब्रह्मरूपमाध्यात्मिकेषु आधिदैविकेषु च त्वया ज्ञायते तत् सर्वमुपाधिधर्मानुभजनशीलं, वास्तविकं शुद्धं स्वरूपं तु सर्वोपाधिरहितमेतद् व्यतिरिक्तम् । एवं प्रबोधिते शिष्यो गुरोः समीपमागत्य उवाच इदानीं ब्रह्मतत्त्वं विदितंमन्ये ।।१।।

विदितत्वे हेतुमाह नाहमिति :—

नाहं मन्ये सुवेदेति नो न वेदेति वेद च।
यो नस्तद् वेद तद् वेद नो न वेदेति वेद च ॥२॥

नाहं मन्ये सुवेदेति सुष्ठु ब्रह्मतत्त्वं वेद जानामि इति नैवाहं मन्ये न वेद उक्तं ब्रह्म न जानामि इत्यपि नो मन्ये किन्तु वेद च जानामि चेत्यर्थः,जानन्नपि वाङ्मनसयोरगम्यत्वात् प्रकाशयितुमयोग्यमिति सुवेद पदेन दर्शितम्। नो न वेद इत्यनेन शास्त्रगम्यमेव, वेद पदेन संशयादि-राहित्यं च प्रदर्शितम्, यः कश्चिन्नः अस्माकं शिष्याणां मध्ये वेद तदस्माकं रीत्या एव जानाति, नो न वेदेति निषेधात्मकरूपेण सामस्त्येन वा न वेद किन्तु वेदैव अद्वैतज्ञानस्य त्रिपुटी रहितत्वेन सम्यक् प्रकाशो द्वैतवदशक्यः। लाक्षणिकवृत्त्या एव प्रकाशनाय अयं मन्त्रः प्रवृत्तः इति भावः ॥२॥

गुरुशिष्यसंवादसिद्धमर्थमुपसंहरति :—

यस्या मतं तस्य मतं मतं यस्य न वेद सः।
अविज्ञातं विजानतां विज्ञातमविजानताम् ॥३॥

यस्य तत्त्वज्ञस्य ब्रह्मतत्त्वं ज्ञातृज्ञेयादिरहितत्वेन मतं तथा द्वैत-रूपेण ज्ञातृज्ञेयादिभेदरूपेण अमतं तस्यैव मतं वेदितव्यम्। यस्तु ज्ञातृज्ञेयादिभिन्नरूपेण जानाति वस्तुतस्तद् ब्रह्मतत्त्वं नैव जानाति यतो द्वैतज्ञानस्य परिच्छिन्नत्वात् असदेव तद् वेदनं भवति इति। अतो भिन्नत्वेन विजानतामविज्ञातमेव द्वैत प्रतिषेधेन च विजानतां साक्षात् कर्तृणां विज्ञातमेव मन्तव्यम् अपरिच्छिन्नत्वात् ॥३॥

ननु अवेदनत्वेनाभिमतस्य ब्रह्मणो द्वैतभूमिकायां मानाभावात् कथमुपदेष्टृभावस्य तथोपदेष्टव्यस्य च सिद्धिः स्यादतो हेतोरुदाहरति प्रतिबोधेति :—

प्रतिबोध विदितंमतममृतत्त्वं हि विन्दति।
आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम् ॥४॥

बोधं बोधं प्रतीति प्रतिबोधं ; प्रत्येकं बुद्धिवृत्तिमभिव्याप्य विदितं ब्रह्मतत्त्वं ज्ञातं वीप्सायामव्ययीभावः। मतमभिमतं तत्त्वदर्शिनाम्

"अहं ब्रह्मास्मि" इति वृत्या अपरोक्षीकृत्य अमृतत्त्वं हि निश्चयेन विन्दति लभते। क्रममाह् आत्मनेति आत्मना शक्तित्वेन वीर्यं मोक्षप्राप्ति-सामर्थ्यं विन्दते प्राप्नोति उक्तं च—"वर्तते सर्वभूतेषु शक्तिः सर्वात्मना नृप। शववच्छक्तिहीनस्तु प्राणी भवति सर्वथा॥ चिच्छक्तिः सर्वभूतेषु रूपं तस्यास्तदेव हि।" तथा—"चैतन्य स्वरूपा शक्तिः" इति गौडपादाचार्याः। विद्यया जीवब्रह्मात्मैक्य ज्ञानेन अमृतं मोक्षं विन्दते लभते, "विद्याविहीनः पशुः" इत्युक्तेः "ज्ञात्वादेवं सर्वपाशाप-हानिः" पाशबद्धः पशुरिति निर्णयः ज्ञात्वादेवं मुच्यते सर्वपाशैरिति च श्रुतेः ॥४॥

विद्ययैव मोक्षः सचास्मिन्नेव शरीरें साध्य इति बोधयितुमपरो मन्त्र आह् इह् चेदिति :—

इह चेदवेदीदथसत्यमस्ति न चेदिहावेदीन्महती विनष्टिः।
भूतेषु भूतेषु विचित्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति ॥५॥

इह अस्मिन् मानवे देहे चेद् यदि अवेदीत् अद्वैताख्यमात्मतत्त्वं विजानातिस्म अथ तदा सत्यं पुनरावृत्ति रहितं स्थानं प्राप्नोति, इह न चेद् यदि तदा महती विनष्टिः अन्यत्र योनिषु दुर्लभमेव आत्म-विज्ञानम्। अर्थात् शीघ्रमेवेदं सम्पाद्यम्। अस्मिन्नेव शरीरे तस्य सौलभ्यमाह—धीराः स्थिरमतयः सिद्धाः भूतेषु भूतेषु समस्तशरीरेषु चराचरेषु एकरसं सामरस्याभिधं शिवशक्तिमयं तत्त्वं विचित्य साक्षा-त्कृत्य अस्माल्लोकाद् पशुभयादविद्यारूपाद् प्रेत्य विवृत्य अमृता जनन-मरण रहिता भवन्ति, आणवं भावं परित्यज्य व्यापकं शिवत्वं लभन्त इत्यर्थः ॥५॥

इति द्वितीयः खण्डः

तृतीयः खण्डः

उक्तेन खण्डद्वयेन यत्तत्त्वं प्रतिपादितं तच्छिवशक्तिमयात्मकं स्वरूपतोऽभिन्नं व्यवहारतो भिन्नं च शक्तितत्त्वमेव कारणं जगत्कार्यस्य स्वरूपाप्रच्युतेन कटककुण्डादिरूपेण परिणममानेन हैमपिण्डेन इव इति प्रसिद्धं वेदान्तेषु "सा विश्वं कुरुते कामं सा पालयति पालितम्।

कल्पान्ते संहरत्येव त्रिरूपा विश्वमोहिनी ।।" पञ्चविधं तत्कृत्यं "सृष्टिः स्थिति संहृती तिरोभावः । तद्वदनुग्रहकरणं जगतः सततोदितस्यास्य सा देवता ऐक्षत, स्वशक्ति प्रचयो विश्वम्"इति च प्रमाणैरवसीयते शक्तितत्त्वस्य कारणत्वम् । इदानीं सर्वेभ्यो देवेभ्योऽतिशयित्वं तथा उभयोः परमकारुणिकत्वं च दर्शयितुं यक्षाख्यायिकया उक्तं प्रस्तूयते यतः साधकाननुगृह्णन् अनेकधा स भगवान् येन केनापि वैशिष्टयरूपेण आविर्भवति तथैव शक्तितत्त्वमपि इत्यादि अर्थं जातं व्यञ्जन्नाह ब्रह्मेति——

ब्रह्म ह देवेभ्यो विजिग्ये तस्य ह ब्रह्मणो विजये देवा अमहीयन्त । त ऐक्षन्तास्माकमेवायं विजयोऽस्माकमेवायं महिमेति ।।१।।

ब्रह्म ह परमात्मा सच्चिदानन्दलक्षणः किल देवेभ्यो देवानामनुग्रहार्थं विजिग्ये लोकद्वयप्रतिकूलानसुरान् जिगाय तस्य ब्रह्मणः परमात्मनो विजयेऽसुराणां पराभवे जाते च देवा इन्द्राग्निवायु प्रभृतयोऽमहीयन्त पूजिता अभूवन् । ते देवा ब्रह्मतत्त्वमविज्ञाय ऐक्षन्त वक्ष्यमाण प्रकारकमीक्षणं विचारमकार्षुः यदयं महिमा असुरपराभवनिमित्तकः अस्माकमेव तथायं विजयोऽपि अस्मदीय एव एतस्मादेव कारणाल्लोकेषु वयं सर्वैः पूजिताः स्म ।।१।।

तद्धैषां विजज्ञौ तेभ्यो ह प्रादुर्बभूव तन्न व्यजानन्त किमिदं यक्षमिति ।।२।।

तदसुरपरिभावकं ब्रह्म ह किल एषां देवानां मिथ्याभिसन्धिं विजज्ञौ ज्ञातवान् तेभ्यो ह प्रादुर्बभूव तेषां ह देवानामनुग्रहार्थं ह किमपिरूपविशेषं निर्माय आगत इत्यर्थः । तदाविर्भूतं ब्रह्म ते देवा न व्यजानन्त नाज्ञाषिषुः किमिदं यक्षमिति ।।२।।

तेऽग्निमब्रुवन् जातवेद एतद् विजानीहि किमेतद् यक्षमिति तथेति ।।३।।

ते इन्द्रादयो देवा अग्निमब्रुवन् अवोचन् यद् हे जातवेद एतत् प्रत्यक्षभूतं पुरो वर्तमानं यक्षं किं स्वरूपकं त्वं प्रश्नादिना जानीहि तैरेवमुक्तोऽग्निस्तथैवाङ्गीचकार ।।३।।

तदभ्यद्रवत् तमभ्यवदत् कोऽसीत्यग्नि र्वा ।
अहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मीति ।।४।।

तदुक्त यक्षं अभ्यद्रवत् तत्समीपं गतः तमागतमग्निं यक्षोऽवदत् प्रत्यभाषत् कोऽसि त्वं, किं नामा भवसि, एवमग्निः पृष्टो यक्षेण स्वश्रैष्ठचं व्यञ्जयन्नाह—अग्निः अग्रणीत्वादग्निर्वा अथवा अहं जातवेदा जातानि सर्वाणि वेदेति जातवेदा इति साभिमानोक्तिः अस्मीति ।।४।।

एवमग्निनोक्ते सति पुनस्तमप्राक्षीद् यक्षः—

तस्मिँस्त्वयि किं वीर्यमित्यपीदꣳसर्वं दहेयंयदिदंपृथिव्यामिति।।५।।

तस्मिन्नुक्तनामनि त्वयि जातवेदसि किं वीर्यं सामर्थ्यमस्ति ? एवं पृष्टेऽग्निराह—अपि यदिदं सर्वं शुष्कार्द्ररूपं किञ्चिदपि सर्वं निखिलं दहेयं दहनं कुर्याम् । यच्चराचरात्मकं वस्तुजातं पृथिव्यां भूमौस्थितमिति प्रतिवचनमदात् ।५।

एवमनिा उक्ते सति—

तस्मै तृणं निदधावेतद् दहेति तदुपप्रेयाय सर्व जवेन तन्नशशाक दग्धुं स तत एव निववृते नैतदशकं विज्ञातुं यदेतद् यक्षमिति ।।६।।

तस्मै उक्ताभिमानवतोऽग्नेरग्रे तृणंक्षुद्रं शुष्कं तृणं निदधौ निहितवान् एतन्मया निहितं तृणं दहेति भस्मीकुरु, इत्येवं यक्षेणोक्तोऽग्निस्तत् पुरो विद्यमानं तृणं सर्वजवेन स्वकीयेनाखिलेन सामर्थ्येन उपप्रेयाय समीपमीयाय तथापि तत्तृणं दग्धुं भस्मी कर्तुं न शशाक न समर्थो बभूव । विगतदर्पः स तस्माद् व्यापारात् निवृत्य सलज्जः सन् देवानां समीपमागत्य उवाच—एतद् यक्षं विज्ञातुं परिचेतुं नाशकं न समर्थोऽभूवम् ।।६।।

अग्निपराभवं दृष्ट्वा सर्वजगतः प्राणवायुं देवा इन्द्रादय ऊचिरे यथाहि—

अथ वायुमब्रुवन्वायवेतद् विजानीहि किमेतद् यक्षमिति तथेति ।७।

हे वायो ? एतदस्मद् गोचरं यक्षं विजानीहि बुध्यस्व यदेतद् यक्षं किं स्वरूपकम् एवमुक्तो वायुस्तथेति स्वीकृत्य ।।७।।

तदभ्यद्रवत् तमभ्यवदत् कोऽसीति स वायुर्वा अहमस्मीति अब्रवीन्मातरिश्वा वा अहमस्मीति ।।८।।

तदुक्तं यक्षं अभ्यवदत् तत्संनिधौ गतस्तमागतं वायुं यक्षोऽपृच्छत्—कोऽसित्वं ; किंनामा भवसि ; इति यक्षेण पृष्टो वायुराह वायुनामाहमस्मि इत्युक्तवान्, तथा विशेषेण स्वाभिधानमाह मातरिश्वा सर्वत्रगतिमानस्मि इत्युवाच ।।८।।

एवमुक्ते वायौ तं पप्रच्छ यक्षः—

तस्मिँस्त्वयि किं वीर्यमित्यपीद ँ्ं सर्वमाददीयं यदिदं पृथिव्यामिति ।।९।।

तस्मिन्नुक्तनाम्नि त्वयि वायौ किं वीर्यं सामर्थ्यं तदा वायुराह—अपि : सम्भावनायाम् इदं सर्वं दृश्यमानं आददीयं गृह्णीयाम्, पृथिव्यां यद् विद्यमानं चराचरात्मकं वस्तुजातं स्थितं तत्सर्वमिति ।।९।।

तस्मै तृणं निदधावेतदादत्स्वेति तदुपप्रेयाय सर्वजवेन तन्न शशाकादातुं स तत एव निववृते नैतदशकं विज्ञातुं यदेतद् यक्षमिति ।।१०।।

तस्मै तस्य वायोरग्रे तृणं निदधौ स्थापितवान् अवादीच्च एतत्तृणमादत्स्व त्वं गृहाण आदायान्तरिक्षेनय एवं यक्षेणोक्तो वायुस्तदग्रेस्थितं तृणमादातुं ग्रहीतुं न शशाक न समर्थो बभूव, स वायुः तत एव तृणग्रहण व्यापारान्निववृते न्यवर्तत । महतीं लज्जामनुभवन् देवानागत्य उवाच—यदेतत् पुरोवर्तिनं यक्षं विज्ञातुं नाहं समर्थोऽभवम् ।।१०।। इति वायुनोक्ते सति—

अथेन्द्रमब्रुवन् मघवन् एतद् विजानीहि किमेतद् यक्षमिति तथेति तदभ्यद्रवत् तस्मात्तिरोदधे ।।११।।

अथ वायोरभिमाननिवृत्यनन्तरं परमैश्वर्यसम्पन्नमिन्द्रं देवराजमब्रुवन् अवोचन् हे मघवन् इन्द्र ! एतद् यक्षं किं स्वरूपकमिति विजानीहि, अनेन प्रकारेण वायुनोक्त इन्द्रस्तथेति स्वीचकार, तदुक्तयक्षमभ्यद्रवत् तत्समीपं गतः तस्मात् स्वसमीपमागतात् इन्द्रस्तिरोदधे आत्मानमन्तर्हितं चक्रे, तस्य देवराजस्याभिमानो निरसनीय इति हेतोः सम्भाषणमपि तेन सार्धं नैव चकार इति भावः ।।११।।

स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीं ता ँ्ं होवाच किमेतद् यक्षमिति ।।१२।।

स विगताभिमानः सन् तस्मिन्नेवाकाशे यत्र यक्षं स्थितं तत्रैव ध्यायन् तस्थौ यक्षे पूजनीये तस्मिन् भक्तिमवेक्ष्य स्त्री रूपेण पराशक्तिर्ब्रह्मविद्याख्या परमात्मनः स्वरूपभूता परमकारुण्यमातन्वती प्रादुर्बभूव स इन्द्रः तस्मिन्नेवाकाशे चिदाकाशे तां स्त्रियं स्त्रीरूपधरां ब्रह्मविद्यां आजगाम ददर्शेति शेषः। कीदृशीं बहुशोभमानां बहुकान्तिमतीं हैमवतीं हिमवतो दुहितरं स्वर्णप्रभासदृशीं गौरीं वा उमां तां होवाच पप्रच्छ—किमेतद् यक्षमिति परमात्मनो बोधने ब्रह्मविद्यैव समर्था सा च शक्तिभूता उमेति सर्वशक्तिमूर्धन्या। उक्तं च—"उकारः शिववाचक स्तस्य मा लक्ष्मीः" उं परशिवं माति परिच्छिनत्तीति, उमा। "परानुभूति भवपापनाशिनीं सदाशिवस्याप्यति शोभनाढ्याम्। उमाभिधामुत्तमचित्तवृत्ति नमामि नानाविधलोकवैभवाम्॥" इति योगिनः। ननु सर्वोपनिषत्सु ब्रह्मप्राप्तिसाधनत्वेनोङ्कारः स्वीकृतस्तत्कथमत्रनोक्तः सत्यं लिङ्गपुराणे उमैव नाम ओंकारत्वेन स्वीकृतम् तस्माददोषः यथाहि—"उकारं च मकारं च अकारं च क्रमेरितम्। त्वदीयं प्रणवं विद्धि त्रिमात्रं प्लुतमुत्तमम्॥" "ओंकारसारशक्तित्वादुमेति परिकीर्तिता।" इति महावाशिष्ठवचनात्। "इच्छाशक्तिरुमाकुमारी" इति शिवसूत्रं—"उमा शैलेन्द्रतनया गौरी गन्धर्वसेविता इति।" ललितासहस्रनामसु, "विद्यासि सा भगवती परमा हि देवी।" इत्यादि प्रमाणैः शक्तितत्त्वं ब्रह्मणः स्वरूपभूतं निश्चीयते तदेव भक्तानां रक्षणार्थमवतरति। कदाचित् शक्तितत्त्वमाश्रित्य ब्रह्मणोऽपि आविर्भावः। "यदा यदा हि धर्मस्य" इत्यादि तथा "इत्थं यदा यदा बाधा दानवोत्था भविष्यति। तदा तदावतीर्याहं करिष्याम्यरिसंक्षयम्॥" इति श्लोकाभ्यां स्पष्टं प्रतिपद्यते। ननु मायावादे शक्तितत्त्वस्य मिथ्यात्वात् कथं ज्ञानस्य नित्यत्वमिति चेन्न भेदप्रतिपादकजडभूलस्य मायातत्त्वस्य तथात्वात् नतु शक्तितत्त्वस्य इयमुमा तु ब्रह्मविद्या सच्चिदानन्दस्वरूपिणी एव श्री शंकराचार्यैः तथैव स्वीकृतत्वाच्च यथाहि—"अथवा उमैव हिमवतो दुहिता हैमवती नित्यमेव सर्वज्ञेनेश्वरेण सह वर्तते इति ज्ञातुं समर्थेति कृत्वा ताम्" तस्मान्नास्ति काचिदनुपपत्तिः॥१२॥

इति तृतीयः खण्डः

चतुर्थः खण्डः

पूर्वोक्तया यक्षाख्यायिकया सर्वोपरि ब्रह्मतत्त्वं प्रतिपाद्य तदधिगमाय ब्रह्मविद्याया एव प्राधान्यं प्रादर्शि अधिकारित्वं च सूचितम्, इदानीं भगवती हैमवती उमा सर्वाधारभूतमध्यात्माधिदैवतत्त्वमधिकृत्य उपसंहारात्मकेन प्रकरणेन विद्योपदेशक्रममाह सेति :—

सा ब्रह्मेति होवाच ब्रह्मणो वा एतद् विजये महीयध्वमिति ततो हैव विदांचकार ब्रह्मेति ॥१॥

इन्द्रेण पृष्टा सा उमा नित्यशुद्धबुद्धस्वभावं ब्रह्मेति होवाच अब्रवीत् उपदिदेश च तथा हि ब्रह्मणो हि एतद् विजयेऽसुरपराभवात्मिके यूयं महीयध्वमिति स्वकीयं पूजादिलाभरूपात्मकं महत्त्वं मन्यध्वं मा अभिमानं कुरुत यतोऽयं महिमा तस्यैव तदनुग्रहादेव युष्माकं विजयः संजातः। तस्यैव महत्त्वलेशेन यूयं पूजिताः स्थ। तदेव सर्वशक्तिमत्वेन सर्वोत्कर्षेण च वर्तते। तदाधारीभूय शक्तितत्त्वं विश्वात्मना परिणमते, अतः सर्वत्र तस्यैव महत्त्वमवगन्तव्यम्। एवं बोधिते सति इन्द्रो ह किल तत एव उमा वचनात् विदांचकार जज्ञे ब्रह्मतत्त्वं न स्वत इति ॥१॥

त्रयाणां देवानां श्रेष्ठत्वे हेतुमाह तस्मादिति :—

तस्माद् वा एते देवा अतितरामिवान्यान् देवान् यदग्निर्वायुरिन्द्रस्ते ह्येनन्नेदिष्ठं पस्पर्शुस्ते ह्येनत् प्रथमो विदांचकार ब्रह्मेति ॥२॥

तस्मात् कारणात् ब्रह्मविज्ञानहेतुकेन एते देवा इन्द्राग्निवायवोऽन्यान् देवान् एतद् व्यतिरिक्तानि वरुणादीनि दैवतानि अतितरामतिक्रम्य वर्तन्ते, तान् नामत आह—यदिति अग्निर्वायुरिन्द्र इति प्रसिद्धाः ते ह्येतन्नेदिष्टं पस्पर्शुस्ते तस्य सामीप्यमाप्नुवन् प्रथमः प्रथमं विदांचकार, ते उमोपदेशाद् ब्रह्मणो ज्ञानं लेभिरे तस्मात्ते प्रथमे अभूवन् ॥२॥

अग्निवायुभ्यामपि इन्द्रस्य श्रैष्ठ्यमाह तस्मादिति :—

तस्माद् वा इन्द्रोऽतितरामिवान्यान् देवान् सह्येनन्नेदिष्टं पस्पर्श सह्येनत् प्रथमो विदांचकार ब्रह्मेति ॥३॥

यस्मात् कारणात् अग्निवायू अपि इन्द्रवाक्यादेव जज्ञाते इन्द्रः उमा वाक्यात् अज्ञासीत् तस्मादेव कारणात् वै प्रसिद्धः इन्द्रः परमैश्वर्य-सम्पन्नो देवराज अन्यान् देवान् स्वभिन्नान् अग्निवायुप्रमुखान् अतिक्रम्य अतितरामिव अत्यन्तमेव श्रेष्ठत्वेनाभूत्। स इन्द्रो हि नेदिष्ठं यक्षरूपमतिशयेन समीपस्थं पस्पर्श प्राप्तवान् हि यस्मात् स इन्द्र एनत् उक्तलक्षणं यक्षं पूज्यं ब्रह्म प्रथममग्निवायुभ्यां प्राक् विदांचकार उमोपदेशेन ब्रह्मेति विज्ञातवान् ।।३।।

अधिदैवमादेशमाह तस्येति :—

तस्यैष आदेशो यदेतद् विद्युतो व्युद्युतदा ।।३।। इतीति न्यमी-मिषदा ।।३।। इत्यधिदैवतम्।।३-४।।

तस्य इन्द्रेण प्रत्यक्षीकृतस्य ब्रह्मणो वक्ष्यमाण एष आदेशः उपमो-पदेशः निरुपमस्य ब्रह्मणो येनोपमानेनोपदेशः सोऽयमादेशः इत्युच्यते, स यथा यदेतद् विद्युतो व्युद्युतदा ।।३।। इति आ इवार्थे यदेतच्छास्त्रेषु प्रकाशितं ब्रह्म विद्युतः व्युद्युतदा विद्योतनमिव सकृदात्मानं प्रदर्श्य तिरोभूतमिन्द्रात् इत्यनेन प्रकारेणादेश इत्यन्वयः। इति शब्दः समुच्चये तथा चायमपरस्तस्यादेशः कोऽसौ न्यमीमिषदा ।।३।।विद्युतमवलोकयतां यथा तडित् नेत्राणि निमेषयति तथा ब्रह्मापि पश्यतां देवानां चक्षु-र्निमेषं चक्रे इति देवताविषयक उपमान दृष्टान्तः ।।४।।

ब्रह्मणोऽभिव्यक्तिर्यथाध्यात्मिके तामाह अथेति—

अथाध्यात्मं यदेतद्गच्छतीव च मनोऽनेनचैतदुपस्मरति अभीक्ष्णं संकल्पः ।।५।।

अथाधिदैवादेशकथनानन्तरमध्यात्मं प्रत्यग् ब्रह्मादेशः कथ्यते यत् प्रकृतं ब्रह्मप्रत्यगात्मरूपं प्रति मनोऽन्तःकरणं गच्छतीव यातीव चिन्त-यते। च शब्दात् स्पृशतीव चानेन मनसा एतद् ब्रह्म उपस्मरतीवा-भेदेन स्मरति साधकः अभीक्ष्णं पुनः पुनः संकल्पः अहं साक्षात्करोमि इति साभिलाषो मनसैव भवतीति तात्पर्यार्थः ।।५।।

ब्रह्मवननाम्नोपासितं चेत्तस्य फलं कीदृशं भवतीति तद्धेत्याह :—

तद्ध तद्वनं नाम तद्वनमित्युपासितव्यम्। स य एतदेवं वेदाभिहैनं सर्वाणि भूतानि संवाञ्छन्ति ।।६।।

तद् ह प्रसिद्धं ब्रह्म तद् वनं सर्वव्यापि वननीयं सम्भजनीयं सर्वैः प्राणिभिरिति तद्वनमित्युच्यते । "वन, सम्भक्तौ" इतिस्मरणात् एतद् गुणाभिधे यस्य ब्रह्मण एतदभिधानेनोपासनेन सतताभ्यासेन च तत्सादृश्यं साधको लभते तत्फलं चाह— एवमुपासनशीलः कोऽपि साधकः पूर्वोक्तप्रकारकं ब्रह्म वेद उपासते एनं ह साधकं किल सर्वाणि भूतानि संवाच्छन्ति वनत्वेनाभिसेवन्ते च इत्यर्थः ।।६।।

इत्थं सगुणतत्त्वं श्रुत्वा शिष्यो गुरुं प्रति पुनः पृच्छति यद् हे गुरो ! किमपि श्रोतव्यमन्यदपि विद्यते न वेति आह उपनिषदमिति :—

उपनिषदं भो ब्रूहीत्युक्ता त उपनिषद् ब्राह्मीं वा व ते उपनिषदमब्रूमेति ।।७।।

भो गुरो ? उपनिषदं ब्रह्मविद्यां ब्रूहि कथय, एवं पृष्टे सति सम्पूर्णां ब्रह्मविद्यामुक्तवान् गुरुः । अन्यद् वक्तव्यं नास्ति, ब्रह्मविद्या प्रतिपाद्यं, सर्वमुपदिष्टं, ब्राह्मीं ब्रह्मसम्बन्धिनीमुपनिषदं रहस्यभूतां ते तुभ्यं अब्रूम ब्रह्मविद्यासिद्धान्तभूतान् सर्वान् वाव एव पदार्थान् वयं प्रतिपादितवन्तः इत्यर्थः ।।७।।

इदानीं विद्यासाधनीभूतान् तप आदीनाह—

तस्यै तपो दमः कर्मेति प्रतिष्ठावेदाः सर्वाङ्गानि सत्यमायतनम् ।।८।।

तस्यै तस्याः प्रसिद्धायाः पूर्वोक्ताया ब्रह्मविद्यायाः साधनानि तप आदीनि तपः "मनः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः" इत्यादि गीतोक्तम् । दमो वहिरिन्द्रियनिग्रहः, दमपदेन शमादिचतुष्टयसाधनानां ग्रहणं कार्यमुपलक्षणं चैतत् । कर्म अपराविद्याविषयकं स्वस्ववर्णाश्रमोद्देश्येन विहितं श्रौतं स्मार्तं च निष्कामतयानुष्ठितम्। प्रतिष्ठावेदा इति षष्ठीत्वेन विपरिणेयं तेन वेदानां प्रतिष्ठा आश्रयभूताब्रह्मविद्या "सर्वे वेदायत्पदमामनन्ति" इत्यादि निर्देशात् । सर्वाङ्गानि शिक्षा-व्याकरणादीनि । तदर्थान्येब । सत्यं सदाचरणं सत्यभाषणं वा । आयतनं प्रधानमेतानि साधनानि मुमुक्षुभिरनुष्ठेयानि ।।८।।

वेदानां प्रतिष्ठारूपां विद्यां यो वेद तस्य प्रयोजनं यो वेदेत्यादि—

यो वा एतामेवं वेदापहत्य पाप्मानमनन्ते स्वर्गे लोके ज्येये प्रतितिष्ठति प्रतितिष्ठति ।।६।।

योऽधिकारी वै प्रसिद्ध एतां केनेषितमित्यादि परमात्मविद्यामेवं वेद जानाति स पाप्मानमविद्यां संसारबीजमपहत्य विधूय पुनरावृत्तिरहिते स्वर्गे लोके स्वयं प्रकाशात्माके ब्रह्मणि भगवति उमानाथे शिवे ज्येये सर्वेभ्यो ब्रह्मविष्णुरुद्रादिदेवेभ्यः महत्तरे प्रतितिष्ठति अभयरूपांब्रह्मात्मैक्यलक्षणां प्रतिष्ठां लभते अभ्यासः समाप्त्यर्थः ।।इति।।

इति सामवेदीयतलवकारशाखोक्ता केनोपनिषद्
प्रकाशभाष्यसहिता सम्पूर्णा ।

कठोपनिषद्

ओं सह नाववतु । सह नौ भुनक्तु । सहवीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै । ओं शान्तिः शान्तिः शान्तिः ॥

प्रकाशभाष्यम्

मृत्युना ग्रस्तमखिलं नामरूपात्मकं जगत् ।
ब्रह्मतत्त्वं परिज्ञाय मुच्यते योगसंश्रयः ॥

इयं काठकशाखीया कृष्णयजुर्वेदान्तर्गता उपनिषत् यमनचिकेतसोः संवादरूपेणोपदिष्टा । ब्रह्मविद्यायाः स्वरूपं सम्यग् दर्शयन्ती-विषयसम्वन्धप्रयोजनाधिकार्यादितत्त्वं निरूपयन्ती सर्वोत्कर्षेण वर्तते । कर्मविद्या, श्रद्धा तप आदीनि विद्याप्राप्तये वहिरङ्ग साधनानि, वैराग्यं च मुख्यं साधनमेभिर्युक्तोऽधिकारी सद्गुरोः कृपातः परमं तत्त्वं झटिति बोद्धुं समर्थो भवति, इति सर्वं रहस्यं प्रथमवल्ल्युपदेशेन गम्यते । अस्या विद्याया आचार्यो वैवस्वतो यमो मृत्युरिति उक्तं च—"वैवस्वतं सङ्गमनं जनानां यमं राजानं हविषा दुवस्य" (ऋ० सं० ८-६-२४-१) । "यमो यच्छतीति सतः" इति निरुक्तम्, सर्वेषां प्राणिनां नियामको देवो मृत्योरधिष्ठाता प्रसिद्धः शास्त्रेषु मरणान्तरमात्म विषये महान् सन्देहो विद्यते यदात्मनःसत्ता स्वीकर्तव्या न वेति । नास्तिका आत्मवादं तिरस्कुर्वन्तो मरणमेव मोक्षं मन्यन्ते । आस्तिका स्तु मरणं शरीरस्यैवाभ्युपगच्छन्ति, तस्माज् जिज्ञासूनामेताभ्यां जिज्ञासा विषयक समाधिर्दुःशक्य इत्येतत् समाधातुं यम एव समर्थ इति कृत्वा आचार्यत्वेन वरणं समीचीनं प्रतिभाति । वस्तुतो यमेनैवोपदेष्टुं शक्योऽयं विषयो नान्येनेति आशयोऽग्रे ग्रन्थनिरूपणावसरे स्फुटी भविष्यति ।

प्रथमत आख्यायिकया आरभ्यते उशन्नित्यादि :–

उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ ।
तस्य ह नचिकेता नाम पुत्र आस ॥१॥

त ७ँ कुमार ७ँ सन्तं दक्षिणासु नीयमानासु श्रद्धाऽऽविवेश सोऽमन्यत ॥२॥

उशन् कामयमानः "वशकान्ताविति निष्पन्नत्वात्" ह् वै प्रसिद्धार्थकौ वाजश्रवसः वाजमन्नं तद्दानहेतुकः श्रवो यस्य तस्यापत्यं पुमान् वाजश्रवसः, सर्ववेदसं सर्वस्वदक्षिणं ददौ विश्वजिद् यागमनुतस्थावित्यर्थः। तस्य नचिकेता नामकः पुत्र आस आसीत् ॥१॥

तं ह कुमारमल्पवयस्कमपि सन्तं श्रद्धा आस्तिक्यबुद्धिः दक्षिणासु ऋत्विगादियाजकेभ्यो नीयमानासु दीयमानासु गोषु सतीषु आविवेश आविर्बभूव सोऽमन्यत विचारितवान् ॥२॥

पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः।
अनन्दा नाम ते लोका तान् स गच्छति ता ददत् ॥३॥

पीतोदकाः पीतमुदकं याभिस्ताः, जग्धतृणा जग्धं भक्षितं तृणं याभिस्ता, निरिन्द्रियाः शिथिलावयवा गावस्ता ददद् यजमानो अनन्दा नाम असुखरूपप्रसिद्धा ये लोकास्तान् गच्छति दक्षिणावैगुण्येन वाञ्छितान् प्राप्तुं यजमानो विफलाभिलाषो भवति इत्यभिप्रायः—"मन्त्रहीनमदक्षिणमिति" स्मृतेः। दक्षिणासु गावः पुष्टाः सर्वाङ्गसम्पन्ना एव दातव्या इत्यर्थः। केचिदेवं व्याख्यान्ति यद् वाजश्रवसः व्यर्था वृद्धा गा ऋत्विग्भ्यो दत्वा समर्थाः स्वकार्योपयुक्ताः स्वधनत्वेन मत्वा ता अप्रदाय यज्ञवैगुण्यमाचचार इति दृष्ट्वा नचिकेतसं श्रद्धोत्पन्ना। एवं स्वीकृते वाजश्रवस्याचरणे मिथ्याचारस्य सम्भवाच्छिष्टविगर्हणा प्राप्यते, श्रुतिष्वस्यार्थस्याऽनुपलम्भाच्च। ननु पीतोदका जग्धतृणा इत्यादिना पूर्वोक्तोऽर्थः सिध्यति इति चेन्न दक्षिणादानमात्रोपक्रान्तत्वादित्यर्थस्य संगतिः। अथ चैवंभूतागावस्तेन प्रतिपादिता यदि मन्येत तर्हि अर्थकार्श्यादिं हेतुकमेव कथंचित् स्यात् न पुनर्लोभनिमित्तकमिति सर्वमनवद्यम् ॥३॥

एतन्मत्वा नचिकेता अब्रवीत् यत्पुत्रोऽपि पितृस्वत्वेन तदधीनः, सर्वस्वदक्षिणं यज्ञमयष्ट मामकः पिता। परन्तु मां तु नादात् कस्मैचिदिति वक्तुं प्रक्रान्तः सहोवाचेतिः—

स होवाच पितरं तत कस्मै मां दास्यसीति ।
द्वितीयं तृतीयं तꣳ होवाच मृत्यवे त्वाददामीति ।।४।।

स नचिकेता पितरं गौतमं ह उवाच उक्तवान् । बाल्यकालोचितेन भाषणेन ततेति सम्बोध्य तातेत्यस्य रूपमिदं मां तावकीनं पुत्रं कस्मै याजयित्रे दास्यसीति एवमेव तं द्वितीयं तृतीयं होवाच । तेनापातमात्रं क्रुद्धः सन् उवाच ऋषिर्यं त्वां मृत्यवे ददामीति दास्यामि । यद्यपि पुत्रः पितुरनुसरणशीलो भवति अधिकारश्च तदुपरि तस्यैव तथापि दानं तस्य निषिद्धमेव उक्तं च यास्केन—"स्त्रीणां दानविक्रियातिसर्गा विद्यन्ते न पुंसः" (नि० ३-४-३) । क्रोधकरणेऽयं शास्त्रीयो हेतुः ।।४।।

स्वीयं मृत्यवे प्रदानं श्रुत्वा नचिकेता विचारयामास यत् पिता कथमेवमवोचत् यतः—

बहूनामेमि प्रथमो बहूनामेमि मध्यमः ।
किंस्विद् यमस्य कर्तव्यं यन्मयाद्य करिष्यति ।।५।।

बहूनां पुत्राणां शिष्याणां वा मध्ये प्रथम एमि अस्मि तथा मध्यमानां मध्ये मध्यम एमि कनिष्ठो नाहं, तथापि मम पिता मां कथं परित्यक्तवान् अवश्यमेव क्रुद्धेनैतदविचारितमनुष्ठितम् । मया प्रदानेन मम दानेन यमस्य किंस्वित् कर्तव्यं भवविष्यति यन्मम पिता करिष्यति सम्पादयिष्यति अर्थात् किमपि नास्ति ।।५।।

मम पिता अवश्यं सत्यवचनः कर्तव्य इति मनसि कृत्वा स पितरमाश्वासयन्नाह अनुपश्येति :—

अनुपश्य यथा पूर्वे प्रतिपश्य तथापरे ।
सस्यमिव मर्त्यः पच्यते सस्यमिव जायते पुनः ।।६।।

हे पितः ! इदानीमहं मृत्युमभिगच्छामि इति विचार्य त्वया शोको न कार्यः, यतः पुत्रस्यातिप्रियत्वादिति हेतोस्त्वया संतोष्टव्यं संसारस्य गतिरेतादृश्येव यतोऽत्रागतस्य विप्रयोगोऽपरिहार्य एव, पूर्वे येऽस्मत्तः आसन् ते साम्प्रतं कुत्र अगमन्निति निश्चेतुमशक्य इत्यनुपश्य विमृश । तथाऽपरेऽपि एवमेव भविष्यन्ति इति प्रतिपश्य निश्चिनु । यथा क्षेत्रे सस्यं जायते पच्यते लूयते च तद्वन्मर्त्यमपि जानीहि मरणं दुर्वारमेव ;

अवादीच्च भगवान् वासुदेवः—"जातस्य हि ध्रुवोमृत्युर्ध्रुवं जन्म मृतस्य च।" इत्थमेवानिशं प्रवर्तते मृत्युचक्रमिति ज्ञेयम् ॥६॥

एवमात्मसत्यतायै गौतमः स्वप्रियं पुत्रं यमसमीपं प्रेषयामास, पुत्रोऽपि वैवस्वतं लोकं जगाम। तत्र गत्वा रात्रित्रयमुवास। निवसतस्तस्य आतिथ्यादिकं नैव यमश्चक्रे। तद् दृष्ट्वा तस्य शुभचिन्तका ऊचिरे यदतिथिः सर्वैः पूज्यो भवति तथापि त्वया नायं सत्कृतस्तेनानिष्टागमनं सम्भाव्यते इत्यवश्यकर्तव्यतां श्रुतिराह वैश्वानर इति :—

वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहान्।
तस्यैतां शान्तिं कुर्वन्ति हर वैवस्वतोदकम् ॥७॥

ब्राह्मणो ब्राह्मणत्वजातिविशिष्टोऽतिथिर्वैश्वानर अग्निस्वरूपः सन् गृहान् गृहस्थान् प्रविशति आगच्छति, तस्मात् हे वैवस्वत यम! तस्यैतां शान्तिं कुरु, उदकं पाद्याद्यार्थं हर आनय, उदकेनैवाग्निः शाम्यति आतिथ्योपचारेण प्रवृद्धतिग्मतामस्य शमयेति भावः ॥७।

यथाग्निः प्रज्वलितो दहति एवमेवातिथिः सपरिवारं गृहस्थमधो नयते यदनर्चितस्तद्गृहान्निवर्तते इत्याशयमाह आशा प्रतीक्षे इति :—

आशाप्रतीक्षे संगतꣳ सूनृतां चेष्टापूर्ते पुत्रपशूंश्च सर्वान्।
एतद् वृङ्क्ते पुरुषस्याल्प मेधसो यस्यानश्नन्वसति ब्राह्मणो गृहे ॥८॥

आशास्यत इति आशा अनिश्चितफलप्राप्तावभिलाषा, निश्चिते प्रतीक्षा ते उभे संगतं सम्प्रातं सूनृतां प्रियसत्यभाषणजं फलं च इष्टापूर्ते इष्टं श्रौतानुष्ठानफलं पूर्तं स्मार्तं वापीकूपादिनिर्माणजन्यं ते उभे पुत्राः आत्मजाः पशवश्च तान् सर्वान् वृङ्क्ते नाशयति, यस्याल्पमेधसः मूढस्य गृहे ब्राह्मणोऽतिथिः अनश्नन् अभुञ्जानः सन् वसति तस्मादवश्यमेवातिथिपूजनंकार्यमुक्तं च मनुना—"अतिथिर्यस्य भग्नाशो गृहात् प्रति निवर्तते। स तस्मै दुष्कृतं दत्वा पुण्यमादाय गच्छति।" इति ॥८॥

स्वशुभचिन्तकैरुक्तो यमः नचिकेतसमाह तिस्रोरात्रीरिति :—

तिस्रो रात्रीर्यदावात्सीर्गृहे मेऽनश्नन्नतिथिर्नमस्यः।
नमस्तेऽस्तु ब्रह्मन् स्वस्ति मेऽस्तु तस्मात् प्रति त्रीन् वरान् वृणीष्व ॥९॥

हे ब्रह्मन् ? यत् यस्मात् हेतोः अतिथिर्नमस्यो नमस्कार्यस्तथा त्वं मे गृहे तिस्रो रात्रीरवात्सीः उषितवानसि अभुञ्जानः सन्। ते तुभ्यं नमः नमस्कारोऽस्तु, मे मह्यं स्वस्ति कल्याणं भवतु। तस्मात् कारणात् प्रतिरात्रिवासहेतुकान् त्रीन् वरान् स्वाभिलषितपदार्थान् वृणीष्व वरय, तद्दोषं निराकर्तुमुद्यतोऽहमित्यभिप्रायः ।।९।।

यमेनैवमुक्ते नचिकेता आह शान्तसंकल्प इति :—

शान्तसंकल्पः सुमना यथा स्याद् वीतमन्युर्गौतमो माभिमृत्यो।
त्वत्प्रसृष्टं मामभिवदेत् प्रतीत एतत् त्रयाणां प्रथमं वरं वृणे ।।१०।।

हे मृत्यो ? गौतमः मम पिता मामभिप्रतिशान्तसंकल्पः शान्तो निवृत्तः संकल्पः यस्य स ; यमं प्रति प्रस्थितस्य नचिकेतसः किमात्मकं वृत्तान्तमिति विविदुषस्तस्य चिन्तानिवृत्तिर्यथास्यात् सुमना प्रसन्नचेता वीतमन्युः क्रोधरहितश्च यथा स्यात् तथा त्वत्प्रसृष्टं प्रेषितं मां प्रति वदेत् भाषेत, एतत् त्रयाणां मध्ये प्रथमं वरं वृणे याचे। प्राप्तकालस्यैव तत्र वासस्त्वत्प्रसृष्टमित्यनेन ज्ञायते विद्याप्राप्त्यर्थमेव वैवस्वतं गतः पुनरागमनस्य प्रतीतेः ।।१०।।

एवमुक्ते यम आह—

यथा पुरस्तात् भविता प्रतीत औद्दालकिरारुणिर्मत्प्रसृष्टः। सुखं रात्रीः शयिता वीतमन्युस्त्वां ददृशिवान् मृत्युमुखात् प्रमुक्तम् ।।११।।

हे नचिकेतः ! औद्दालकिः आरुणिस्तव पिता यथा पुरस्तात् इतः पूर्वमासीत् तथा भविता भविष्यति मत्प्रसृष्टः मत्प्रेरितं त्वां दृष्ट्वा स्वाभाविकेन स्नेहेन यथा पूर्वमासीत् तथा भविष्यतीत्यर्थः मृत्युमुखात् प्रमुक्तं रहितं त्वां ब्रह्मविद्ययैव मृत्युं तरति इति सूचितमनेन। वीतमन्युः क्रोधरहितः सन् ददृशिवान् द्रक्ष्यति यथा पूर्वं तव प्रश्नेन क्रुद्धस्तथा न भविष्यति तथा रात्रीः सुखं शयिता स्वप्स्यतीति ।।११।।

स्वर्गसाधनमग्निं पृच्छन् प्रथमं स्वर्गलक्षणमाह स्वर्गेलोक इति :—

स्वर्गे लोके न भयं किञ्चनास्ति न तत्र त्वं जरया बिभेति।
उभे तीर्त्वा अशनायापिपासे शोकातिगो मोदते स्वर्गलोके ।।१२।।

स्वर्गे लोके कर्मलभ्ये स्थानविशेषे किंचनभयं नास्ति तत्र न त्वं मृत्युस्तथा जरया वार्धक्येन न विभेति। तत्र गतस्य जनस्य क्लेशादि-रहितत्वमित्यर्थः।

अशनायापिपासे क्षुधातृषे उभे तीर्त्वा अतिक्रम्य शोकातिगः शोकरहितः सन् मोदते यज्ञानुष्ठितकर्मफलानि भुञ्जान ऐश्वर्यानन्द-भाग् भवतीत्यर्थः ॥१२॥

द्वितीयं वरं प्रार्थयमानाह स त्वमिति :—

स त्वमग्निꣳ स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तꣳ श्रद्दधानाय मह्यम्।
स्वर्गलोका अमृतत्वं भजन्त एतद्द्वितीयेन वृणे वरेण ॥१३॥

हे मृत्यो ? त्वं स्वर्ग्यं स्वर्गसाधकमग्निमध्येषि वेत्सि स त्वं तमग्निं श्रद्दधानाय श्रद्धावते मह्यं नचिकेतसे प्रब्रूहि कथय ; येन साधनीभूतेन अग्निना कर्मिणः अमृतत्वमाभूतसंप्लवं स्थानं भजन्ते प्राप्नुवन्ति एतद्द्वितीयेन वरेण वृणे प्रार्थये ॥१३॥

एवमुक्ते सति यम आह प्रेति :—

प्र ते ब्रवीमि तदु मे निबोध स्वर्ग्यमग्निं नचिकेतः प्रजानन्।
अनन्तलोकाप्तिमथो प्रतिष्ठां विद्धि त्वमेतन्निहितं गुहायाम् ॥१४॥

हे नचिकेतः ! स्वर्ग्यमग्निं स्वर्गसाधनीभूतमग्निं प्रजानन् विज्ञात-वानहं उ यत्त्वया प्रार्थितं तत्ते तुभ्यं प्रब्रवीमि "व्यवहिताश्च" इति व्यवहितेन निर्देशः कथयामि तत्त्वं निबोध अवहितेन चेतसा निश्चिनु अनन्तलोकाप्तिं चिरस्थायिवासनिमित्तकं तदथो प्रतिष्ठां तदधि-ष्ठातृदेवात्मकप्रदानकमेतमग्निं मया कथ्यमानं गुहायामत्यन्तरहस्य-भूते निहितं स्थितं जानीहि ॥१४॥

एवं स्वर्गसाधनीभूतमग्निं संस्तूय तदुपदिशन्नाह लोकादिमिति :—

लोकादिमग्निं तमुवाच तस्मै या इष्टका यावतीर्वा यथा वा।
स चापि तत्प्रत्यवदत् यथोक्तमथास्य मृत्युःपुनरेवाह तुष्टः ॥१५॥

लोकादिं लोकस्य आदिं सर्वश्रेष्ठत्वप्रापकमग्निं तं तस्मै नचिकेतसे उवाच उक्तवान्, या इष्टका चेतव्या यावतीर्वा यावत् संख्याका यथा वा येन प्रकारेण मृत्युना उक्तं तथैव स प्रत्यवदत् अग्रहीत्। यथोक्तं

गृहीतं दृष्ट्वा अस्य नचिकेतसः अधिकारितामवेक्ष्य तुष्टः सन् मृत्युर्यमः पुनरेवाह अयाचितं वरं दातुमुपक्रान्तवान् इत्यर्थः ॥१५॥

तदेवाहः—

तमब्रवीत् प्रीयमाणो महात्मा वरं तवेहाद्य ददामि भूयः ।
तवैव नाम्ना भवितायमग्निः सृङ्कांचेमामनेकरूपां गृहाण ॥१६॥

प्रीयमाणः प्रसन्नः स महात्मा यमस्तं नचिकेतसमब्रवीत् । तव तुभ्यमिह भूयः पुनः अद्येदानीं मम प्रसन्नताहेतुकमपरं वरं ददामि यदयमग्निस्तवैव नाम्ना जगति भविता ख्यातिं गमिष्यति इमामनेकरूपां सृङ्काम् अनेकरत्नगुम्फितां मालां च गृहाण स्वीकुरु । अथवा सृङ्का कर्ममार्गसृतिः तदवबोधनप्रकारः यथाकर्मविज्ञानसम्पन्नः सन् फलातिशयित्वमधिगच्छति अध्ययनप्रकार इज्याप्रकारः दानप्रकारश्चेत्यादि ॥१६॥

कर्म स्तुवन्नाह—

त्रिणाचिकेतस्त्रिभिरेत्य सन्धिं त्रिकर्मकृत्तरति जन्ममृत्यू ।
ब्रह्मजज्ञं देवमीड्यं विदित्वा निचाय्येमा ँ शान्तिमत्यन्तमेति ॥१७॥

त्रिः त्रिवारं चितः सम्पादितो नचिकेतोऽग्निर्येन स त्रिणाचिकेतः त्रिभिर्मातृपितृआचार्यैः वेदस्मृतिशिष्टाचारैः प्रत्यक्षानुमानागमैर्वा सन्धिं प्राप्य प्रापकभावसम्बन्धमेत्य ज्ञात्वा त्रिकर्मकृत् इज्याध्ययनदानकृत् जन्ममृत्यू जन्ममरणे तरति अतिक्रामति । ब्रह्मजज्ञं ब्रह्मवेदस्तस्माज्जायते इति ब्रह्मजं "कर्म ब्रह्मोद्भवं विद्धि" इति स्मृतेः । तज्जानातीति, कर्मफलप्रदातृत्वेन तं देवं द्योतनात्मकं; ईड्यम् ऋगादिभिः स्तुत्यं विदित्वा शास्त्रतो ज्ञात्वा निचाय्य आत्मभावेन साक्षात्कृत्य इमां सिद्धां मोक्षाख्यां शान्तिमत्यन्तं संसृतिनिवृत्तिरूपाम् एति प्राप्नोति । एककालावच्छेदेन ज्ञानकर्मणोरभावात् क्रमेण अद्वैतनिष्ठां लभते सिद्धश्चेत्तदा कर्म कुर्वन्नपि अद्वैतभावस्याविस्मृतेर्न कापि क्षतिः ॥१७॥

फलमुपसंहरति त्रिणाचिकेत इति :—

त्रिणाचिकेतस्त्रयमेतद् विदित्वा य एवं विद्वाँश्चिनुते नाचिकेतम् ।
स मृत्युपाशान् पुरतः प्रणोद्य शोकातिगो मोदते स्वर्गलोके ॥१८॥

त्रिणाचिकेतस्त्रयं पूर्वोक्तं या इष्टका यावतीर्वा इति विदित्वा सम्यगनुष्ठाय स्वात्माभेदेन ज्ञात्वा य एवं विद्वान् नाचिकेतमग्निं चिनुते सम्पादयति स मृत्युपाशान् अहं ममाभिमानरूपान् पुरतः ज़ीवनकाल एव प्रणोद्य त्यक्त्वा शोकातिगः शोकरहितः सन् स्वर्गलोके मोदते आनन्दमनुभवतीत्यर्थः ।।१८।।

एतदुपसंहरन्नाह एष इति :—

एष तेऽग्निर्नचिकेतः स्वर्ग्यो यमवृणीथा द्वितीयेन वरेण ।
एतमग्निं तवैव प्रवक्ष्यन्ति जनासस्तृतीयं वरं नचिकेतो वृणीष्व ।।१६।।

हे नचिकेतः ! द्वितीयेन वरेण यम् अवृणीथाः याचितवानसि स एष स्वर्ग्योऽग्निः स्वर्गप्रापकस्ते तुभ्यं मयोपदिष्टः एतमग्निं जनासः विद्वांसः तवैव नाम्ना नचिकेतमिति प्रवक्ष्यन्ति व्यवहरिष्यन्ति। मया तुष्टेन एष वरो दत्तः अतः परं तृतीयं वरं वृणीष्व याचस्वेत्यनुमतिः ।।१६।।

वरद्वयस्य ज्ञानं सम्पाद्य तस्य चानित्यत्वं निश्चित्य मोक्ष-विषयिणीं जिज्ञासामवतारयन् तृतीयं वरं आत्मयाथात्म्यज्ञानरूपं याचते येयमिति—

येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके ।
एतद् विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः ।।२०।।

मनुष्ये प्राणिनि प्रेते मृते सति येयं विचिकित्सा संशयः अस्ति तन्निर्णयार्थं भवन्तं पृच्छामीत्यर्थः। एके आस्तिकाः मरणान्तरमात्म सद्भावं मन्यन्ते, मरणं शरीरस्यैवेति।। अपरे नायमस्ति शरीरादि-संघातातिरिक्तमात्मतत्त्वं नास्ति अतो मृते तस्मिन् सोऽपि मृत एव भवति। इति उभयकोटयवगाहित्वात् संशयस्वरूपोऽवगम्यते अतस्त्वया गुरुणा अनुशिष्टः शिक्षितोऽहमेतद् विद्याम् विजानीयाम् तथा भवान् उपदिशतु एष वराणां त्रयाणां मध्ये तृतीयो वरो वरणीयः प्रार्थनीय इति ।।२०।।

परीक्षितायैव शिष्याय ब्रह्मविद्या प्रदातव्येति संप्रदायानुसारं नचिकेतसं परीक्षयन् मृत्युराह देवैरिति :—

देवैरत्रापि विचिकित्सितं पुरा नहि सुविज्ञेयणुरेष धर्मः ।
अन्यं वरं नचिकेतो वृणीष्व मामोपरीत्सीरतिमासृजैनम् ।।२१।।

हे नचिकेतः? अत्र आत्मास्तित्वे नास्तित्वे च देवैरपि पुरा पूर्वं विचिकित्सितं संशयितं सर्वसाधनसम्पन्नानामपिचेत् संशयस्तर्हि अल्पज्ञानां मनुष्याणां कैव कथेति भावः। हि यतः न सुविज्ञेयम् ब्रह्मतत्त्वं बाह्योपायेन ज्ञातुमशक्यम् एष धर्मोऽणुः सूक्ष्मः बुद्ध्यानिश्चेतुं दुःशक्यमित्यर्थः। अत एतदात्मज्ञानादन्यं भिन्नं वरं वृणीष्व याचस्व मा माउपरोत्सीः, एतद्विषये निर्बन्धं मा कार्षीः, मां प्रति एनं वरं अतिसृज मुञ्चेत्यर्थः ।।२१।।

एवमुक्ते नचिकेता आह देवैरिति :—

देवैरत्रापि विचिकित्सितं किल त्वं च मृत्यो यन्न सुविज्ञेयमात्थ ।
वक्ताचास्य त्वादृगन्योनलभ्यो नान्यो वरस्तुल्य एतस्य कश्चित् ।।२२।।

हे मृत्यो! अत्र पूर्वोक्तविषये देवैः सर्वसाधनसम्पन्नैरपि विचिकित्सितं संशयितं किल निश्चितमेतत् त्वं च यन्न सुविज्ञेयमात्थ सौलभ्येन ज्ञातव्यं नास्तीति कथयसि इति सर्वं सत्यं मन्ये तथापि अस्यमत्पृष्टविषयस्य वक्ता उपदेष्टा त्वादृगन्यः त्वत्सदृशः कुत्रापि न लभ्यः न प्राप्तुं शक्यः, यतो भवान् जननमरणयोरधिष्ठाता जननं मरणं कस्य भवति इति सम्यग् जानाति अन्यस्तु कश्चिदपि एतत्तत्वज्ञो नास्ति, अत एव एतस्य वरस्य तुल्यः पूर्वोक्तः कोऽपि वरो नास्ति, यतः पूर्वोक्तयोर्वरयोः प्रदाता भवदन्योऽपिस्यात् परन्तु एतस्य तु भवानेव, अत एव एतेन तुल्यः कोऽपि वरो नास्त्येवेत्यभिप्रायः ।।२२।।

लोभस्याविद्यामूलत्वादतस्तन्निमित्तं परीक्षणं विना विद्याधिकारिता न भवतीति प्रलोभयन्नाह शतायुष इति :—

शतायुषः पुत्रपौत्रान् वृणीष्व बहून् पशून् हस्तिहिरण्यमश्वान् ।
भूमेर्महदायतनं वृणीष्व स्वयं च जीव शरदो यावदिच्छसि ।।२३।।

शतायुषः पूर्णायुष्यजीविनः पुत्रान् पौत्रान् च वृणीष्व प्रार्थयस्व तथा बहून् पशून् गवादीन् हस्तिहिरण्यं गजान् काञ्चनं च तथा अश्वान् हयान् भूमेः पृथिव्या महदायतनं विस्तृतसाम्राज्यं च वृणीष्व ।

स्वयं च यावत् शरदः बर्षाणि जीवितुमिच्छसि तावद् जीव, एतत् सर्वं दातुमहं समर्थ इत्यर्थः ।।२३।।

अन्यच्च—

एतत्तुल्यं यदि मन्यसे वरं वृणीष्व वित्तं चिरजीविकां च।
महाभूमौ नचिकेतस्त्वमेधि कामानां त्वा कामभाजं करोमि ।।२४।।

यदि चेत् एतत्तुल्यं मयोक्तेन तृतीयवरेण सदृशमपरं मन्यसे तमपि प्रार्थय यथावित्तं महार्घ्यरत्नादिचिरजीविकां बहुकालपर्यन्तं जीवनं च किं बहुना, हे नचिकेतः! महाभूमौ त्वं राजा एधि भव, कामानां काम्यपदार्थनां मध्ये यस्तव प्रार्थनीयः स्यात् तद्भाजं भागिनं त्वा त्वां करोमि ।।२४।।

अन्यच्च—

ये ये कामा दुर्लभा मर्त्यलोके सर्वान् कामान् छन्दतः प्रार्थयस्व । इमा रामाः सरथाः सतूर्या नहीदृशा लम्भनीया मनुष्यैः । आभिर्मत्प्रत्ताभिः परिचारयस्व नचिकेतो मरणं मानुप्राक्षीः ।।२५।।

मर्त्यलोके अस्मिन् संसारे ये ये दुर्लभा असामान्याः कामाः प्रार्थनीया विषया विद्यन्ते, तान् सर्वान् कामान् छन्दतः स्वेच्छया प्रार्थयस्व याचस्व, इमाः पुरोवर्तिन्य रामा रमण्यः रथैः सह विद्यमाना वादित्रयुक्ताश्च ईदृशा उक्तलक्षणा मनुष्यैर्मत्यलोकवासिभिर्जनैर्न लम्भनीयाः प्राप्तव्याः। हे नचिकेतः! मत्प्रत्ताभिमद्दत्ताभिः आभीरामाभिः परिचायस्व स्वशुश्रूषां कारयस्व मरणं मरणविषयकं "येयं प्रेते विचिकित्सेत्यादि" मानुप्राक्षीः प्रश्नं मा कार्षीः व्यर्थत्वात् । ईदृशमैश्वर्यमेव मनुष्यलोकस्य भोक्तव्यत्वेन इष्टमात्मविषयिणी जिज्ञासा करटदन्तपरीक्षावत् व्यर्थेत्यर्थः ।।२५।।

एवं प्रलोभ्यमानोऽपि नचिकेता विषयाणां क्षणिकत्वं दुःखपरिणामित्वं च प्रतिपादयन् स्वस्य विषयवैराग्यं च सूचयन् श्वभावा इत्याह—

श्वभावामर्त्यस्य यदन्तकैतत् सर्वेन्द्रियाणां जरयन्ति तेजः ।
अपि सर्वं जीवितमल्पमेव तवैव वाहास्तव नृत्यगीते ।।२६।।

हे अन्तक यम! भवता ये विषया मह्यं प्रदातुमुपक्राम्यन्ते ते सर्वे श्वभावाः क्षणिकाः एतत् एतत्सेविनो मर्त्यस्य सर्वेन्द्रियाणां तेज

स्वस्वविषयोपयुक्तव्यवहर्तव्यसामर्थ्यं जरयन्ति नाशयन्ति। मरणान्तं ध्रुवमिति सर्वं जीवितमल्पमेव अपि निश्चयार्थे अत एव तवैव वाहा अश्वादयः नृत्यगीते च तवैवास्तु अशाश्वतत्वादेषामेषु रतिं कर्तुं नेच्छामीत्यर्थः।२६।

अन्यच्च—

न वित्तेन तर्पणीयो मनुष्यो लप्स्यामहे वित्तमद्राक्ष्म चेत्त्वा।
जीविष्यामो यावदीशिष्यसि त्वं वरस्तु मे वरणीयः स एव॥२७॥

मनुष्यो वित्तेन भोगपदार्थेन न तर्पणीयः नो तृप्तिमुपयाति, वयं नेत्रैर्भवन्तमद्राक्ष्म दृष्टवन्तः चेद् यतः वित्तं लप्स्यामहे प्राप्स्यामः। त्वं यावत्कालम् ईशिष्यसि अस्य लोकस्य शास्ता भविष्यसि तावद् जीविष्यामः प्राणान् धारयिष्याम इत्यत्र सन्देहोऽपि नास्त्येव मयि तव कृपालुत्वात्। अतः मे मया स एव वरो "येयमित्यादि" पूर्वोक्तो वरणीय इति॥२७॥

विषयाणां जीवितस्य च क्षणिकत्वमाह—अजीर्यतामिति :—

अजीर्यताममृतानामुपेत्य जीर्यन् मर्त्यः क्वधःस्थः प्रजानन्।
अभिध्यायन् वर्णरतिप्रमोदानतिदीर्घे जीविते को रमेत॥२८॥

मर्त्यो मनुष्यः अजीर्यतां जरारहितानाममृतानां चिरस्थायिनां देवानाम् उपेत्य सामीप्यं लब्ध्वा प्रजानन् तेभ्य उत्कृष्टफलसम्भव-मनुभवन् कथं निकृष्टं वरान्तरं प्रार्थयेत। क्वधःस्थः मर्त्यलोकवासी जनः वर्णरतिप्रमोदान् सौन्दर्यरतिक्रीडासुखान् अभिध्यायन् येषां वास्त-विकीं स्थितिं पश्यन् विनाशित्वादेषामतः अतिदीर्घे बहुकालस्थायिनि जीविते जीवने को रमते न कोपीत्यर्थः॥२८॥

अत एभिः क्षणिकपदार्थैः मा मां भ्रामयतु अहं तु तदेव प्रार्थये इत्याह नचिकेता यस्मिन्निति—

यस्मिन्निदं विचिकित्सन्ति मृत्यो यत्साम्पराये महति ब्रूहि नस्तत्।
योऽयं वरो गूढमनुप्रविष्टो नान्यं तस्मान्नचिकेता वृणीते॥२९॥

हे मृत्यो यम! यस्मिन् महति साम्पराये अति गहने आत्मविषये देवा अपि विचिकित्सन्ति संशेरते, तदेव नः अस्मभ्यं ब्रूहि उपदिश यो

ऽयं तृतीयो वरो गुढ़मनुप्रविष्टः गुह्यतमत्वेनोक्तस्तस्मादन्यं भिन्नं वरं नचिकेता तव शिष्यो न वृणीते न प्रार्थयते इत्यर्थः ॥२६॥

इति प्रथमवल्लीप्रकाशभाष्यं समाप्तम्

बहुभिः प्रलोभनैर्नचिकेतसं सम्यक् परीक्ष्य तस्यात्मविद्याधिकारित्वमवेक्ष्य यम आह—अन्यदिति :—

अन्यच्छ्रेयोन्यदुतैव प्रेयस्ते उभे नानार्थे पुरुष ँ सिनीतः।
तयोः श्रेय आददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते ॥१॥

श्रेयः मोक्षहेतुर्विद्या, तत्फलमन्यदेव भिन्नमेव। तथा प्रेयः अभ्युदयकारणं कर्म अविद्या उत पृथगेव। विद्याविद्ये नानार्थे भिन्नफले पुरुषं स्वाधिकारिणं सिनीतः बध्नीतः स्वाधिकारानुसारम्। तयोर्विद्याविद्ययोः श्रेय आददानस्य श्रेयोमार्गानुवर्तिनः साधु भवति कल्याणं जायते, य उ प्रेयो वृणीते कामयते स अर्थाद् वास्तविकमोक्षसुखाद् हीयते रहितो भवति ॥१॥

विद्यातत्त्वमैक्यबोधकं कारणपरं निःश्रेयसफलम्। अविद्यातत्त्वं तु किंचिज्ज्ञत्वरूपं प्रेयःपदवाच्यमैहिकं स्वर्ग्यं च भोग्यजातं तदन्तर्गतं भवति पुनः पुनर्जन्ममरणलक्षणम् "नेह नानास्ति किंचन" "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" इति प्रमाणात् उपासनापरमपि विद्यातत्त्वं श्रूयते तदपि नार्थान्तरं भवति फलैक्यात्। अतएव विद्याविद्ये इतिभेदद्वैविध्यं संगच्छते।

श्रेयःप्रेयसी समानरूपेण पुरुषं प्राप्ते भवतःतथापि धीरो विद्वान् श्रेय एव गृह्णाति नित्यफलत्वात् प्रेयसि मन्दस्यैव प्रवृत्तिरित्याह-श्रेयश्चेति :—

श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः।
श्रेयो हि धीरोऽभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते ॥२॥

श्रेयो मोक्षः प्रेयोऽभ्युदयो मनुष्यमधिकारिणं समानरूपेण एतः प्राप्नुतः। तौ श्रेयःप्रेयसी धीरः स्थितप्रज्ञः सम्परीत्य सम्यग् विविच्य आलोच्य प्रेयसोऽभ्युदयसुखात् श्रेयो नित्यं सुखमभिवृणीते स्वीकरोति। मन्दो ऽज्ञः योगक्षेमाद् निमित्तात् प्रेयो वृणीते इति ॥२॥

अनेकैः पदार्थैः प्रलोभ्यमानोऽपि त्वं प्रेयःपदार्थान् सर्वान् त्यक्तवानसि इत्यग्रिममन्त्रेणाह—स त्वमिति —

स त्वं प्रियान् प्रियरूपाँश्च कामानभिध्यायन् नचिकेतोऽत्यस्राक्षीः ।
नैतां सृङ्कां वित्तमयीमवाप्तो यस्यां मज्जन्ति बहवो मनुष्याः ॥३॥

स त्वं पुनः पुनर्मया दीयमानान् प्रियान् पुत्रादीन् प्रियरूपान् रामादिलक्षणान् कामान् विषयान् चिन्तयन् अनित्यत्वेन विनाशित्वं तेषां निश्चिन्वन् हे नचिकेतः ! अत्यस्राक्षी : त्यक्तवानसि इति प्रशंसयन्नाह—एतां सृङ्कां सृतिं कर्ममयीमज्ञजनसेवितां वित्तमयीं भोग्यप्रधानां न प्राप्तोऽसि यस्यां बहवो मज्जन्ति प्रायेण सर्वं एव संसारिणोऽवसीदन्ति तदुत्तीर्णोऽसि तस्मात्त्वं विद्याधिकारवानसीत्यभिप्रायः ॥३॥

श्रेयःप्रेयसोः स्वरूपं ब्रुवन्नाह—दूरमिति :—

दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता ।
विद्याभीप्सितं नचिकेतसं मन्ये न त्वा कामा बहवो लोलुपन्तः ॥४॥

दूरं दूरेण महदन्तरेण एते विपरीते परस्परविरुद्धे कर्त्रकर्तृत्वरूपात्मके विषूची मोक्षसंसारफलत्वेन विपरीतफलावसाने या अविद्या या विद्या च इति ज्ञानिभिर्ज्ञाता निश्चिता तथाह भगवान् कणादः—"तद् दुष्टज्ञानम् दोषयुक्तं यज्ज्ञानं तदविद्यापदवाच्यं भवति ।" (वै० ६-२-११) । "अदुष्टं विद्या दोषरहितं शुद्धं यज्ज्ञानं तद् विद्यापदेनोक्तं भवति" (वै० ६-२-१२) । "प्रवर्तनालक्षणादोषा" इत्यक्षपादमतम्, इत्याद्यार्षप्रमाणनिश्चितं भवति । तद्युक्तं भवन्तं नचिकेतसं विद्याभीप्सितं शुद्धविद्यार्थिनं तत्त्वजिज्ञासुं मन्ये निश्चिनोमि, यतस्त्वां कामा अविद्याविषया नालोलुपन्त तस्मात्तत्त्वज्ञानविषयात्प्रच्यावयितुं न समर्था अभूवन्, अतः अवश्यमेव विद्याधिकार्यसि त्वमित्यभिप्रायः ॥४॥

येऽविद्यामनुवर्तमानास्तेषां दुर्दशामाह—अविद्यायामिति :—

अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितम्मन्यमानाः ।
दंद्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः ॥५॥

अविद्यायाम् अहंममाभिमानात्मके दुष्टज्ञाने वर्तमानाः स्वयंधीरा गुरोः सकाशात् सत्सम्प्रदायरहितादपि धीरं विद्यावन्तं पण्डितं

प्रज्ञावन्तं मन्यमाना न तु यथार्थतः विवेकिनः इत्यर्थः। दंद्रम्यमाणा अनेककुटिलगतिषु भ्रमन्तः मूढा मूर्खा अन्धेन नीयमानाः प्राप्यमाणा यथान्धा गर्तं गच्छन्ति तद्वत्तेऽपि विविधां संसारावस्थां परियन्ति मोक्षसुखं तेषां सर्वथा दुर्लभमेव भवति अतीव कष्टमेतत्तेषाम् ॥५॥

अविद्यावत एव जननमरणमिति न साम्पराय इत्याह :—

न साम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम् ।
अयं लोको नास्ति पर इति मानी पुनःपुनर्वशमापद्यते मे ॥६॥

वित्तमोहेन वित्तयाथात्म्यज्ञानरहितेन हेतुना प्रमाद्यन्तं प्रमादं कुर्वन्तं विषयभोगाद्यनर्थेषु संलग्नचित्तमित्यर्थः। अतएव मूढमविवेकिनं बालं बालबुद्धि साम्परायः आत्मनित्यत्वं न प्रतिभाति, अयं प्रतीयमानः अहंममाभिमानरूपो लोक एवास्ति एतद् व्यतिरिक्तः परलोको नास्ति, इति मानी अभिमानवान् पुनःपुनर्मुहुर्मुहुः मे मम मृत्योर्यमस्य वशमधीनम् आपद्यते प्राप्नोति जननं मरणं च तेषां निश्चितमित्यर्थः। एतेन मरणान्तरमात्मा अस्तीति पक्षः सिद्धचति ॥६॥

आत्मज्ञान दौर्लभ्यमाह-श्रवणायापीति—

श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विद्युः ।
आश्चर्यो वक्ता कुशलोऽस्य लब्धाश्चर्यो ज्ञाता कुशलोऽनुशिष्टः ॥७॥

श्रवणाय श्रोतुं प्रयतमानैर्बहुभिर्य आत्मा न लभ्यः प्राप्यः। शृण्वन्तोऽपि बहवः श्रवणकुशला अपि यमात्मानं न विद्युः विदन्ति यथार्थतः। अस्य वक्ता आश्चर्यः अद्भुत एव तथा लब्धा श्रोताऽपि आश्चर्य एव भवति, कुशलेनाचार्येण अनुशिष्टःशिक्षितः ज्ञाता कश्चिदेव भवति—"मनुष्याणां सहस्रेषु कश्चिद् यतति सिद्धये। यततामपि सिद्धानां कश्चिन् मां वेत्ति तत्त्वतः।" इति गीतासम्मतत्वात् ॥७॥

शास्त्राचार्यस्वानुभवगम्यमेवात्मतत्त्वमित्यत आह—नेति :—

न नरेणावरेण प्रोक्त एव सुविज्ञेयो बहुधा चिन्त्यमानः ।
अनन्यप्रोक्ते गतिरत्र नास्ति अणीयान् ह्यतर्क्यमनुप्रमाणात् ॥८॥

अवरेण स्वानुभवशून्येन नरेण प्राकृतेन पुरुषेण प्रोक्त उपदिष्ट

एष आत्मा यद् विषये मां पृष्ट्वानसि बहुधा चिन्त्यमानोऽपि न सुविज्ञेयः। न साक्षात्कार विषयो भवति कृतात्मसाक्षात्कार एवोपदेश-कार्ये समर्थ इत्यर्थः। अनन्यप्रोक्ते न अन्यः अनन्यस्तेन प्रोक्तः तस्मिन् अनन्यप्रोक्ते स्वानुभवविषये अद्वैतात्मके अत्र आत्मनि गतिः ज्ञातृज्ञेयादिरूपा नास्ति अभेदत्वात् स्वप्रभत्वाच्च। हि यतः अणीयान् सूक्ष्मः अनुप्रमाणात् अतर्क्यम् अतर्क्यः अनुभवितुमशक्यः लिङ्गा-भावात् शास्त्राचार्याभ्यामेव प्रत्येतव्य इत्यर्थः ॥८॥

आत्मानुभवस्य तर्केण निश्चेतुमयोग्यमिति नैषेत्याह :—

नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ।
यां त्वमापः सत्यधृतिर्बतासि त्वादृङ नो भूयान् नचिकेतः प्रष्टा ॥९॥

हे प्रेष्ठ प्रियतमनचिकेतः! एषामतिर्ब्रह्मात्मविषयिणी तर्केण व्याप्यव्यापकभावकल्पनामात्रेण न आपनेया प्राप्तव्या न दूरीकर्तव्या वा, यतस्तर्कस्य अप्रतिष्ठितत्वात् अन्येनैव तर्काद्यतिरिक्तेन भिन्नेन ब्रह्मनिष्ठेन प्रोक्ता उपदिष्टा सती एव निश्चयेन सुज्ञानाय बोधाय समर्था भवति। यां मतिं त्वम् आपः प्राप्तवानसि बत सत्यधृतिर-कम्पितधैर्यश्च त्वमसि त्वादृगन्यस्त्वत्सदृशः प्रश्नकर्ता नो भूयात् न भविष्यति अथवा त्वत्सदृशः प्रश्नकर्ता मत्सकाशात् भवतु इत्याशा-सनम् बल इत्यनुकम्पायां योज्यम् ॥९॥

मत्तोऽपि श्रेष्ठ इति तस्य श्रद्धां वर्धयन्नाह—जानामीत्यादि :—

जानाम्यहं शेवधिरित्यनित्यं नह्यध्रुवैः प्राप्यते हि ध्रुवं तत्।
ततो मया नचिकेतश्चितोग्निरनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यम् ॥१०॥

अहं शेवधिः कर्मफलमनित्यं विनाशि इति जानामि, उत्पत्ति-मत्वात्, तस्य अध्रुवैः केवलकर्मानुष्ठातृभिः तद्ध्रुवं सत्यं ब्रह्मतत्त्वं शिवशक्तिसामरस्याभिधेयं न प्राप्यते न लभ्यते, तस्य विभूतिमात्र-विषयत्वात्। ततः एवंभूतादपि हेतोः मया यमेन अनित्यैर्द्रव्यैः विनाशि-पदार्थैः अग्निश्चितः व्यवसायात्मिकया बुद्धया, तेन ज्ञानेन नित्यं ब्रह्म यमाधिकारं च प्राप्तवानस्मि "पदं गच्छन्त्यनामयम्" इति गीता वचनात् (गी० २-५१)। अथवा आपेक्षिकं नित्यं याम्यं पदं प्राप्तवानस्मि।

त्वं तु पूर्णवैराग्यनिष्ठत्वात् सर्वथा कर्मफलेषु निस्पृह इति श्रेष्ठत्वे हेतुः ॥१०॥

पुनरपि तदेवाह—कामस्येति :—

कामस्याऽऽप्तिं जगतः प्रतिष्ठां क्रतोरनन्त्यमभयस्य पारम् ।
स्तोमं महदुरुगायं प्रतिष्ठां दृष्ट्वाधृत्या धीरो नचिकेतोऽतोऽत्यस्राक्षीः ॥११

कामस्य निरतिशयभोगस्य आप्तिं प्राप्तिं जगतश्चराचरस्य लोकस्य प्रतिष्ठां स्थितिं क्रतोरुपासनाफलस्य अनन्त्यम् अनन्तफलम् । अभयस्य भयरहितस्य पारमवधिभूतं स्तोमं स्तुत्यं महदणिमादियोगैश्वर्यम् उरुगायं विस्तृतयशः प्रतिष्ठां कीर्तिं प्राप्य धृत्या धैर्येण धीरःसन् हे नचिकेतः ! त्वमत्यस्राक्षीः त्यक्तवानसि महत्त्यागवैभवं तवेत्यर्थः ॥११॥

आत्मप्राप्तिसाधनं फलं चाह—तमिति :—

तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् ।
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति ॥१२॥

तं दुर्दर्शं दुःखेन द्रष्टुं योग्यं गूढं प्रच्छन्नमनुप्रविष्टं व्यापकं गुहाहितं गुहा बुद्धिस्तस्यां हितं स्थितं गह्वरेष्ठं बहुकष्टयुक्ते स्थितं पुराणं सनातनं पुराऽपि नवमिव अध्यात्मयोगाधिगमेन चित्तवृत्तिनिरोधपूर्वकलब्धात्मसाक्षात्कारेण देवं परमात्मानं मत्वा अनुभूय धीरः साधकः हर्षशोकौ अविद्यासमुद्भूतौ जहाति हर्षशोकरहितो भवति अध्यात्मयोगप्रक्रिया वक्ष्यते ॥१२॥

तत्त्वज्ञानेनाविद्यानिवृत्तिमभिधायानन्दावाप्तिमाह—एतदिति :—

एतच्छ्रुत्वा सम्परिगृह्यमर्त्यः प्रवृह्य धर्म्यमणुमेतमाप्य ।
स मोदते मोदनीयं हि लब्ध्वा विवृत ँ् सद्म नचिकेतसं मन्ये ॥१३॥

यो मर्त्योऽधिकारी गुरुमुखात् श्रुत्वा श्रवणमनुष्ठाय सम्परिगृह्य अनुकूलतर्केण मननं कृत्वा प्रवृह्य निदिध्यासनं कृत्वा धर्म्यं धारणीयमणुं सूक्ष्ममेतमात्मानमाप्य साक्षात्कृत्य स विद्वान् मोदनीयं परमानन्दस्वरूपं लब्ध्वा स्वात्मत्वेन ज्ञात्वा मोदते प्रसन्नो भवति । अन्यत्कृत्यान्तराभावात् । एतादृशं त्वां नचिकेतसं प्रति विवृतं प्रतिबन्धरहितं

सद्म धाम अहं मन्ये। पूर्णानन्दप्राप्तौ यथार्थाधिकारी त्वमसि इत्यभिप्रायः ॥१३॥

ब्रह्मतत्त्वं प्रष्टुकामो नचिकेता आह—अन्यत्रेति :—

अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात्।
अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद् वद ॥१४॥

अन्यत्र भिन्नं धर्मात् विधिवाक्यबोधितकर्मकाण्डात् अधर्माच्च निषेधविषयादपि भिन्नं कृताकृताच्च कार्याकार्यात् अन्यत्र भिन्नं कालत्रयादतीतमित्यर्थः। यत्तत्वं पश्यसि जानासि तद् वद मह्यमुपदिश। मुण्डके विद्या द्वैविध्यमुपदिष्टं परापराभेदेन, परायाः विषय आत्मा, अपराया विधिनिषेधात्मकधर्माधर्मप्रतिपादककर्माणि, विद्याविषयकः प्रश्नः धर्माधर्मयोर्भिन्नत्वात् ॥१४॥

परमकृपालुराचार्यः परमतत्त्वसाक्षात्करणाय मन्त्रस्यैव मुख्यत्वं मन्वानः सर्वमन्त्रादिभूतं प्रणवमुपदिशन्नाह—सर्वे इति :—

सर्वे वेदायत्पदमामनन्ति, तपांसि सर्वाणि च यद् वदन्ति।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् ॥१५॥

सर्वे वेदा मन्त्रा यत्पदमक्षरमामनन्ति पुनःपुनरभ्यस्यन्ति ओंकारादेवारभ्यमाणत्वात् तेषां सर्वाणि तपांसि व्रतविशेषास्तात्पर्येण यद् वदन्ति कथयन्ति प्रणव एव पर्यवस्यन्ति यदिच्छन्तो नैष्ठिका ब्रह्मचारिणो यतिनश्च ब्रह्मचर्यं ब्रह्मोपलब्धय स्वकीयं व्रतविशेषं चरन्ति अनुतिष्ठन्ति तत्पदं संग्रहेण संक्षेपेण ते तुभ्यं ब्रवीमि उपदिशामि। ओमिति ब्रह्मवाचकरूपेण प्रतीकेन चैतत्प्रसिद्ध "मुद्गीथरम्यपदपाठवतां च साम्नाम्" इति स्मरणात् ॥१५॥

शिवशक्तितत्त्वयोरुभयोरेव साम्येनबोधकमिदमक्षरमिति एतदाह :—

एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम्।
एतदालम्बनं ज्ञात्वा यो यदिच्छति तस्य तत् ॥१६॥

एतत् प्रसिद्धमोंकाराख्यमक्षरं ब्रह्मशक्तितत्त्वं शब्दार्थयोरभेदात् तथा एतदेवाक्षरं परंब्रह्म शिवतत्त्वमुभयोस्तत्त्वयोरैक्यं समानरूपेणैतद्

बोधयति । यः साधकः एतदालम्बनं साम्यरूपेण ज्ञात्वा यदिच्छति शिवं शक्तिं वा तस्य तदेव तत्त्वं प्राप्तं भवति ॥१६॥

एतस्य सर्वसाधनश्रेष्ठत्वमाह—एतदिति :—

एतदालम्बनं श्रेष्ठमेतदालम्बनं परम् ।
एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते ॥१७॥

तत्त्वसाक्षात्कारलब्धये यानि साधनानि आलम्बनत्वेन प्रसिद्धानि तेष्वेतदेवश्रेष्ठं प्रशस्ततमम्, एतदेवालम्बनमाश्रयभूतं परं प्रकृष्टं कानिचित्साधनानि शक्तिमात्रं बोधयन्ति, कानिचित्तदंशमात्राणि प्रतिपादयन्ति, कानिचिच्छिवं, तथा तदवयवभूतानि वा कथयन्ति, इदं तु सामरस्येनोभयबोधकमतएव सर्वश्रेष्ठम् । एतज्ज्ञात्वा सम्यगनुभूय ब्रह्मलोके ब्रह्मवन् महीयते पूज्यते "ब्रह्मविद् ब्रह्मैव भवतीति श्रुतेः" ॥१७॥

वाचकमुपदिश्य वाच्यतत्त्वं तत्फलं चाह—न जायत इति—

न जायते म्रियते वा विपश्चित् नायं कुतश्चिन्नबभूव कश्चित् ।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥१८॥

विपश्चित् वाच्यवाचकतत्त्वयो रहस्यवित् विद्वान् कदाचित् न जायते न म्रियते जननमरणरहितो भवतीत्यर्थः । अयं कुतश्चित् सकाशात् न बभूव न भवति कस्मादन्यस्मात्स्वसत्तां न लभते किन्तु स्वसत्तयैव राजत इत्यर्थः । कालव्यत्ययश्छान्दसः कश्चिदपि य एवं वेत्ति सोऽपि अजः जन्मविक्रियारहितः, नित्यः उत्पत्तिविनाशरहितः, शाश्वतः सनातनः, पुराणः सर्वेभ्यः प्रथमो भवति । तथा शरीरे हन्यमाने मरण-जन्यं दुःखं नानुभवति जीवन्मुक्तत्वात्, मरणं शरीरस्यैव भवति आत्मा तु शुद्धबुद्धमुक्तस्वभावः इति तस्य निश्चयः कदाचिदपि न विपर्येति इति निष्कर्षः ॥१८॥

अज्ञानां मन्तव्यमाह—हन्तेति—

हन्ताचेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥१९॥

चेद् यदि हन्ता उक्तानुभवरहितोऽतः हन्तुं हननादिक्रियाकर्तारमात्मानं मन्यते । ततोऽन्यो हननादिक्रियायाः कर्मभूतं मन्यत इति ।

उभावपि आत्मतत्त्वं न विजानीतः । यतः अयं न हन्ति न केनापि हन्यते क्रियाकारकादिसम्बन्धरहितत्वादात्मनः, क्रियाकारकादिसम्बन्धानामविद्याविषयत्वात् इति ।।१९।।

आत्मस्वरूपमाह—अणोरिति :—

अणोरणीयान् महतो महीयान् आत्मास्य जन्तोर्निहितो गुहायाम् ।
तमक्रतुः पश्यति वीतशोको धातुः प्रसादान् महिमानमात्मनः ।।२०।।

अणोः परिमाणात् अणुः, सूक्ष्मादपि सूक्ष्मः अणीयान् महतः आकाशादेरपि महान्, महत्परिमाणवान् आत्मा, अस्य जन्तोः प्राणिनः गुहायां बुद्धौ निहितः प्रकाशवत्त्वेनस्थितः, तमात्मानमक्रतुः स्थिरचित्त वृत्तिर्योगी धातुप्रसादात् शरीरस्थधातुनैर्मल्यात् वीतशोको निवृताविद्यः सन् तस्यात्मनो महिमानं महत्त्वं पश्यति साक्षात्करोतीत्यर्थः ।।२०।।

अस्मत्प्रत्ययादेव ज्ञातुं शक्य इत्याह—आसीन इति :—

आसीनो दूरं व्रजति शयानो याति सर्वतः ।
कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति ।।२१।।

आसीनः स्थितः सन् विद्योपाधिमान् असौ दूरं परमे व्योम्नि सहस्रारे स्थितं परमं तत्त्वं व्रजति षट्चक्रभेदनद्वारा अहं प्रत्ययेन साक्षात्करोति । शयानः अविद्यायां सुप्तः क्रियाकारकादिसम्बन्धयुक्तः सर्वतः सर्वसंसारविषयं सार्वविभक्तिस्तसिः, याति उच्चावचेषु योनिषु गच्छति, एवं मदामदं विद्याविद्योपाधिमन्तं देवं द्योतनात्मकं ब्रह्मतत्त्वं मदन्योऽस्मत्प्रत्ययादन्यः कर्तृत्वादि बुद्धिमान् कः ज्ञातुमर्हति समर्थो भवति न कोऽपीत्यर्थः ।।२१।।

विभुत्वेन परिज्ञानं तस्य शोकनिवृत्तये भवतीत्याह—अशरीरमिति :—

अशरीरं शरीरेषु अनवस्थेष्ववस्थितम् ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ।।२२।।

धीरो विद्वान् शरीरेषु सर्वेषु अशरीरं तत्पृथग्भूतमनवस्थितेषु विनाशिषु अवस्थितमविनाशिनं महान्तं विभुं व्यापकमात्मानं मत्वा अभेदेन साक्षात्कृत्य न शोचति शोकमोहाभिभूतो न भवतीत्यर्थः ।।२२।।

आत्मसाक्षात्कारे पराशक्त्यनुग्रहस्यैव मुख्यत्वमाह—नायमिति :—

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्यः तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥२३॥

अयमात्मा शिवश्चतुर्थः प्रवचनेन केवलेन व्याख्यानपरेण वाग्व्यापारेण न लभ्यते । न मेधया ग्रन्थार्थधारणबुद्ध्या, तथा बहुना श्रुतेन शास्त्रजातेन च न लभ्यः एतेषां सर्वेषां बहिर्भूतत्वात् । एष भगवान् शिवः गुरुरूपेण यमधिकारिणं वृणुते अङ्गीकरोति स्वभक्तत्वेन । तस्य एष आत्मा स्वां स्वाभिन्नां तनूं शिवां तनूं विवृणुते प्रकाशयति "या ते रुद्र शिवा तनूरघोरा पापकाशिनी" इति मन्त्रवर्णनात् । पराशक्त्यनुगृहीत एव तत्त्वसाक्षात्करणे समर्थो भवतीत्यर्थः ॥२३॥

आत्मज्ञानानधिकारिणमाह—नाविरत इति :—

नाविरतोदुश्चरितान्नाशान्तो ना समाहितः ॥
नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् ॥२४॥

यः दुश्चरितात् नाविरतः न निवृत्तः शास्त्रमार्गानुवृत्तिरहितः अशान्तः शमदमादिसाधनहीनः असमाहितः शिवशक्तिमयोक्तयोगाभ्यासरहितः अशान्तमानसोऽपि चित्तवृत्तिविक्षेपयुक्तः एनमुक्तमात्मानं न लभते । प्रज्ञानेन प्रकृष्टज्ञानवता आचार्येणैव शिक्षित आत्मानं प्राप्नुयात् प्राप्नोतीत्यर्थः । अथवा प्रकृष्टज्ञानं प्रज्ञानं ब्रह्मविद्या तयैव प्राप्नुयादिति ॥२४॥

अधिकारिण उत्कर्षं प्रदर्शयन्नाह—यस्येति :—

यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः ॥
मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः ॥२५॥

यस्य सर्वलयकारणस्य ब्रह्म ज्ञानशक्तिः, क्षत्रं क्रियाशक्तिः, उभे ओदनः भोज्यस्थानीयः ब्रह्मण एव ज्ञानक्रियेशक्ती प्रसूते । अन्त्ये लयवेलायां ब्रह्मणि एव लीयेते । अतएव भोज्य रूपेणोपमिते इति तात्पर्यार्थः । मृत्युर्यस्योपसेचनं सूपशाकादिस्थानीयः । मृत्युः संहारदेवता भगवद्विभूतिः तथाह—"मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम् ।" इति गीतोक्तेः । इत्थं भूतेन उपसेचनेन भगवान्

सर्वं संहरति। क इत्था इत्थं तमात्मानं तुरीयं, यत्र अवस्थायां विद्यमानं स अधिकारी उक्तलक्षणलक्षितः वेद जानाति। अथवा यत्र स आत्मा अस्ति तं क इत्थं वेद ज्ञातुं समर्थो भवति विनाऽऽचार्येण इति ॥२५॥

इति द्वितीयवल्लीप्रकाश भाष्यम्

विद्याविद्याविषयमुपक्रम्य आत्मनः सत्ता गतवल्लीनिरूपणेन उपदिष्टा। अविद्याविषयकं कर्म संसाराय भवति, अध्यात्माधियोगेन विद्या परमं तत्त्वमधिगमयति। अविद्यायास्तामसो भावः शरीरात्मवादेऽन्तर्गतः "अविद्यायामन्तरेवर्तमाना" इत्यादिना प्रदर्शितः। राजसोभागः क्रियाकलापरूपः स्वर्गप्रापकः पुनरावृत्तिजनकः, नाचिकेताग्निचयनरूपः सात्त्विकः, विद्यासहितोऽन्तःकरणशोधनपूर्वको ब्रह्मज्ञानाङ्गः, इति सर्वं तत्त्वं निर्णीतम्। इदानीं तदेव तत्त्वं सिंहावलोकनन्यायेन संगतीकुर्वन्नाह—ऋतं पिबन्ताविति :—

ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्द्धे।
छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः ॥१॥

सुकृतस्य सुष्ठुकृतस्य कर्मणो अध्यात्मयोगस्य च उभयस्य फलम् ऋतं कर्मणामवश्यं फलं भावि शास्त्रविहितत्वात्। तेन हेतुना ऋतं कर्मफलमपि भवति, विद्याफलमपि ऋतं नित्यत्वात्, उभयोरेकीकृत्य कर्मत्वेन निर्देशः, पिबन्तौ पानं कुर्वन्तौ विद्याविद्याधिकारिणौ गुहां प्रविष्टौ श्रद्धायुक्तबुद्धिमन्तौ परमे परार्द्धे परब्रह्मणि स्थितौ छायातपौ छाया आतपवद् विलक्षणौ कर्तृत्वाकर्तृत्वबुद्धियुक्तौ ब्रह्मविदः मुमुक्षवो विरक्तास्तत्त्वज्ञानिनः त्रिणाचिकेताः पञ्चाग्नयो गृहस्थाश्च वदन्ति प्रतिपादयन्ति "गुहां प्रविष्टावात्मानौ हि तद् दर्शनात्" इति न्यायात् ॥१॥

यः सेतुरीजानानामक्षरं ब्रह्म यत्परम्।
अभयं तीतीर्षतां पारं नाचिकेतं शकेमहि ॥२॥

यः नाचिकेतोऽग्निः सेतुरिव ईजानानां कर्मिणां पारं तितीर्षतां तर्तुमिच्छूनां मुमुक्षूणां च अभयं भयरहितं "अभयं वै जनक प्राप्तोऽसि"

इति श्रुतेः। पारमाश्रयस्थानमेवं नाचिकेतमग्निं ज्ञातुं शकेमहि ज्ञातुं शक्नुवन्तो वयम्। संसारादविद्या विषयात्पारं तितीर्षतां मुमुक्षूणाम् अभयं निरापदमक्षरं ब्रह्मशक्तितत्त्वं परं च यत् तच्छिवतत्त्वं ज्ञातुं शक्नुवन्तः। उभयोरभेदः साक्षात्कर्तव्यत्वेन इष्टः। एतदर्थमाह श्रुतिः—"द्वे अक्षरे ब्रह्मपरे त्वनन्ते विद्याविद्ये निहिते यत्र गूढे। क्षरन्त्वविद्या ह्यमृतं तु विद्या विद्याविद्ये ईशते यस्तु सोऽन्यः।" (श्वे० ५–१)। द्वे अक्षरे अविनाशिस्वरूपे ब्रह्मशक्तितत्त्वं परं ब्रह्म, च इति ब्रह्मपरे अनन्ते परिच्छेदरहिते यत्र विद्याविद्या च उभे निहिते आश्रिते गूढ़े प्रच्छन्ने अविद्या क्षरं निवृत्तिधर्मवती, विद्ययानिवर्तनात्तस्या विद्या अमृतं, यस्तु द्वाभ्यां विद्याविद्याभ्यामीशते व्यवहरति स आत्मा-अन्यो भिन्न इत्यर्थः। "उत्तमः पुरुषस्त्वन्य" इतिस्मृतेः ॥२॥

विद्याविद्योपाधिमान् यथा संसारं मोक्षं च गच्छति तथा रथ़रथीत्यादिरूपकेणाह—आत्मानमिति :—

आत्मनं रथिनं विद्धि शरीरं रथमेव च।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेवच ॥३॥

यथा कश्चिद् रथी रथसारथी रश्मिहयादिभिः स्वाभिलषितस्थानं प्रतिष्ठते, तद्वदात्माऽपि संसारं परं पदं च गच्छति। तस्य शरीरं रथस्थानीयं विद्धि। बुद्धिं सदसद्विवेकधर्मवतीं सारथिस्थानीयां विद्धि जानीहि, तथा मनः संकल्पविकल्पात्मकं प्रग्रहं रश्मिरूपं विद्धि जानीहि ॥३॥

तथा च—

इन्द्रियाणि हयानाहुर्विषयाँस्तेषु गोचरान्।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥४॥

मनीषिणो विद्वांस इन्द्रियाणि हयान् अश्वान् आहुः कथयन्ति, तेषां गोचरान् विषयान् शब्दादीन् मार्गान् आहुः। आत्मा इन्द्रियाणि मनः इत्येतैर्युक्तं पुरुषं भोक्तेति भोक्तारं सुखदुःखयोरिति कथयन्ति सोपाधिक एवात्मा कर्तृभोक्तृधर्मो भवतीत्यभिप्रायः ॥४॥

यस्त्वविज्ञानवान् भवति अयुक्तेन मनसा सदा।
तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ॥५॥

यो मनुष्योऽविज्ञानवान् सदसद्विवेकरहितोऽयुक्तेन मनसा योगाभ्यासरहितेन चेतसा सदा युक्तो भवति, तस्येन्द्रियाणि दुष्टाश्वा अशिक्षितहया इव सारथेः अवश्यानि अनिगृहीतानि भवन्ति। अतः इन्द्रियनिग्रहपूर्वकं मनसः स्थैर्यमापाद्य आत्मविज्ञानं सम्पाद्यम् ॥५॥

यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा।
तस्य इन्द्रियाणि वश्यानि सदश्वा इव सारथेः ॥६॥

यस्तु विज्ञानवान् विशेषज्ञानवान् सदा सर्वस्मिन् काले युक्तेन योगयुक्तेन मनसा भवति, तस्य सदश्वा शिक्षिताश्वा इव इन्द्रियाणि वश्यानि अधीनीभवन्ति। यथा सारथिना हयाः स्वमार्गगामिनो भवन्ति ॥६॥

अविज्ञानवतः संसारप्राप्तिर्भवति इत्याह—यस्त्विति :—

यस्त्वविज्ञानवान् भवति अमनस्कः सदाऽशुचिः।
न स तत्पदमाप्नोति संसारं चाधिगच्छति ॥७॥

यस्तु अविज्ञानवान् यथार्थानुभवशास्त्रज्ञानरहितो भवति। अमनस्कः कुत्सितचित्तवृत्तिकः सदा अशुचिः अशुद्धश्च स तत्पदं ब्रह्मणः पदं न प्राप्नोति, संसारं जननमरणलक्षणमेवाधिगच्छति अविद्यासंवृतत्वात् इति ॥७॥

विवेकी परमं पदं गच्छतीति यस्त्वित्यादिनाह :—

यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः।
स तु तत्पदमाप्नोति यस्माद् भूयो न जायते ॥८॥

यस्तु विज्ञानवान् विवेकसम्पन्नः समनस्कः शुद्धचेताः सदाशुचिः पवित्राचरणो भवति, स तु अवश्यं तत्पदं ब्रह्मपदं प्राप्नोति, यस्मात् पदात् स भूयः पुनर्न जायते जननमरणरूपे संसारे नागच्छति निवृत्ताज्ञानत्वात् ॥८॥

तत्पदमाह :—

विज्ञानसारथिर्यस्य मनः प्रग्रहवान्नरः।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥९॥

यस्याधिकारिणो विदुषो विज्ञानसारथिः विवेकवती बुद्धिः सारथिस्थानीया मनः प्रग्रहवान्नरः साधितमनोरश्मिवान् नरः अधिकारी स अध्वनः शब्दार्थात्मकषट्संख्याकस्य पारं तद् विष्णोर्व्यापकस्य परमं-पदं शिवशक्तिसामरस्यात्मकं प्राप्नोति षट्चक्रभेदनपुरःसरं परमं तत्त्वं साक्षात्करोतीत्यर्थः ॥९॥

इन्द्रियाण्यारभ्य परपुरुषपर्यन्तं स्थूलसूक्ष्मतारतम्यमाह :—

इन्द्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परं मनः।
मनसस्तु पराबुद्धिर्बुद्धेरात्मा महान् परः ॥१०॥
महतः परमव्यक्तमव्यक्तात्पुरुषः परः।
पुरुषान्न परं किञ्चित् सा काष्ठा सा परागतिः ॥११॥

इन्द्रियेभ्यश्चक्षुरादिभ्य एषां विषया अर्थाः पराः सूक्ष्माः। तेभ्यः संकल्पविकल्पात्मकं मनः परं सूक्ष्मं, मनसस्तु निश्चयात्मिका बुद्धिः परा श्रेष्ठा, बुद्धेर्महान् महत्परिमाणयुक्त आत्मा कर्तृभोक्तृरूपः परः, तथा महतः परमव्यक्तमव्यक्तात् शक्तिपदार्थात् पुरुषः परः, पुरुषात् शिवतत्त्वात् परं न किंचित्तत्त्वमस्ति सा पराकाष्ठा परा गतिः प्राप्तव्यत्वेनाभिमता ॥१०॥११॥

स परमपुरुषः सूक्ष्मबुद्धया गृह्यत-इत्याह—एष इति :—

एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते।
दृश्यतेत्वग्रयया बुद्धया सूक्ष्मया सूक्ष्मदर्शिभिः ॥१२॥

एष आत्मा सर्वेषु भूतेषु चराचरेषु गूढः प्रच्छन्नः आवृतः न प्रकाशते, ग्राह्यग्राहकरूपेणाविद्यादशायां नावलोक्यते, उक्तयोगसम्पन्नैः सूक्ष्मदर्शिभिस्तत्त्वज्ञैस्तु एष अग्रयया तीक्ष्णया सूक्ष्मया बुद्धया गृह्यते साक्षात् क्रियते भ्रमप्रमादरहितत्त्वात्तस्या इत्यर्थः ॥१२॥

तत्प्राप्तये लयचिन्तनात्मकं साधनमाह–यच्छेदिति :—

यच्छेद् वांङमनसी प्राज्ञस्तद् यच्छेज्ज्ञान आत्मनि।
ज्ञानमात्मनि महति नियच्छेच्छान्त आत्मनि ॥१३॥

प्राज्ञो विद्वान् वाङमनसी नियच्छेत् नियमयेत्, वाक्पदेन सर्वेन्द्रियवृत्तीनां ग्रहणम्। वस्तुतो मनोनिग्रहेणैव इन्द्रियाणां निग्रहः

मनःपूर्विका तेषां प्रवृत्तिः । तच्च मनो ज्ञाने आत्मनि नियच्छेत् विलापयेत् । एवं सम्पन्ने सति तत्त्वसाक्षात्कारो भवति । अनया योगप्रक्रियया विद्यातत्त्वं प्रकाशयति ॥१३॥

आत्मविद्याप्राप्तयेऽधिकारसम्पन्नानुद्बोधयति उत्तिष्ठतेति :—

उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत ।
क्षुरस्यधारा निशिता दुरत्यया दुर्गं पथस्तत् कवयो वदन्ति ॥१४॥

अविद्यायां प्रसुप्तान् जीवान् सानुकम्पया आह—उत्तिष्ठत आत्मज्ञान प्राप्तये योगं ज्ञानं चानुतिष्ठत । हे अधिकारिणो जीवाः ! तथा जाग्रत मोहनिद्रां त्यजत । वरान् कृततत्त्वसाक्षात्कारान् गुरून् प्राप्य तान् सेवादिना संतोष्य निबोधत तत्त्वं जानथ । एष ज्ञानमार्गो निशिता तीक्ष्णीकृता अतएव दुरत्यया दुःखेन गन्तुं योग्या क्षुरस्य धारा इव अस्ति, तस्मात् कवयो विद्वांसः पथः इमं पन्थानं दुर्गं कठिनं यथा तथा वदन्ति ॥१४॥

विधिमुखेन परमं तत्त्वमुपदिश्येदानीं निषेधमुखेनोपदिशति—अशब्दमिति :—

अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात्प्रमुच्यते॥१५॥

अशब्दं शब्दतत्त्वरहितमस्पर्शं स्पर्शतत्त्वरहितमव्ययं विकाररहितं, तथा अरसं रसतत्त्वरहितं नित्यमुपजनापायरहितं, गन्धतत्त्वरहितं तस्मादगन्धं, यदात्मतत्त्वमाद्यन्तविहीनं महतो बुद्धितत्त्वात्परं ध्रुवं सत्यं निश्चलमिति यावत् निचाय्यसाक्षात्कृत्य मृत्युमुखात् जननमरणरूपात् संसारात् प्रमुच्यते जीवन्नपि देहात्मभावरहितो भवतीत्यर्थः ॥१५॥

नचिकेतसा पृष्टं तत्त्वं सम्यगुपदिश्य इदं विज्ञानं स्तुवन्नुपसंहरति नाचिकेतमिति :—

नाचिकेतमुपाख्यानं मृत्युप्रोक्तं सनातनम् ॥
उक्त्वा श्रुत्वा च मेधावी ब्रह्मलोके महीयते ॥१६॥

मृत्युना यमाचार्येण प्रोक्तमुपदिष्टं सनातनं गुरुशिष्यपरम्परया सनातनकालादागतमिदं नाचिकेतमुपाख्यानं यमनचिकेतसोः सम्बाद-रूपेण प्रसिद्धं मेधावी ग्रन्थार्थधारणसमर्थोऽधिकारी, उक्त्वा स्वशिष्येभ्य उपदिश्य गुरुमुखाच्छ्रुत्वा च ब्रह्मलोके ब्रह्मणो लोके ब्रह्मसाक्षात्कारे समधिगते वा महीयते ब्रह्मवत् पूज्यो भवति ।।१६।।

य इमं परमं गुह्यं श्रावयेद् ब्रह्मसंसदि ।
प्रयतः श्राद्धकाले वा तदानन्त्याय कल्पते तदानन्त्याय कल्पते।।१७।।

प्रयतो यमनियमसमाश्रितः श्रद्धावान् कश्चिदपि इमं सम्वादं परमं श्रेष्ठं गुह्यं गोपनीयं कठोपनिषद्रूपं ब्रह्मसंसदि ब्रह्मविदां सभायां तथा श्राद्धकाले निमन्त्रितान् ब्राह्मणान् श्रावयेद् तच्च श्राद्धमानन्त्याय अनन्तफलप्राप्तये कल्पते समर्थो भवति इति द्विरुक्तिरध्यायसमाप्त्यर्था । केचिदिमां द्विरुक्तिं दृष्ट्वा अत्रैवोपनिषत् समाप्तिं मन्यन्ते तच्च प्रमाणविरहितत्वादुपेक्षणीयमेव अवान्तरेऽपि तथात्वात् ।।१७।।

इति तृतीयवल्लीप्रकाशभाष्यम् प्रथमाध्यायसमाप्तिः ।

अथ द्वितीयोऽध्यायः

पूर्वस्मिन्नध्याये संक्षेपेणोक्तस्य तत्त्वस्य विस्तरेण प्रतिपादयितु-मस्याध्यायस्यारम्भः। तत्त्वदर्शने निरुद्धेन्द्रिय एवाधिक्रियत इत्यत आह—पराञ्चीति :—

पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ पश्यति नान्तरात्मन्।।
कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्त्वमिच्छन्।।१।।

स्वयम्भूः परमेश्वरः खानि इन्द्रियाणि पराञ्चि बहिर्विषयोन्मुख-प्रवृत्तिपराणि व्यतृणत् हिंसितवान्। तेन सर्वदैव बहिरेव तेषां प्रवृत्ति-र्भवति। अन्तःप्रवृत्तिराहित्येन हिंसनम्। तस्मात् सर्वो जनः पराङ-बाह्यम् तमेवार्थं पश्यति। नान्तरात्मन् ब्रह्मतत्त्वं न पश्यति। कश्चिद् धीरः स्थिरबुद्धिः अमृतत्त्वमिच्छन् आवृत्तचक्षुः निरुद्धेन्द्रिय-व्यापारः प्रत्यगात्मानं साक्षिभूतं परंतत्त्वं विद्यया अधिगम्य ऐक्षत्, साक्षात्करोति।।१।।

विद्याविद्याफलाधिकारिणोरन्तरं दर्शयति—पराच इति :—

पराचः कामाननुयन्ति बालास्ते मृत्योर्यान्ति विततस्य पाशम्।
अथ धीरा अमृतत्वं विदित्वा ध्रुवमध्रुवेषु इह न प्रार्थयन्ते।।२।।

ये बाला विद्यातत्त्वमजानानाः पराचः बाह्यान् इन्द्रियविषयान्, कामान् दृष्टादृष्टान् अनुयन्ति भजन्ते। तेऽज्ञा मृत्योर्मारकस्य मम यमस्य विततस्य विस्तृतस्य पाशं घृणालज्जादिरूपमष्टपाशं यान्ति पाशबद्धाभवन्तीत्यर्थः। अथ ये धीरा विद्वांसः परं तत्त्वं जिज्ञासव-स्ते अमृततत्त्वं विदित्वा विज्ञाय ध्रुवं शिवतत्त्वं प्रार्थयन्ते कामयन्ते। इह अध्रुवेषु अविद्याविषयेषु न सज्जन्ते। "पाशबद्धो भवेज्जीवः पाश-मुक्तः सदाशिवः" इत्युक्तेः। "ज्ञात्वादेवं मुच्यते सर्वपाशैरिति" श्रुतेश्च।।२।।

परोक्षापरोक्षरूपं वेदनमुपदिष्टं वेदान्तेषु परोक्षज्ञानपूर्वकमेवा-परोक्षज्ञानं भवतीत्युक्तेन मन्त्रेण परोक्षमुपदिश्यापरोक्षमाह—येनेति:—

येन रूपं रसं गन्धं शब्दान् स्पर्शांश्च मैथुनान् ।
एतेनैव विजानाति किमत्र परिशिष्यते एतद्वै तत् ॥३॥

रूपं नीलपीतादि, रसं मधुराम्लादि, गन्धं सुरभ्यसुरभ्यादि, शब्दान् श्रवणेन्द्रियग्राह्यान्, स्पर्शान् शीतोष्णादीन्, मैथुनान् मिथुनीभावात् संजातान् च येन विजानाति अनुभवति, स आत्मा । ननु इन्द्रियमनोबुद्धिभ्योऽपि एतेषां परिज्ञानं भवति इति चेन्न—गौणत्वात् गौणरूपेणैव एतानि ज्ञातुं समर्थानि भवन्ति, न प्रधानतः प्राधान्येन एषां परिज्ञानं आत्मनैव भवति । इत्याह एतेनैवेति मरणान्तरं किमत्र परिशिष्यते नवेति यत्तव प्रश्नः तत्तत्त्वमेतदेव परिशिष्यते नित्यत्वात् ॥३॥

अवस्थात्रयं तत्सन्धिज्ञानं च चेतनतत्त्वादेव भवतीत्याह—स्वप्नान्तमिति :—

स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥४॥

येन स्वप्नं तदन्तं च, तथा जागरितं तदन्तं च, उभौ अनुपश्यति जानाति तं महान्तं महत्परिमाणकं विभुं व्यापकमात्मतत्त्वं मत्वा साक्षात्कृत्य धीरो विद्वान् न शोचति शोकमोहाभिभूतो न भवति ॥४॥

जीवतत्त्वं ब्रह्मतत्त्वादभिन्नमेवेत्याह–य इममिति :—

य इमं मध्वदं वेद आत्मानं जीवमन्तिकात् ।
ईशानं भूतभव्यस्य न ततो विजुगुप्सते एतद् वै तत् ॥५॥

यः कश्चिदपि अधिकारी मध्वदं मधुकर्मफलमत्तीति जीवं प्राणधारिणमात्मानमन्तिकात् समीपस्थं भूतभव्यस्य कालत्रयावच्छिन्नस्य चराचरस्य जगत ईशानमीश्वरं वेद जानाति । ततो न विजुगुप्सते तस्मात् कारणात् घृणादिभावयुक्तो न भवति । ,शिवः सन् विमुक्तो भवतीत्यर्थः । ननु सर्वाधीनस्य जीवतत्त्वस्य कथमीश्वरत्वमिति-चेन्न—प्रमाणात् "शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः" इत्यनेनेश्वरत्वस्य स्वीकारात् त्वत्पृष्टमिदमेव तत्त्वम् ॥५॥

हिरण्यगर्भोऽपि तस्मादेवोत्पद्यते इत्याह—य इति :—

यः पूर्वं तपसो जातमद्भ्यः पूर्वमजायत ।।

गुहां प्रविश्य तिष्ठन्तं यो भूतेभिर्व्यपश्यत एतद् वै तत् ।।६।।

यः कश्चित् पूर्वं तपसो ज्ञानरूपात् जातमाविर्भूतः तथा अद्भ्यः जलेभ्यः पूर्वमजायत उत्पन्नः । "जन्माद्यस्य यतः" इति निर्देशात् । गुहां सर्वप्राणिनां बुद्धिं प्रविश्य, साक्षिरूपेण तिष्ठन्तं स्थितः यो भूतेभिः तत्त्वज्ञैः प्राणिभिः व्यपश्यत । तत्त्वरूपेण निश्चीयते । एतद् वै तत् त्वया पृष्टमेतदेव तत्त्वं ज्ञातव्यम् ।।६।।

उक्तमेवार्थं प्रकारान्तरेणाह—येति :—

या प्राणेन सम्भवति अदितिर्देवतामयी ।

गुहां प्रविश्य तिष्ठन्ती या भूतेभिर्व्यजायत एतद् वै तत् ।।७।।

या अदितिर्देवानां माता प्राणेन सूत्रात्मतादात्म्येन देवतामयी सर्वदेवात्मिका "निःशेषदेवगणशक्तिसमूहमूर्त्या" इत्युक्तत्वात् सम्भवति । देवस्तुतिभिर्विशेषरूपेणाविर्भवति । गुहां प्रविश्य आधारचक्रे कुण्डलिनीरूपेण तिष्ठन्ती सार्धत्रिवलयरूपेण स्वयंभूलिङ्गं वेष्टयन्ती या अदितिर्महाशक्तिर्भूतेभिः सर्वप्राणिभिः सह तादात्म्यमापन्ना सती व्यजायत स्थिता अस्ति एतत्त्वया पृष्टमात्मतत्त्वं तदेव ज्ञातं भवति ।।७।।

योगिभिः कर्मिभिश्चोपास्योऽग्निरपि ब्रह्मैव इत्याह—अरण्योरिति :—

अरण्योर्निहितो जातवेदा गर्भ इव सुभृतो गर्भिणीभिः । दिवे दिवे ईड्यो जागृवद्भिः हविष्मद्भिर्मनुष्येभिरग्निः एतद् वै तत् ।।८।।

यो जातवेदा अग्निः अरण्योः उत्तराधरमन्थनकाष्ठयोर्निहितः वर्तमानः गर्भिणीभिः स्त्रीभिः सुभृतः सुष्ठुधृतो गर्भ इव जागृवद्भिः सततजागरणशीलैः योगिभिः ध्यानादिभिरन्तश्चिन्त्यमानः हविष्मद्भिर्याज्ञिकैर्मनुष्येभिः मनुष्यैर्यज्ञे धृतः दिवे दिवे अहर्दिवं सततं स्वर्गार्थिभिर्मुमुक्षुभिर्योगिभिश्च ईड्यःस्तुत्यो भवति एतद् वै तत् ब्रह्मतत्त्वम् ।।८।।

स्वरविद्यामाह—यतश्चेति :—

यतश्चोदेति सूर्योऽस्तं यत्र च गच्छति ।

तं देवाः सर्वेऽर्पितास्तदु नात्येति कश्चन एतद्वै तत् ।।९।।

यतः प्राणाख्यात् तत्त्वात् सूर्यश्चकारात् चन्द्रोऽपि ग्राह्यः, साहचर्यात्, उदेति नियमेन प्रवहति। यत्र यस्मिँश्च अस्तं लयं गच्छति। तस्मिन् प्राणे सर्वेदेवा इन्द्रियाणि अर्पिता। रथनाभौ अरा इव। तं प्राणाख्यं कश्चन कोऽपि नात्येति न अतिक्रामति। एतद् वै तत् ब्रह्मतत्त्वमस्ति। आह च शास्त्रम्—"स्वरे वेदाश्च शास्त्राणि स्वरे गन्धर्वमुत्तमम्। स्वरे च सर्वं त्रैलोक्यं स्वरमात्मस्वरूपकम्॥" स्वरे चन्द्रसूर्ययोरुदयास्तौ प्रसिद्धौ स्तः ॥९॥

पूर्वोक्तैः एतैर्मन्त्रैः शुद्धविद्याविषयकं ब्रह्मणः सर्वात्मकत्वमुक्तं, तथापि सर्वैः लौकिकैः पण्डितैश्च द्वैतप्रपञ्चस्य नानात्मकत्वमधिगतमेतद् विरोधं दूरीकरणार्थमाह—यदेवेहेति :—

यदेवेह तदमुत्र यदमुत्र तदन्विह।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥१०॥

यदात्मतत्त्वमिह द्वैते विद्यते तदेवामुत्राद्वैते च अनुगतं, यच्चाद्वैते तद् द्वैते चानुप्रविष्टं, द्वैतादद्वैतमद्वैताद् द्वैतमित्युक्तिः, अद्वैतसमर्थनाय यः कश्चित् इह विषये नानेव भेदबुद्धिं पश्यति स मृत्युं संसारं जननमरणरूपं प्राप्नोति अतोऽद्वैतमेव निश्चेतव्यम् ॥१०॥

तत्साधनमाह—मनसैवेति :—

मनसैवेदमाप्तव्यं नेह नानास्ति किंचन।
मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति ॥११॥

मनसैव शुद्धान्तःकरणजन्येन सोऽहमिति प्रत्ययेनैव इदमभेदज्ञानमाप्तव्यं निश्चेतव्यम्। इह विषये नाना किंचन नास्ति। भेदस्य मयिकत्वात् "मिथ्याजगदधिष्ठाना" इत्युक्तत्वात्। य इह नाना इव पश्यति भेदात्मकम्; स मृत्योः सकाशात् मृत्युं मरणं गच्छति। अतः विद्याफलमद्वैतं, द्वैतंचाविद्याफलं श्रेयः प्रेय इति विभागेन बोध्यम् ॥११॥

अन्तरहन्तारूपं सादाख्यतत्त्वमाह—अंगुष्ठमात्र इति :—

अंगुष्ठमात्रः पुरुषो मध्ये आत्मनि तिष्ठति।
ईशानो भूतभव्यस्य न ततो विजुगुप्सते एतद् वै तत् ॥१२॥

अंगुष्ठमात्रः अंगुष्ठपरिमितः "प्रमाणे मात्रच्" अंगुष्ठमात्रे हृदयाकाशे उपलब्धत्वात् पुरुषः पूर्णः मध्ये आत्मनि शरीरे तिष्ठति वर्तते। भूतभव्यस्य निखिलस्य जगत ईशानः ईश्वरः अन्तरहन्तारूपः सदाशिव इति ज्ञात्वा ततः ज्ञानादूर्ध्वं न विजुगुप्सते घृणादिभावैर्नाभिभूयते। सहस्रदलकमले एतदनुसन्धानं, समयिब्रह्म-ब्रह्मवादिनाम्। एतद् वै तत् तत्त्वं वेदितव्यम् "ईशानः सर्वविद्यानाम्" इति मन्त्रवर्णनात् ॥१२॥

ईश्वरतत्त्वस्य ज्योतिःस्वरूपतामाह–अंगुष्ठमात्र इति :—

अंगुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः।
ईशानो भूतभव्यस्य स एवाद्य स उ श्व एतद् वै तत् ॥१३॥

अंगुष्ठमात्रः पुरुषः पूर्णः अधूमको धूमरहितः ज्योतिरिव प्रकाश इव वर्तमानोऽस्ति। भूतभव्यस्य समस्तस्य जगतः ईशानः ईश्वरो बहिरहन्तारूपः स एव अद्य वर्तमानकाले, स एव श्वः आगामि समयेऽपि भविष्यति। त्रिकालाबाधितत्त्वं तस्यावगन्तव्यमेतत्सदाशिवेश्वराभिधेयं तत्त्वं तदेव तत्त्वं यत्त्वया पृष्टम् न तु मायाकल्पित मित्यर्थः ॥१३॥

शुद्धविद्याया अनेके प्रकाराः प्रदर्शिताः एतेषां सर्वेषां गन्तव्यस्थानमेकमेव केवलं रुचिभेदात् साधकानां प्रवृत्तिभेदो भवति इति सर्वेषामभेदप्रदर्शनायाह :—

यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति।
एवं धर्मान् पृथक् पश्यन् तानेवानुविधावति ॥१४॥

दुर्गे पर्वतशिखरे वृष्टं मेघान्निपतितमुदकं पर्वतेषु निम्नपर्वतप्रदेशेषु विधावति अनेकधा गच्छति, एवं पूर्वोक्ताननेकान् धर्मान् आत्मप्रापकान् पृथक् पश्यन् तानेव अनुविधावति सर्वेषामैक्यं भवति। यथा सर्वेषां स्रोतसां दुर्गस्थजलेऽभेदः तद्वत् उक्ताः सर्वाः विद्याः सर्वे विद्याभेदा ऐक्यमेव गच्छन्ति। सर्वत्र एकस्यैवरूपभेदात्। विद्यातत्त्वेन सर्वं खल्विदं ब्रह्मेति निश्चितं भवति ॥१४॥

अद्वैतनिष्ठस्य स्थितिमाह–यथेति :—

यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति ।
एवं मुनेर्विजानत आत्मा भवति गौतम ।।१५।।

हे गौतम ! यथा शुद्धमुदकं स्वच्छजलं शुद्धे जले आसिक्तं तादृगेव भवति तत्स्वरूपतामेवोपगच्छति । एवं विजानतो मुनेस्तत्त्वसाक्षात्कुर्वतः आत्मा स्वरूपं भवति अद्वैतस्वरूपो भवतीत्यर्थः।।१५

इति द्वितीयेऽध्याये प्रथमा वल्ली समाप्ता ।

अथ द्वितीया वल्ली

अतिसूक्ष्मस्य ब्रह्मतत्त्वस्य दुर्विज्ञेयत्वं विज्ञाय प्रकारान्तरेण तदुपदेष्टुमाह–पुरमिति :—

पुरमेकादशद्वारमजस्यावक्रचेतसः ।
अनुष्ठाय न शोचति विमुक्तश्च विमुच्यते एतद् वै तत् ।।१।।

अजस्य षड्भावविक्रियारहितस्य अवक्रचेतसः शुद्धान्तःकरणस्य उपासकस्य एकादशद्वारं पुरं श्रीचक्ररूपेणोपास्य न शोचति शोकरहितो भवतीत्यर्थः । विमुक्तः सन् विमुच्यते जीवन्मुक्तिं विदेहमुक्ति च उभे एव लभते । ननु नवद्वारे पुरे देहीत्यादिवचनेन नवद्वारमित्येव स्मर्यते । कथमेकादशद्वारमितिचेन्न—अविरोधात् । नाभिब्रह्मरन्ध्रयोर्गुप्तत्वादग्रहणम् नतु निषेधात् । नाभ्या सह पायुलिङ्गेद्वे, नेत्रे द्वे, द्वौ कर्णौ, द्वे नासिके, एकं मुखमेकं ब्रह्मरन्ध्रमिति एकादशद्वारमाध्यात्मिकं-बाह्यं श्रीचक्रं दैविकं तन्त्रशास्त्रप्रसिद्धं मुमुक्षुभिरुपास्यम्।१।।

केवलं श्रीचक्र एव नोपास्यते किन्तु अनेकरूपेण सैव चितिरस्तीति आह–हंस इति—

हंसः शुचिषद्वसुरन्तरिक्षसद् धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद् वरषद् ऋतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ।।२

हंसः हंसस्वरूपा, "हकारेण बहिर्याति सकारेण विशेत् पुनः । हंसात्मिकां भगवतीं जीवो जपति सर्वदा ।" इत्युक्तत्वात् शुचौ पवित्रे सीदतीति शुचिषद् शुद्धस्वरूपेतियावत् । वसुः वासयतीतिव्यापकस्वरूपा अन्तरिक्षसद् अन्तरिक्षे सीदतीति वायुस्वरूपा, होता

यजमानरूपा, वेदिषद् वेदौ सीदतीति वेदिषु वा, ज्ञानस्वरूपा, अतिथिः षोडशकलात्मिका, दुरोणसद् अतिथिरूपिणी, नृषद् मनुष्येषु शक्तिरूपा, पुरुषार्थरूपा वा, वरसद् वरेषु देवेषु सीदतीति दिव्यगुणरूपेण,व्योमसद् पञ्चाकाशेषु वर्तमाना, अब्जा श्रीरूपा, गोजा सीतारूपा, ऋतजा ऋताज् जायत सत्यभामा इति, यज्ञजा याज्ञसेनीरूपा, अद्रिजा अद्रेर्हिमालयाज् जातेति हैमवती उमारूपा, ऋतं सत्यरूपा, बृहत् सर्वेभ्यः महत्त्वपरिमाणयुक्तेति। उक्तं च—"देव्या यया ततमिदं जगदात्मशक्त्येति" मारकण्डेयपुराणात् ।।२।।

प्रकारान्तरेणाह—ऊर्ध्वमिति :—

ऊर्ध्वं प्राणमुन्नयति अपानं प्रत्यगस्यति ।
मध्ये वामनमासीनं विश्वेदेवा उपासते ।।३।।

ऊर्ध्वं हृदयात् प्राणं प्राणतत्त्वं प्रापयति नयति, तथा अपानं प्रत्यग् अधो नयति क्षिपति। यो योगी मध्ये मध्यप्रदेशे वामनम् सुन्दरं सुन्दर्या अभिन्नमासीनं स्थितं नित्यानन्दस्वरूपं चिन्तयते तं विश्वेदेवा चक्षुरादीनि सर्वाणीन्द्रियाणि उपासते। राजेव तमाश्रित्य स्व स्वव्यापारं कर्तुं समर्थानि भवन्तीत्यर्थः। अथवा क्रियां परिवर्त्य प्राणमधो नयति अपानमूर्ध्वं यः अस्यति क्षिपति उभयोरैक्यं सम्पादयति। एवं व्यापारवान् योगी मध्ये त्रिकोणस्थिते आधारचक्रे वामनं शिवशक्तिसामरस्यापन्नं विश्वेदेवा सर्वे देवा विद्वांसो वा यमुपासते तं चिन्तयतीत्यर्थः ।।२।।

अस्य विस्रंसमानस्य शरीरस्थस्य देहिनः ।
देहाद्विमुच्यमानस्य किमत्र परिशिष्यते एतद् वै तत् ।।४।।

अस्य शरीरस्थस्य शरीरे विद्यमानस्य देहिनः आत्मनः विस्रंसमानस्य देहाद् विमुच्यमानस्य किमत्र परिशिष्यते यत्त्वया पृष्टमेतद् वै तत्तत्त्वं विज्ञेयम् ।।४।।

न प्राणेनापानेन मर्त्यो जीवति कश्चन ।
इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ ।।५।।

कश्चन मर्त्यो मनुष्यः प्राणेन अपानेन वा न जीवति। इतरेण प्राणापानाभ्यां भिन्नया चेतनाशक्त्या जीवन्ति, जीवति वचनव्यत्ययः

छान्दसः। यस्मिन् चेतनाशक्तिपदार्थे एतौ प्राणापानौ उपाश्रितौ आरोपितौ तामेव जीवनशक्तिमाश्रित्य एतयोःप्रवर्तनमिति भावः ।।५।।

मरणोत्तरं जीवगतिमाह–हन्तेति—

हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम् ।
यथा च मरणं प्राप्य आत्मा भवति गौतम ।।६।।

हन्तेदानीं पुनरपि गुह्यं रहस्यमयं ब्रह्म बृहत्तमं सनातनं चिरन्तनं प्रवक्ष्यामि कथयिष्यामि। यथा च येन प्रकारेण मरणं प्राप्य मरणान्तरं हे गौतम ! आत्मा भवति तदपि वक्ष्यामीत्यर्थः ।।६।।

योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः ।
स्थाणुमन्येऽनु संयन्ति यथाकर्म यथाश्रुतम् ।।७।।

यथाकर्म शुभाशुभं यथाश्रुतं यथाज्ञानमन्ये देहिनः शरीरिणः शरीरत्वाय जननमरणात्मकत्वाय प्रपद्यन्ते कल्पन्ते। तथा निषिद्धकारिणः यथाकर्म यथाश्रुतं स्थाणुं स्थावरत्वमनुयन्ति संसरन्ति एवमेदं संसारचक्रं प्रवर्तते ।।७।।

यत्प्रतिज्ञातं गुह्यं बृहत्तमं सनातनं ब्रह्म तदाह–य एष इति—

य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः ।
तदेव शुक्रं तद् ब्रह्म तदेवामृतमुच्यते ।
तस्मिंल्लोकाःश्रिताःसर्वे तदु नात्येति कश्चन एतद्वैतत् ।।८।।

यः पुरुष आत्मा सुप्तेषु स्वस्वव्यापारोपरतेषु इन्द्रियादिषु कामं कामं निर्मिमाणः यथाकामं भुञ्जानः सन् जागर्ति तदेव शुक्रं शुद्धं तदेव ब्रह्म तदेव च अमृतमुच्यते कथ्यते, तस्मिन्नेव सर्वे इमे लोका लोकवासिनश्चाश्रिताः सन्ति तदधीना इत्यर्थः। तदु कश्चनं नात्येति नातिक्रामति सर्वकारणत्वात् एतद् वै तत् सनातनं ब्रह्म ।।८।।

सदृष्टान्तमाहाग्निरिति :—

अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ।।९।।

यथा एकोऽग्निः भुवनं सर्वलोकं प्रविष्टः व्यापकः सन् रूपं-रूपं प्रति अभिव्याप्य रूपो बभूव प्रकाशयिता भवति। कालव्यत्ययःछान्दसः। तथा सर्वभूतान्तरात्मा एकः सन् रूपं रूपं प्रति समस्त

नामरूपात्मकं दृश्यं प्रतिरूपो व्यापकस्तथा एतद् बहिरपि विद्यते अपरिमितत्वात् ॥९॥

तथा चाह :—

वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥१०॥

वायुर्यथा तत्तदाकृतिमद्रूपं भुवनं प्रविष्टः सन् रूपं रूपं प्रति तत्तदाकृतिमान् बभूव भवति। तथा सर्वभूतान्तरात्मा एकः सन् रूपं रूपं प्रति प्रतिशरीरं रूपो भवति, प्रकाशकस्तद् वाह्यश्चास्तीत्यर्थः ॥१०॥

ननु एकस्यात्मत्वे सुखदुःखयुक्तत्वं यथा जीवस्य तथा ब्रह्मणोऽपि स्यादितिचेन्न—अतथात्वात् इत्यत आह—सूर्य इति :—

सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः ।
एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः ॥११॥

यथा सर्वलोकस्य चक्षुरनुग्राहकः सूर्यश्चाक्षुषैर्बाह्यदोषैरन्धत्वकाणत्वादिभिर्न लिप्यते दुष्यते, तथैकः सर्वभूतान्तरात्मा लोकदुःखेन सुखदुःखादिना न लिप्यते, यतो हि स एतैर्बाह्यः अविद्यया अस्पृष्टंत्वात् शुद्धः तस्मान्नोक्तदोषावसरः ॥११॥

आत्मदर्शिनामेव सुखमित्यत आह—एक इति :—

एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति ।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥१२॥

एकः स्वगतादिभेदरहितः वशी सर्वस्य स्वामी सर्वभूतान्तरात्मा सर्वान्तिर्यामी य एकं रूपं बहुधा करोति स्वकीयया मायया नामरूपभेदभिन्नेनानेकरूपकः प्रतीयते, तमात्मस्थं बुद्धिस्थं येऽनुपश्यन्ति साक्षात्कुर्वन्ति ते धीराः स्थिरमतयस्तेषामेव शाश्वतमविनाशिसुखं भवति, इतरेषामतत्त्वविदां शाश्वतसुखोपलब्धिर्न भवतीत्यर्थः ॥१२॥

किञ्च :—

नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् ।१३

नित्यानां कालदिशाकाशानां नित्यत्वेन प्रसिद्धानामसौ नित्यः नित्यत्वप्रदाता। चेतनानां स्थावरजङ्गमानां चेतनश्चेतयिता स्फूर्तिप्रदाता अर्थात् सर्वेभ्यः पदार्थेभ्यः सत्तां स्फूर्तिं च प्रदाय स्वस्वकार्यकरणयोग्यतासम्पादको य एकोऽपि बहूनां जीवानां कामान् अभिलषितान् विदधाति करोति तमात्मस्थं ये धीरा अनुपश्यन्ति तेषामेव शाश्वती अपायरहिता शान्तिः सुखं भवति इतरेषां बाह्यवृत्तीनां न भवति। पाशववृत्तिरहिता एव सुखिन इति भावः ॥१३॥

वाङ्मनसयोरगोचरतत्त्वविषयकं प्रश्नं कुर्वन्नाह—तदेतदिति :—

तदेतदिति मन्यतेऽनिर्देश्यं परमं सुखम्।
कथं नु तद् विजानीयां किमु भाति विभाति वा ॥१४॥

तदेतदुपनिषत्प्रसिद्धं परमं सुखमनिर्देश्यं निर्देष्टुमशक्यं मन्यन्ते ब्रह्मविदः। तत् कथं नु इति वितर्के विजानीयां साक्षात्कुर्यां तत्तत्त्वं किम् उ भाति विभाति वा सामान्यविशेषरूपेण प्रकाशते किम्? ॥१४॥

अत्रोत्तरमिदमित्याह :—

न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोयमग्निः।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥१५॥

तत्र स्वात्मभूते ब्रह्मणि सूर्यो न भाति न प्रकाशयति, न चन्द्रतारकं नैशं ज्योतिरपि अयोग्यम्, इमा विद्युतः सौदामिन्योऽपि तथा न भान्ति, तर्हि अयं प्रसिद्धोऽग्निः कुतः प्रकाशयेत् क्षुद्रत्वात्। तमेव भान्तमनुपश्चात् इदं दृश्यमानं सर्वं भाति तस्य ब्रह्मणो भासा ज्योतिषा एव इदं सर्वं विभाति अनयैव रीत्या निश्चेयम् ॥१६॥

इति द्वितीयाध्याये द्वितीया वल्ली समाप्ता।

अथ तृतीया वल्ली

जगद्रूपकार्यद्वारा कारणतत्त्वं निश्चेतुमाह—ऊर्ध्वमूल इति :—

ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः।
तदेव शुक्रं तद् ब्रह्म तदेवामृतमुच्यते।
तस्मिँल्लोकाःश्रिताः सर्वे तदुनात्येति कश्चन एतद् वै तत् ॥१॥

एष इदन्तया निर्दिश्यमानः अश्वत्थः अश्वत्थपत्रमिव सर्वदा-चलस्वभावः सनातनः अनादिकालात् प्रवृत्तः संसारवृक्षः ऊर्ध्वमूल-ऊर्ध्वंनुपरिविद्यमानं मूलमाश्रयो यस्य स ऊर्ध्वमूलः, व्यापकत्वात् कारणत्वाच्चोर्ध्वत्वम्, अवाक्शाखः नानाप्रकारककर्मरूपस्तज्जन्यो-च्चावचयोनिविशेषयुक्तश्च एवं योऽश्वत्थरूपकेणोक्तो ब्रह्मपदार्थस्त-देव शुक्रं शुद्धं तद् ब्रह्म बृहत्तमं, तदेवचामृतमविनाशितत्त्वमुच्यते कथ्यते ब्रह्मविद्भिः। तस्मिन् सर्वे एते लोका भूरादयः श्रिता रथ-नाभौ अरा इव तद् उ कश्चन कोऽपि नात्येति नातिक्रामति कार्यस्य कारणाश्रितत्वनियमात्। एतद् वै तत् आत्मतत्त्वम् ॥१॥

यज्ज्ञानादमृतत्वप्राप्तिरित्येतदाह—यदिदमिति :—

यदिदं किञ्च जगत्सर्वं प्राण एजति निःसृतम्।
महद्भयं वज्रमुद्यतं य एतद् विदुरमृतास्ते भवन्ति ॥२॥

यद् इदं किञ्च नामरूपात्मकभेदभिन्नं सर्वं जगत् प्राणे चेतना-शक्तियुक्ते पदार्थे एजति चेष्टते। तस्मादेवेदं निःसृतमूर्णनाभिसकाशात् सूत्रमिव, "कम्पनात्" इत्यधिकरणन्यायात्। महद्भयं वज्रमुद्यतं यथा वज्रोद्यतकरं नियामकं दृष्ट्वा नियम्याः जनाः नियमेन प्रवर्तन्ते तथेदं तत्त्वं सर्वस्य नियामकमस्ति। य एतत्तत्त्वं विदुः जानन्ति, ते अमृता जननमरणरहिता भवन्ति। अमृतत्वप्राप्तौ ईश्वरनियमानु-कूलवर्तनमेव श्रेयः इति भावः ॥२॥

कथं तद्भयात्प्रवर्तत इत्याह—भयादिति :—

भयादस्य अग्निस्तपति भयात्तपति सूर्यः।
भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ॥३॥

अस्य भगवतो भयाद् भीत्या अग्निः प्रकाशात्मा देवः तपति। सूर्यो भयात् तपति प्रकाशते। अस्यैव भयात् इन्द्रो देवराजो वायुश्च स्वस्वकार्यमनुतिष्ठतः। तथा पञ्चमो मृत्युर्यमो धावति मारणात्मकं कार्यं करोति। एते महान्तोऽपि तस्यानुशासने वर्तन्ते। अतः सर्वै-स्तस्याज्ञा अवश्यमेव कर्तव्या। नोचेद् जननमरणं दुर्वारमेव स्यात्। मन्त्रद्वयेन भैरवं भावं प्रतिपादितवान् इति निष्कर्षः ॥३॥

परमात्मज्ञानं तिरस्कृत्यैव जीवो जननमरणे प्राप्नोति इत्याह—इहेति :—

इह चेदशकद् बोद्धुं प्राक् शरीरस्य विस्रसः ।
ततः सर्गेषु लोकेषु शरीरत्वाय कल्पते ॥४॥

इह अस्मिन् जन्मनि एव शरीरस्य विस्रसः त्यागात् प्राक् प्रथममेव बोद्धुं साक्षात्कर्तुमशकद् यो मुमुक्षुः । तस्यैव श्रेयः प्राप्तिः । ततोऽन्यथा सर्गेषु लोकेषु संसारेषु शरीरत्वाय जननमरणत्वाय कल्पते जायते । अतः शीघ्रमेव तत्प्राप्तौ यतितव्यम् ॥४॥

आत्मदर्शनं कुत्र कथं भवति इत्याह—यथेति :—

यथादर्शे तथात्मनि यथा स्वप्ने तथा पितृलोके ।
यथाप्सु परीव ददृशे तथा गन्धर्वलोके छायातपयोरिव ब्रह्मलोके ॥५॥

यथा आदर्शे दर्पणे प्रतिबिम्बं पश्यति तथा आत्मनि आत्मकल्पायां शुद्धायां बुद्धौ शुद्धं ब्रह्मतत्त्वं स्पष्टं पश्यति । यथा स्वप्ने जाग्रद्वासनाजन्ये अविविक्तमपृथग्भूतमात्मानं पश्यति तथा पितृलोके कर्मफलासक्तत्वात् पश्यति । यथाप्सु परीव ददृशे जलेऽविविक्तं दृश्यत इव तथा गन्धर्वलोके रागाक्रान्तमेवात्मदर्शनं भवति । एवं सर्वत्राऽनुसन्धेयं । ब्रह्मलोके शुद्धप्रकाशमेव, सत्यलोके छायातपयोरिव पार्थक्येनानुभवगम्यो भवति । तस्मादस्मिन् शरीरे आत्मसाक्षात्कारः कर्तव्य एव ॥५॥

आत्मबोधे रीतिमाह—इन्द्रियाणामिति :—

इन्द्रियाणां पृथग्भावमुदयास्तमयौ च यत् ।
पृथगुत्पद्यमानानां मत्वा धीरो न शोचति ॥६॥

पृथक्-पृथक् उत्पद्यमानानां जायमानानामिन्द्रियाणां चक्षुरादीनां यत् यतः उदयास्तमयौ आविर्भावतिरोभावौ कूर्माङ्गानीव भवतः । तं मत्वा आत्मत्वेनानुभूय धीरो न शोचति । शोकमोहयोः कारणमतिक्रामति इत्यर्थः ॥६॥

आत्मनः सकाशात् इन्द्रियादीनां केन क्रमेणाविर्भावतिरोभावौ भवत इत्याह—इन्द्रियेभ्य इति—

इन्द्रियेभ्यः परं मनो मनसः सत्वमुत्तमम् ।
सत्वादधिमहानात्मा महतोऽव्यक्तमुत्तमम् ॥७॥
अव्यक्तात्तु परः पुरुषो व्यापको लिङ्ग एव च ।
यं ज्ञात्वा मुच्यते जन्तुरमृतत्वं च गच्छति ॥८॥

इन्द्रियेभ्यः चक्षुरादिभ्यः परमुत्कृष्टं मनः मनस्तत्त्वं, मनसः सत्त्वं बुद्धितत्त्वं परं श्रेष्ठं, सत्वादधिश्रेष्ठं महानात्मा समष्टिमहत्तत्त्वं, महत्तत्त्वादव्यक्तमुत्तममव्यक्तात् प्रकृतितत्त्वात्तु पुरुषः शिवपदार्थः परः। स तु व्यापकः पूर्णः अलिङ्गः लिङ्गप्रमाणागम्यः यं ज्ञात्वा जन्तुर्मुच्यते संसारबन्धनात् अमृतत्त्वं च गच्छति लभते ॥७-८॥

अलिङ्गस्यात्मपदार्थस्यानुभवः कथं सम्पद्यत इत्याह—न संदृशे इति :—

न संदृशे तिष्ठतिरूपमस्य, न चक्षुषा पश्यति कश्चनैनम् ।
हृदा मनीषा मनसाभिक्लृप्तो य एतद् विदुरमृतास्ते भवन्ति ॥९॥

अस्य परतत्त्वस्य शिवशक्तिसामरस्यभावापन्नस्य रूपं संदृशे दृष्टि विषये न तिष्ठति नागच्छति तदतिक्रान्तत्वात् । अत एनं चक्षुषा नेत्रेन्द्रियेण कश्चन न पश्यति न द्रष्टुं शक्नोति, हृदा मनीषा हृदि वर्तमानया बुद्धया मनसा अभिक्लृप्तो ज्ञातुं शक्यः । "मनसैवानुद्रष्टव्यः" इतिश्रुतेः । य एवमेतद् विदुरनुभवन्ति ते अमृता भवन्ति मृत्युवेदनां तरन्तीत्यर्थः । पराहन्ताया एव लक्ष्यभूतत्वम् ॥९॥

पराहन्ताविद्यां परमगतिमाह—यदेति—

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह ।
बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम् ॥१०॥

स्थिरचित्तस्य योगिनो यदा पञ्चेन्द्रियाणि ज्ञानपदवाच्यानि ज्ञानसाधनत्वात् मनसा सह बुद्धिश्च न विचेष्टति चेष्टते प्राप्तसमाधानत्वात् तामेव परमां गतिं मोक्षाख्यामाहुः कथयन्ति अध्यात्मविदः इति ॥१०॥

योगावस्थामाह—तामिति :—

तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम् ।
अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ ॥११॥

स्थिरामिन्द्रियधारणां सिद्धयोगावस्थां तां योगमिति योगिनो मन्यन्ते कथयन्ति। तदा तस्मिन् काले योगी अप्रमत्तः प्रमादरहितो भवति। हि यतः योगः प्रभवाप्ययौ उत्पत्तिविनाशधर्मवान्। योगस्य क्रियात्मकत्वं तच्चेन्द्रियचेष्टात्मकत्वात् तस्मिन् प्रमादो भवत्येव। अतः प्रमादरहितेन चेतसा योगिना भवितव्यम् ॥११॥

आत्मदर्शने सद्बुद्धिरेव कारणमित्यत आह—नैवेति :—

नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा।
अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते ॥१२॥

वाचा वागिन्द्रियेण मनसा संकल्पविकल्पात्मकेन चक्षुषा नेत्रेन्द्रियेण बाह्यसाधनेनायमात्मा प्राप्तुं साक्षात्कर्तुं न शक्यः, नामरूपानात्मविषयत्वादेषाम्। अस्तीति एवं रूपेण ब्रुवतो जनादास्तिकादन्यत्र नास्तिके कथं तदुपलभ्यते। अर्थात् आस्तिकैरेवानुभवितुं शक्यते आत्मा। नास्तिकानां दूरत्वात्तदनुभवितुमशक्यमित्याशयः ॥१२॥

असत्पक्षं निराकृत्याह—अस्तीति :—

अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चोभयोः।
अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति ॥१३॥

अस्तीत्येव सत्तारूपेणैवोपलब्धयः साक्षात्कर्तव्यः। तत्त्वभावेन चोपलब्धव्यः। उभयोः सम्पन्ने सति तत्त्वभावस्तत्त्वरूपत्वं प्रसीदति वैशद्यं प्राप्नोति। प्रथममस्तीति एवोपलब्धस्य पश्चात् तत्त्वभावस्य च क्रमो ज्ञातव्यः। उक्तं च—"नासतो विद्यते भावो नाभावो विद्यते सतः। उभयोरपि दृष्टोन्तस्त्वनयोस्तत्त्वदर्शिभिः।" शिवादारभ्य पृथिवीपर्यन्तानि षट्त्रिंशत्तत्त्वानि। तत्त्वानां भावस्य इति रहस्यम्, तद्यथा—शिवःशक्तिः, सदाशिवः, ईश्वरः, शुद्धविद्यातत्त्वम्, माया, कला, रागः, नियतिः, कालः, विद्या, पुरुषः, प्रकृतिः, महत्तत्त्वम्, अहंकारः, शब्दस्पर्शरूपरसगन्धपञ्चतन्मात्राणि, एकादश इन्द्रियाणि, पञ्चमहाभूतानि। एषां वर्णनम् अत्रोपनिषदि यथायथमागतम् तत्पाठकैरवगन्तव्यमिति ॥१३॥

सत्तारूपस्यात्मनोज्ञानेसत्येवाविद्यानिवृत्तिरमृतत्वं च भवतीति आह—यदेति :—

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ।।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ।।१४।।

यदा यस्मिन् काले अस्य साधकस्य हृदि अन्तःकरणे श्रिताःस्थिताः सर्वे कामाः प्रमुच्यन्ते निवर्तन्ते। अथेत्यनन्तरं मर्त्यो मरणधर्मा जीवोऽमृतो भवति। शिवः सन् मुच्यते। अत्र जीवन्नेव ब्रह्म समश्नुते ब्रह्मानन्दमनुभवतीति ।।१४।।

हृदयग्रन्थिप्रभेद एवामृतत्वप्राप्तिरित्येतदाह—यदेति :—

यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः ।
अथ मर्त्योऽमृतोभवत्येतावद्ध्यनुशासनम् ।।१५।।

यदा यस्मिन् काले इह जीवन्नेव हृदयस्य ग्रन्थयः अहं ममेदमिति-रूपाः प्रभिद्यन्ते निवर्तन्ते। अथेत्यनन्तरं मर्त्यो मरणधर्मा जीवोऽमृतो भवति एतावद् हि अनुशासनमुपदेशो विद्यायाः। छिन्नमस्तया विद्यया एतत्सुसम्पादमिति वदन्ति ।।१५।।

प्रयाणकाले कृतप्राणापानैक्यो जाग्रत्कुण्डलीको ज्योतिःस्वरूपं चिन्तयन् सुषुम्ना नाडया उत्क्रामन् योगी अमृतत्वं गच्छतीत्यत आह—शतमिति—

शतं चैका च हृदयस्य नाड्यः तासां मूर्धानमभिनिःसृतैका ।
तयोर्ध्वमायन्नमृतत्वमेति विष्वङङन्या उत्क्रमणे भवन्ति ।।१६।।

शतं शतसंख्याका एका च सुषुम्ना नाडी हृदयस्य हृदयात् विस्तृता तासां नाडीनां मध्ये एका सुषुम्ना मूर्धानं ब्रह्मरन्ध्रं भित्वा निर्गता। तया नाडया योगविधिद्वारा आयन् गच्छन् योगी अमृतत्वमेति जनन-मरणमतिक्रामति। विष्वङ नानाविधगतयोऽन्या नाडयः उत्क्रमणे भवन्ति संसार प्राप्तये भवन्तीत्यर्थः ।।१६।।

वल्लीप्रतिपाद्यविषयमुपसंहरन्नाह—अंगुष्ठमात्र इति :—

अंगुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये संनिविष्टः ।
तं स्वाच्छरीरात् प्रवृहेन्मुञ्जादिवेषीकां धैर्येण ।
तं विद्याच्छुक्रममृतमिति ।।१७।।

अंगुष्ठमात्रः अंगुष्ठपरिमिते हृदयाकाश उपलब्धत्वात् पुरुषः पूर्णः अन्तरात्मा साक्षी जनानां हृदयें हृत्प्रदेशे सदा सर्वस्मिन् काले सन्निविष्टः तं स्वाच्छरीरात् मुञ्जाद् इषीकां तृणविशेषमिव धैर्येण अप्रमादेन प्रवृहेत् निष्कासयेत्। तं शुक्रं शुद्धममृतं च विद्यात्। स्वात्माभेदेन साक्षात्कुर्यात्। अभ्यास उपनिषत्समाप्त्यर्थः ॥१७॥

विद्यां स्तुवन्नुपसंहाररूपेणाह—मृत्युप्रोक्तामिति :—

मृत्युप्रोक्तां नचिकेतोऽथलब्ध्वा विद्यामेतां योगविधिं च कृत्स्नम्।
ब्रह्मप्राप्तो विरजोभूद् विमृत्युरन्योऽप्येवं यो विदध्यात्ममेव ॥१८॥

मृत्युप्रोक्तां यमाचार्येणोपदिष्टामेतां पूर्वोक्तां विद्यां कृत्स्नं सम्पूर्णं योगविधिं च नचिकेतो अथ लब्ध्वा प्राप्य विरजः दोषरहितः विमृत्युः जननमरण रहितः सन् ब्रह्म परमात्मानं प्राप्तः अन्योऽपि कश्चिद् एवं विद् ज्ञास्यति सोऽपि अध्यात्मं ब्रह्मस्वरूपमेवमेव प्राप्स्यतीति ॥१८॥

ओं सहनाववतु सह नौ भुनक्तु सहवीर्यं करवावहै।
तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

इति कठोपनिषत्प्रकाशभाष्यम् द्वितीयाध्यायः समाप्तः ॥

मुण्डकोपनिषद्

ओं भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षिभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेम देवहितं यदायुः ॥
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

॥ ओं शान्तिः शान्तिः शान्तिः ॥

मङ्गलाचरणम्

यं ज्ञात्वा कृतकृत्याःस्युर्मुनयः पारदर्शिनः ॥
आत्मानं जगदाधारं परायोग समन्वितम् ॥१॥
सृष्ट्यादिकार्यकर्तारं भक्तानुग्रहणे रतम् ।
वृद्धये तं नमस्यामो ब्रह्मज्ञानप्रसिद्धये ॥२॥

आथर्वणिकानां शौनकशाखीया सकलाङ्गसम्पूर्णेयं मुण्डकोपनिषत् । अस्या अध्ययनेनोपनिषत्प्रतिपाद्यं सूक्ष्मं व्यवहितं सर्वतत्त्वं बुद्धिगोचरं भवति । चीर्णव्रताय उपदेष्टव्येति सम्प्रदायः । "नैतदचीर्णव्रतोऽधीते" इत्युक्तत्वात् । वेदान्तशास्त्रप्रसिद्धमनुबन्धचतुष्टयमत्रापि संग्राह्यम् ।

विद्यास्तुत्यर्थमैतिह्यमाह–ब्रह्मेति :—

ओं ब्रह्मा देवानां प्रथमः सम्बभूव विश्वस्य कर्ता भुवनस्य गोप्ता ।
स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह ॥१॥

ब्रह्मा चतुर्वेदविद् चतुराननः देवानामिन्द्रादीनां प्रथमः आदिः सम्बभूव प्रादुर्बभूव । "हिरण्यगर्भः समवर्तताग्रे" इति श्रुतेः । "यो ब्रह्माणं विदधाति पूर्वम्" इति ब्रह्मणः प्राथम्यश्रवणात् स विश्वस्य भुवनस्य सकलचराचरस्य कर्ता निर्माता गोप्ता पालयिता च सम्बभूव । स सर्वविद्यानां प्रतिष्ठामाश्रयभूतां ब्रह्मविद्यां परमात्मनो विद्यां नदीनामाश्रयभूतं समुद्रमिव ज्येष्ठपुत्राय अथर्वाय एतन्नामकाय प्रथमोत्पन्नाय पुत्राय प्राह उक्तवान् । एतेनाध्यात्मविद्याया अङ्गित्वमन्यासां तदङ्गत्वमिति सिद्ध्यति ॥१॥

अथर्वणे यां प्रवदेत ब्रह्माथर्वा तां पुरोवाचाङ्गिरे ब्रह्मविद्याम् ।
स भारद्वाजाय सत्यवहाय प्राह भारद्वाजोंऽगिरसे परावराम् ॥२॥

ब्रह्मा अथर्वणे नान्तोऽपि अथर्वशब्दः, यां विद्यां अथर्वनामकाय शिष्याय प्रवदेत अवादीत् । तां ब्रह्मलब्धां विद्याम् अथर्वाङ्गीरे नाम्ने शिष्याय पुरा सृष्टयादौ उवाच उक्तवान् । स भारद्वाजाय भारद्वाज-गोत्राय सत्यवहाय नामकाय प्राह । भारद्वाजोऽङ्गिरसे नामकाय स्वशिष्याय परावरां परस्मादवरेण लब्धां विद्यां प्राह ॥२॥

अङ्गिरसः केन प्राप्ता विद्येति प्राह—शौनक इति :—

शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ ।
कस्मिन्नुभगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति ॥३॥

शौनकः शुनकस्य ऋषेः पुत्रः महाशालः महागृहस्थः एतेन विद्याधिकारित्वं गम्यते विधिवत् समित्पाणिः सन् श्रोत्रियं ब्रह्मनिष्ठं गुरुमभिगच्छेदिति श्रुत्युक्तमङ्गिरमुपसन्न उपगतः सन् पप्रच्छ पृष्टवान् भगवो हे भगवन् ! कस्मिन्नु वस्तुनि विज्ञाते इदं सर्वं दृश्यमानं ज्ञातं भवति । तदेकं वस्तु किं यस्य ज्ञानाधीनं सर्वमिदं जगदित्यभिप्रायः ॥३॥

एवं शौनकेन पृष्टोंऽगिरा प्राह—

तस्मै स होवाच द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति परा चापरा च ॥४॥

सोंऽगिरा तस्मै शौनकाय ह किलोवाच उक्तवान् । यद् द्वे विद्ये वेदितव्ये ज्ञातव्ये इति । ह स्मेति निश्चयार्थे निपातौ । अर्थात् निश्चयेन विद्याद्वैविध्यं ज्ञातव्यत्वेनाभिमतम् इत्यर्थः । यद् ब्रह्मविदः परामपरां च वदन्ति । परा उत्कृष्टा, अपरा हीना तत्साधनभूता ॥४॥

क्रमस्याविवक्षितत्वात् प्रथमं परासाधनभूतामपरामेवाह्—तत्रेति :—

तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदः अथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति । अथ परा यया तदक्षरमधिगम्यते ॥५॥

तत्र तयोर्मध्ये अपरा, ऋग्वेदः पादबद्धमन्त्रविशेषस्तद् ब्राह्मणं च "मन्त्रब्राह्मणयोर्वेद नामधेयमिति प्रमाणात्"। "ऋग्यत्रार्थवशेन पादव्यवस्था" (जै० सू० १-२-३३)। "गीतीषु सामाख्या", शेषे यजुः शब्दः, इत्यादि सूत्रैर्वेदलक्षणानि आचार्यैः प्रदर्शितानि। ननु ब्राह्मणानां वेदेषु कथमन्तर्भाव इति चेन्न—शेषे ब्राह्मण शब्द इति प्रमाणात् ब्राह्मणानां वेदत्वमविरुद्धम्। चतुर्थोऽथर्ववेदोऽपि वेदत्वेनाभिमतः गोपथे ब्रह्मवेदत्वेन प्रसिद्धः। शौनक चरणव्यूह परिशिष्टेऽपि एवमेव स्वीचकार। शिक्षा याज्ञवल्क्यादि प्रणीता, निरुक्तं यास्कादि प्रणीतं, छन्दः पिङ्गलादिभिः प्रणीतं। कल्पः आश्वलायनादिनिर्मितः, व्याकरणं पाणिन्यादि प्रणीतम्। ज्यौतिषं सूर्यादि प्रोक्तं, इमानि षड्वेदाङ्गानि। एतत्सर्वमपराविद्यारूपेण परिगण्यते नामरूपप्रकाशकत्वात्। इयं विद्याऽपि अविद्या विषयत्वेन ब्रह्मविद्भिरविद्यैव मन्यते। अथापराकथनानन्तरं परा उत्कृष्टा, नित्यफलत्वात्। यया विद्यया अक्षरमविनाशि ब्रह्मतत्त्वमधिगम्यते लभ्यते। यद्यपि विभुत्वात् सर्वत्र ब्रह्मतत्त्वं प्राप्तमेव तथापि विद्यया अविद्यानिवृत्तिमात्रमेवेष्टं भवति। ननु ब्रह्मविद्याया वेदेभ्योभिन्न ग्रहणेनाप्रामाण्यंस्यादितिचेन्न—वेद्यभेदात् विद्याभेदो विवक्षितः। वस्तुतस्तु विद्यातत्त्वमेकमेव। कार्यं यदा प्रकाशयति तदा अपरा। यदा कारणं बोधयति तदा विद्या इति विवेकः ॥५॥

परा विद्यायास्तत्त्वं कथयति :—

यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम्।
नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः॥

अद्रेश्यं ज्ञानेन्द्रियागम्यं बहिःप्रवृत्तत्वात्तेषाम्। अग्राह्यम्—कर्मेन्द्रियाविषयत्वेनाग्राह्यं निरवयवत्त्वात्। अगोत्रं गोत्रसम्बन्धरहितमवर्णं ब्राह्मणादिसंज्ञाशून्यं शुक्लादिरूपरहितं वा। अचक्षुःश्रोत्रं नेत्रकर्णादिरहितमेतेन ज्ञानकर्मेन्द्रियाणां सर्वेषां ग्रहणमुपलक्षणेन। अपाणिपादं कर्मेन्द्रियवर्जितमित्यादिना चेत्यर्थः। नित्यमुपजनापायरहितं विभुं व्यापकं, विविधप्रकारेण भवति वा सर्वगतं पूर्णं, सुसूक्ष्मं निरवयवं, अव्ययं विकाररहितं स्वरूपच्युतिवर्जितमित्यर्थः।

यद् भूतयोनिं जगदुत्पत्तिकारणं, क्षणिकविज्ञानवादः, शून्यवादश्चैतेन तिरस्कृतः। तद्धीराः ब्रह्मविदः स्थिरमतय एव पश्यन्ति न भौतिकमतय इत्यर्थः। ननु नित्याव्ययादिविशेषणैर्ब्रह्मतत्त्वस्य निर्विकारत्वं, तथा विभुभूतयोनिपदाभ्यां कारणत्वंप्रतिपादनेन विरोधः। नहि कारणं भवत् किंचिद् वस्तु निर्विकारित्वं गच्छति इति चेन्न—शक्तिरूपेण कारणं, स्वरूपेण अकारणमिति व्यवस्थोपपत्तेः। शक्तिरूपेणोपादानं, शक्तिमद्रूपेण कर्तेति विभागात् उभयोः पारमार्थिकाभेदाच्चाद्वैतम् ॥६॥

ननु लोके समवाय्यसमवायिनिमित्तभेदात् कारणत्रैविध्यं प्रसिद्धम्। तच्चाद्वैते भवितुं नार्हति। मूलकारणस्यैकत्वादित्याशंकां परिहरन् आह—यथेति :—

यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति ।
यथा सतः पुरुषात् केशलोमानि तथाक्षरात् सम्भवतीह विश्वम् ॥७॥

यथोर्णनाभिः लूताकीटः सृजते अन्यमनपेक्ष्यैव स्वशरीरात् तन्तून् प्रसारयति। पुनः प्रसारितान् स्वस्मिन्नेव गृह्णते विलापयति। तद्वज्जगत्कारणमवगन्तव्यम्। यद्यपि लोके उपादानकारणं निमित्तात्-पृथगेव भवति यथा घटकरणे मृत्कुलालयोः पार्थक्यमस्ति। तथापि श्रुतिप्रोक्तदृष्टान्तेन तस्य बाधः। अल्पमतीनां बोधार्थमेव तार्किकैः, कल्पितं पारमार्थिके श्रुतिविषयेऽङ्गीकर्तुमयोग्यम्। यतो भेदस्य परिच्छिन्नत्वात्। परिच्छिन्ने सति अनित्यत्वम्। तथा स्वीकृते वेदान्तसिद्धान्तक्षतिः। तस्मादभिन्ननिमित्तोपादानरूपत्वेनैव मन्तुं समीचीनम्। अपरेण दृष्टान्तेनाह—यथा पृथिव्यामोषधयः सम्भवन्ति पुनः तस्मिन्नेव पृथिवीतत्त्वे लीयन्ते। यथा सतः पुरुषात् केशलोमानि जायन्ते। तथा तद्वद् अक्षराद् ब्रह्मण इह सृष्टिकाले जायते लीयते च। ननु शक्तिवादे चैतन्यरूपा शक्तिः स्वीक्रियते। अत्र तु लूता-पृथिवीपुरुषशरीरदृष्टान्तैरुपादानकारणं जडस्वरूपमेवावगम्यते। तस्माद् विरुद्धमिति चेन्न—गुणानां सत्वरजस्तमसां तथात्वत् (जडत्वात्)। तेषां विलयेऽद्वैतावस्थायां सत्यां जडत्वस्यापायात्। माया-वैचित्र्येण जडत्वप्रतीतिः सा च भ्रमरूपा। एष नियमोऽपि नास्त्येव

यच्चेतनाच्चेतनोत्पत्तिर्जडाज्जडोत्पत्तिरिति । यथा चणकवीजेभ्योऽङ्कुराणां चैतन्यानामुत्पत्तिः, एवमेव चैतन्यादपि जडस्योत्पत्तिः सम्भाव्यते 'सम्भवति' इति क्रियापदेन इदमेव स्फुटीकृतम् । अथवा शक्तिपदार्थो द्विविधः जडश्चेतनश्च, जडानां कारणं जडः, चेतनानां चेतनः, खद्योतवदुभयमेकस्मिन् सम्भवात् । चेतनः ज्ञानात्मको, जडः क्रियात्मक इति विवेकः । उभाभ्यां मिलिताभ्यां सृष्टिकार्यमिति ॥७॥

सृष्टिक्रममाह :—

तपसा चीयते ब्रह्म ततोऽन्नमभिजायते ।
अन्नात्प्राणः मनः सत्यं लोकाः कर्मसुचामृतम् ॥८॥

तपसा ज्ञानात्मकेन स्रष्टव्यालोचनेन ब्रह्म चीयते । विन्द्वात्मकशिवशक्तिमयकारणस्य सौक्ष्म्यात् स्थौल्यं रूपं कृत्वा उच्छूनतां गच्छति। इच्छाशक्तितो ज्ञानं ततः पश्चात् अन्नं भोग्यं जायते उत्पद्यते । ज्ञानशक्तेर्भोक्तृत्वात् । भोग्यं विना तदनुपपत्तेः । तस्मात् प्राणः चेष्टादिक्रियाशक्तिः, तस्माच्च मनः संकल्पविकल्पात्मकं तत्त्वं "प्राणबन्धनं हि सौम्य मनः" इतिश्रुतेः । तस्मात्सत्यं स्थूलपञ्चभूतात्मकेन रूपेण प्रतीयमानं जगत् । एवं सर्वे लोकाः भूरादयः । तेषु च कर्माणि कर्मानुबन्धीनि मनुष्यलोके, इति स्मृतेः । कर्मसु च फलममृतमिति समष्टिव्यष्टिभेदभिन्नाः सर्वे स्रष्टव्यपदार्थाः स्वकीयपरया शक्त्या ब्रह्मणा व्यक्तीकृता इत्यभिप्रायः ॥८॥

पूर्वोक्तमुपसंहरन्नाह—य इति—

यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः ।
तस्मादेतद् ब्रह्म नामरूपमन्नं च जायते ॥९॥

यः अक्षराख्यः शिवशक्तिसामरस्यमयः परमात्मा सर्वज्ञः सर्वज्ञानवान् सर्वं विन्दति, ज्ञानशक्त्या व्यापकत्वात् यस्य ज्ञानमेव तपः तत्प्रधानत्वात् । नतु क्रियारूपं स्वतःसिद्धसर्वसामर्थ्यात् । तस्मादेतद् ब्रह्मविद्यासाधनभूतं विद्यात्मकं ज्ञानं, विद्याद्वैविध्यमिति यावत् । नाम नामात्मकं शब्दतत्त्वं, रूपं समस्तपदार्थजातमाकृतिविशिष्टम्, अन्नं भोग्यसाधनम्, उक्तमन्त्रानुसारं भवतीति समुदितार्थः ॥९॥

इति प्रथममुण्डके प्रथमः खण्डः समाप्तः ।

प्रथमखण्डे सामान्यतः ब्रह्मविद्यायास्तत्त्वं प्रदर्शितम्। जगतः कारणत्वे शक्तितत्त्वस्यकारणत्वं च प्रदर्शितम्। तच्चाथर्वसंहितायामित्थं प्रोक्तम्—"स देवानामीशां पर्यैत स ईशानोऽभवत्।" (अ० सं० १-५) इति पराशक्तियोगेनैव ईशित्वं प्रतिपादितम्। अन्यच्च-"सोवर्धत स महानभवत् स महादेवोऽभवत्" (अ० सं० १-४)। एतत्सर्वं पञ्चदशे काण्डे विस्तरेण प्रदर्शितम्। तेनोक्तं समन्वितं भवति। इदानीम्, अपराविद्यालभ्यं फलं प्रस्तूयते। तच्च द्विविधं, भोग्यकामनयाऽनुष्ठितं स्वर्गप्राप्तिफलकं यातायातपरं प्रथमं, निष्कामतया अन्तःकरणशुद्धयर्थं कृतं क्रमेण मुक्तिप्रापकं विद्यासाधनत्वेनेष्टं द्वितीयम्। सकामं कर्म अनुपयुक्तं विद्याप्राप्तौ। अतस्तन्निन्दति वैराग्योत्पादनार्थम्। यतो विद्यान्तरङ्गसाधनं वैराग्यम्। अत आह-तदेतदिति :—

तदेतत्सत्यं मन्त्रेषु कर्माणि कवयो यान्यपश्यँस्तानि त्रेतायां बहुधा संततानि तान्याचरथ नियतं सत्यकामा एष वः पन्थाः सुकृतस्य लोके ॥१॥

तदेतत्सत्यं कर्मफलं कवयो विद्वांस ऋषयः कर्माणि वेदविहितानि मन्त्रेषु अपश्यन् अद्राक्षुः। तानि कर्माणि कर्तव्यत्वेन विहितानि त्रेतायां त्रयीविद्यायां बहुधा सन्ततानि अनेकप्रकारैर्विस्तृतानि, हे सत्यकामा! सत्यं कर्मफलमवश्यं भवतीति सत्यं कामयते कर्मिणः नियतं शास्त्रानुसारं आचरथ कुरुत। सुकृतस्य सुष्ठुकृतस्य लोके वः युष्माकं एष पन्थाः कर्ममार्गः फलप्राप्तिसाधनमित्यर्थः ॥१॥

कर्मणां प्रथममग्निहोत्रमाह :—

यदा लेलायते ह्यर्चिः समिद्धे हव्यवाहने।
तदाज्यभागावन्तरेणाहुतीः प्रतिपादयेच्छ्रद्धयाहुतम् ॥२॥

यदा यस्मिन् काले हव्यवाहनेऽग्नौ समिद्धे सम्यक् प्रज्वलिते सति अर्चिः ज्वाला लेलायते चलति। तदा तस्मिन् काले आहवनीयस्य दक्षिणोत्तरपार्श्वयोरन्तरेण मध्ये आहुतीः प्रतिपादयेत्। आहवनीयस्योभयपार्श्वौ आज्यभागौ प्रसिद्धौ अग्नये स्वाहा, सोमाय स्वाहा, इति घृताहुतिप्रदानात् मध्यस्थानस्यावपनस्थानमिति प्रसिद्धिः। यद्यपि

अग्निहोत्रे नास्ति आज्यभागयोः क्रमः तथापि दर्शपौर्णमासकर्मणि सत्वात् तदभिप्रायेण कथनम्। अथवाऽऽज्यभागावन्तरेण विनेति संगतार्थः। सूर्यप्रजापत्योः प्रातः, अग्निप्रजापत्योः सायमनेकदिवससाध्यत्वाद् आहुतीरिति बहुवचनम् ॥२॥

कर्मणि विधिकर्तव्यतायां मुख्यत्वं तस्मात्तदनुकूलमेवाचरणीयं विधिवैगुण्ये सति प्रत्यवायादि दोषोद्भवात् अतस्तमाह—यस्येति :—

यस्याग्निहोत्रमदर्शमपौर्णमासमचातुर्मास्यमनाग्रयणमतिथिवर्जितं च।
अहुतमवैश्वदेवमविधिनाहुतमश्रद्धयाहुतमासप्तमांस्तस्यलोकान् हिनस्ति।

यस्य कर्मिणोऽग्निहोत्रमदर्शं दर्शाख्यकर्मरहितं यतस्तस्य नित्यत्वात्। तथा अपौर्णमासं पौर्णमासकर्मरहितमेतस्यापि तथात्वात्। अचातुर्मास्यं चातुर्मास्यानुष्ठानरहितं नित्यत्वात्तस्य। अनाग्रयणमृतुयज्ञरहितमतिथिवर्जितमतिथिपूजारहितमवैश्वदेवं, वैश्वदेवाख्यकर्मवर्जितमहुतमविधिना हुतं तस्य कर्मिणः आसप्तमान् भूरादिप्रसिद्धान् लोकान् हिनस्ति लोकप्राप्तेः प्रतिबन्धकं भवति। केवलं तदनुष्ठाने श्रममात्रमेव जायत इत्यर्थः। पितृपितामहप्रपितामहाः पुत्रपौत्रप्रपौत्राः स्वात्मोपकाराः सप्तलोका इति शंकराचार्याः। पञ्चमहायज्ञकर्म अवश्यमनुष्ठातव्यमित्यर्थः ॥३॥

सप्तलोकप्राप्तिसाधनाः सप्तजिह्वा इति ता दर्शयति—कालीति :—

काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा।
विस्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्तजिह्वाः॥४॥

काली कृष्णवर्णा, कराली भयोत्पादिका, मनोजवा वेगवती, सुलोहिता शोभनरक्तवर्णा, सुधूम्रवर्णा विस्फुलिङ्गिनी इति स्पष्टम् देवी द्योतनस्वभावा विश्वरुची सर्वत्रकान्तिमती लेलायमानाः चलनात्मिका अग्नेः सप्तजिह्वा भवन्ति। आगमेषु पद्मरागा, सुवर्णा भद्रलोहिता, श्यामा, श्वेता, धूमिनी, कराली, इति नामान्तराणि नामानुकूलं योजयितव्यम्। एतासु कार्यमुद्दिश्य आहुतिप्रक्षेपादिनिर्णयः कार्यः। अन्यथा वैगुण्यत्वात् फलोत्पत्तिरसम्भाव्येत्यर्थः ॥४॥

मन्त्रद्वयेनाग्निहोत्रफलं प्रदर्श्यते :—

एतेषु यश्चरते भ्राजमानेषु यथाकालं चाहुतयोह्याददायन् ।
तन्नयन्त्येताः सूर्यस्यरश्मयो यत्र देवानां पतिरेकोऽधिवासः ॥५॥

एतेषु सप्तजिह्वाभेदेषु भ्राजमानेषु दीप्यमानेषु यः अग्निहोत्री यथाकालं कालमनतिक्रम्य निर्दिष्टसमयानुसारि कर्म चरते करोति। एता अग्निजिह्वासु क्षिप्ता आहुतयः तं कर्मिणं हि निश्चयेन आददायन् आददानाः सूर्यस्य रश्मयः सूर्यरश्मिभिः तादात्म्यीकृत्य नयन्ति प्रापयन्ति। यत्र देवानां पतिः एकोऽधिवासः अधिवसति "फलमत उपपत्तेः" इति न्यायेन देवराजरूपेण ब्रह्मैव कर्मिभ्यः फलानि ददातीत्यभिप्रायः ॥५॥

नयनप्रकारमाह—एह्येहीति :—

एह्येहीति तमाहुतयः सुवर्चसः सूर्यस्यरश्मिभिर्यजमानं वहन्ति ।
प्रियां वाचमभिवदन्त्योऽर्चयन्त्य एष वः पुण्यः सुकृतो ब्रह्मलोकः॥६

आहुतयः या यजमानेन सम्यगनुष्ठितास्तं यजमानं सूर्यस्यरश्मिभिः किरणैः सुवर्चसः सत्य एहि एहि आगच्छ आगच्छेति प्रियां वाचं वाणीमभिवदन्त्य उच्चारयन्त्यः पूजयन्त्यश्च नयन्ति। ता दर्शयति वः युष्माकं पुरो वर्तमानः पुण्यः पावनः एष सुकृतस्य कर्मणः फलरूपो ब्रह्मलोकः वेदबोध्यव्रतादिकर्मानुष्ठानफलकः स्वर्गलोकोऽस्तीति शेषः ॥६॥

कर्मफलं जन्यत्वेन विनाशि अतः कारणात्तत्फलं कर्मिणश्च वैराग्यार्थं निन्दति प्लवेति :—

प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म ।
एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापियन्ति ॥७॥

एते यज्ञरूपाः कर्मिणः यथा क्षुद्रनदीतरणार्थं तृणकाष्ठादिभिर्निमिताः प्लवाख्यास्तरणसाधनविशेषाः समुद्रतरणायानुपयुक्तास्तथेमेऽपि भवं समुद्रं तर्तुं सर्वथा असमर्था एव। हि यस्माददृढास्वल्पेनाऽपि विघ्नेन प्रतिहताः सन्तः स्वर्गमपि प्रापयितुमसमर्थाः। अष्टादशोक्तं षोडशयाज्ञिकैः सार्धं पत्नीसहितेन यजमानेनानुष्ठितं येषु यदुक्तं कर्म तदवरं निकृष्टं कर्मस्वरूपविज्ञानरहितत्वेन यातायातफलकमुपासना-

रहितत्वेन वा केवलं कर्म ये श्रेयः साधनं मन्वाना अभिनन्दन्ति ते मूढा अज्ञा एतत् प्रसिद्धं जरामृत्युं संसारं पुनरेवापि निश्चयेन पुनः पुनः यन्ति प्राप्नुवन्ति। तदुक्तं च "क्षीणे पुण्ये मर्त्यलोकं विशन्ति" "गतागतं कामकामा लभन्ते" इत्यादि ।।७।।

केवलं कर्मिणं निन्दति अविद्यायामिति :—

अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितं मन्यमानाः ।
जङ्घन्यमानाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः ।।८।।

अविद्यायामज्ञाने अन्तरे मध्ये वर्तमाना अहंममाभिमानवन्तः अतएव मूढाः सन्तोऽपि, धीराः बुद्धिमन्तो वयं स्वयमात्मानं पण्डितं ज्ञाततत्त्वं मन्यमानाः पण्डितमानिनः जङ्घन्यमाना नानाक्लेशैस्ताड्यमानाः परियन्ति इतस्ततः परिभ्रमन्ति। यथा अन्धेन नीयमाना प्राप्यमाणा अज्ञानगर्तपतनादिक्लेशजन्यदुःखमनुभवन्ति, तथैव केवलकर्मिणोऽपि दुःखमेव गच्छन्ति। अविद्याश्रितानुष्ठितानि कर्माणि तन्निवर्तयितुं न समर्थानि भवन्ति। कर्तृत्वभोक्तृत्वाभिमानानिवृत्तेः ।।८।।

अन्यच्च कर्मिणां पतनकारणं दिदर्शयिषुराह--अविद्यायामिति :—

अविद्यायां बहुधा वर्तमाना वयं कृतार्था इत्यभिमन्यन्ति बालाः ।
यत्कर्मिणो न प्रवेदयन्ति रागात् तेनातुराःक्षीणलोकाश्च्यवन्ते।।९।।

अविद्यायां बहुधा वर्तमाना अज्ञानकार्यनानाविधाभिलापमेवश्रेयस्त्वेन मत्वा अनेकविधकर्मानुष्ठानेषु संसक्तचित्ता बालाः परतत्त्वज्ञानरहिताः पुनः वयं कृतार्थाः कृतकृत्या इत्यभिमन्यन्ति अभिमानं कुर्वन्ति, यद् यस्माद्धेतोः कर्मिणः रागात् फलप्राप्तिकामनया रञ्जितत्त्वात् न प्रवेदयन्ति। आत्मतत्त्वं न जानन्ति। तेन हेतुना आतुरा विक्षिप्ताः सन्तः क्षीणलोकाश्च्यवन्ते स्वर्गादधःपातमनुभवन्ति। महच्छोकस्थानमेतत् इति भावः ।।९।।

अन्यच्च :—

इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः ।
नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वेमं लोकं हीनतरं वाविशन्ति ।।१०।।

इष्टापूर्तमिष्टं वैदिकं कर्म, पूर्तं वापीकूपतडागादिनिर्माणरूपं स्मार्तं कर्म, वरिष्ठं श्रेष्ठं मन्यमाना विजानन्तः प्रमूढा अज्ञा कर्मिण अन्यत् श्रेयः कल्याणसाधनं न वेदयन्ते जानन्ति। ते नाकस्यपृष्ठे स्वर्गस्योपरिभागे सुकृते पुण्यकर्मफलभूते अनुभूत्वा कर्मफलमनुभूय, ल्यबभावश्छान्दसः, इमं लोकं मानवमावर्तं हीनतरं तिर्यगादिनिकृष्टं वाविशन्ति प्राप्नुवन्ति। "रमणीयचरणा रमणीयां योनिमापद्येरन्, कपूयचरणाः "कपूयां योनिमापद्येरन्"—इति श्रुतेः, (छा० ५-१०-७-१०)। पुनर्जन्म—ऋक् च "पुनर्नः पितरो मनो ददातु दैव्यो जनः। जीवं व्रातं सचेमहि" (ऋ०सं०१०-५७-५; यजु: ३-५५)।१०।।

ज्ञानरहितानां केवलकर्मिणां फलमभिधाय सगुणोपासनासहितानां कर्मिणां फलं ब्रह्मलोकप्राप्त्यात्मकमाह तप इति :—

तपः श्रद्धे ये ह्युपवसन्ति अरण्ये शान्ता विद्वांसो भैक्षचर्यां चरन्तः।
सूर्यद्वारेण ते विरजा प्रयान्ति यत्रामृतः स पुरुषोह्यव्ययात्मा।।११।।

ये पुरुषा अरण्ये एकान्तस्थाने वसन्तो वानप्रस्थाः तपः श्रद्धे तपः स्वाश्रमीयं कर्म तत् त्रिविधम्, शारीरं, वाचिकं, मानसं च, श्रद्धां सगुण-ब्रह्मोपासनां कार्ये कारणोपचारात् श्रद्धानिमित्तत्वात् उपवसन्ति कुर्वन्तिशान्ताः शमपरा विद्वांसः ब्रह्मविद्याभ्यासे पराः भैक्षचर्यां भिक्षा-वृत्तिं चरन्तः कुर्वन्तः सन्तः,ननु वानप्रस्थस्य कथं भैक्षचर्या चतुर्थाश्रमिण-एवेतिचेन्न—तस्यापि स्मृतेः "तापसेष्वेव विप्रेषु यात्रिकं भैक्षमाहरेत्" (मनु: ६-७)। ते विरजा विधूतदोषाः सन्तः सूर्यद्वारेण देवयानेन पथा प्रयान्ति ब्रह्मलोकं, यत्रामृतः हिरण्यगर्भो यावत्संपातं स्थायी अव्ययात्मा स पुरुषो विद्यते। उक्तं च—"तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते" (छ० ५-१०-१)। उपासते इति पदेनोपासकानामेव ग्रहणम् ।।११।।

धूमयान (पितृयाण) देवयानाख्ये अपराविद्यासम्बन्धवत्यौ गती निरूपिते संक्षेपेण। सम्प्रति तयोर्वैराग्यशीलस्य पराविद्याप्राप्तिहेतुक-मधिकारमाह—परीक्ष्येति :—

परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन।
तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्।।१२।

कर्मचितान् उभयमार्गप्राप्यभोगान् लोकान् स्वर्गमारभ्य ब्रह्मलोकपर्यन्तान् परीक्ष्य जनिमत्त्वेन विनाशित्वमिति निश्चित्य ब्राह्मणो ब्रह्मज्ञानी पुरुषोऽधिकारवान् निर्वेदं वैराग्यमायात् गच्छेत्। यतः कृतेन कर्मणा अकृतो मोक्षो नास्ति। किन्तु ज्ञानादेव मोक्षो भवति। अतःकर्मफलेषु वैतृष्ण्यं कुर्यादित्यर्थः, तत् तस्मात्कारणात् विज्ञानार्थं ब्रह्म। साक्षात्सिद्धये मुमुक्षुः समित्पाणिः उपहारपाणिः सन् श्रोत्रियं ब्रह्मनिष्ठमधीतवेदवेदाङ्गं कृतब्रह्मसाक्षात्कारं गुरुमभिगच्छेत्। वेदवेदाङ्गविद् ब्रह्मनिष्ठश्च गुरुर्भवितुं शक्नोति। स एव शिष्यस्य संशय विपर्ययौ दूरीकर्तुं समर्थ इति श्रुतितात्पर्यम् ॥१२॥

अधिकारिणेऽवश्यमेव विद्योपदेशः कार्यो गुरुणेति आह—तस्मै इति :—

तस्मै स विद्वानुपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय।
येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ॥१३॥

स विद्वान् ब्रह्मविद् आचार्यः तस्मै उक्तलक्षणलक्षिताय सम्यगुपसन्नाय विधिपूर्वकाचार्यसेवकाय प्रशान्तचित्ताय निवृत्ताभिमानादिदोषाय विषयोपरताय तत्त्वतो यथार्थतस्तां प्रसिद्धां ब्रह्मविद्यां सर्वविद्यासु श्रेष्ठां "अध्यात्मविद्या विद्यानां वादः प्रवदतामहम्" इति गीतोक्तेः, प्रोवाच उपदिशेत्। येन ब्रह्मविज्ञानेनाक्षरमविनाशि ब्रह्मतत्त्वं पुरुषं सर्वत्र पूर्णं सत्यं त्रैकालाबाध्यं वेद अधिकारी शिष्योऽवबुध्येत। येनाधिकार विशिष्टेन युक्तः शिष्यो भवेत्। तदनुकूलमेवोपदेष्टव्यम् "तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया। उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः" इति क्रमेण शिष्यधर्मोपदेशः ॥१३॥

इति प्रथमे मुण्डके द्वितीयः खण्डः समाप्तः।

अथ द्वितीयमुण्डके प्रथम खण्डः

एक विज्ञानेन सर्वविज्ञानं प्रतिज्ञातं तच्चाद्वैतवादमाश्रित्य यैभवति। वस्तु स्वाभाविकभेदभिन्नं चेत्तदा एकस्मिन् विज्ञाते नहि भवति सर्वविज्ञानम्। यथा मृज् ज्ञाने भवति एव घटशरावोदञ्चनादीनां परिज्ञानं, यतो मृत्स्वरूपतोऽव्यतिरिक्तमेव तत्कार्यम्। एवमेवाद्वैत-

विज्ञानम् । यदि पारमार्थिकं द्वैतं भवेत्तर्हि एकविज्ञानेन सर्वविज्ञान-प्रतिज्ञा निष्फला स्यात् । एतेन द्वैतं व्यावहारिकमेव मन्तव्यम् । विशिष्टाद्वैतमतेन जीवप्रकृतिविशिष्टं स्वाभाविकभेदभिन्नमभिन्नं च प्रतिपाद्यते । तच्च विरुद्धमेव । यतः कल्पितेन भेदेनाऽपि वैशिष्टय-सम्भवात् काषायं वस्त्रमितिवत् स्वाभाविकभेदस्वीकारस्य श्रुति-विरोधात् । न्यायतश्चासमञ्जसम् । तथाहि—"प्रकृतिश्च प्रतिज्ञा दृष्टान्तानुरोधात्, प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः", "उत्क्रमिष्यत एवं भावादित्यौडुलोमिः, अवस्थितेरितिकाशकृत्स्नः", इत्यादि-सूत्रजातैः प्रदर्शितम् । केचिद् वेदान्तिनः कार्यकारणयोरभेदं मत्वा-कार्यस्यापि सत्यत्वं, केचिदापेक्षिकसत्यत्वं यावत्सृष्टिभावि, तथा केचिदजातिमेव मन्यन्ते । एतेषां सर्वेषां व्यवस्थापनमित्थं भवति द्वैतमवलम्व्य सृष्टिश्रुतयः सम्पन्ना भवन्ति । कारणरूपेण कार्यस्य सत्यत्वमविरुद्धम् । आक्षेपिकं च तादृशमेव । अजातमतं केवलं ब्रह्म स्वरूपनिरूपणपरत्वेन ग्राह्यं भवति तस्मिन् सृष्टिविषयाभावात् अजाति-मिति वदन्ति निर्गुणपरत्वात् । यौक्तिकं हि तत् स्वरूपभूतगुणान् विवेक्तुमसम्भवात् । गुणानां स्वरूपत्वे कथनमात्रभेदः, भेदस्य मायिक-त्वात् । विद्यानिर्मितभेदस्तु सूक्ष्मो बहुकालस्थायीति विवेकः सत्यपि भेदे अद्वैतस्य भानात् । अविद्यानिवर्तन एव वेदान्ततात्पर्यम् । तथापि विद्यात्मकद्वैतमपि कदाचिद् ब्रह्मरूपतां गच्छति व्यक्तेर्विलयनस्वरूप-त्वात् । जलतरङ्गवत् । इत्यर्थजातं प्रपञ्चयिष्यते तृतीयमुण्डके द्वा सुपर्णेति व्याख्यानावसरे ।

सम्प्रति सृष्टिमुद्दिश्य कथयति तदेतदिति :—

तदेतत्सत्यं यथा सुदीप्तात् पावकाद् विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाक्षराद् विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ति ।।१।।

हे सौम्यप्रिय ! तदेतत् सत्यं पारमार्थिकत्वेन बाधरहितं नतु अपराविषयत्वावच्छिन्नवदापेक्षिकं सत्यमितिभावः । तद् दृष्टान्तेन कथयति यथा—सुदीप्तात् प्रज्वलितात् पावकाद् अग्नेः सकाशात् सहस्रशः अनेके विस्फुलिङ्गा अग्निकणाः सरूपाः समानाकृतयः चित्स्वरूपा अणु

रूपबुद्धिसम्बन्धेन अणुरूपाः प्रभवन्ते निःसरन्ति। तथा अक्षराद् परमविन्दुरूपात्मकात् शिवशक्तिवैशिष्टचात् कारणात् विविधा अनेके- भावाः चिदचिद्रूपाः प्रजायन्ते आविर्भवन्ति। पुनश्च तत्रैव तस्मिन्नेव अपियन्ति लयं गच्छन्ति। वस्तुतो ब्रह्मणः आत्मभूतायाः पराशक्तेः सकाशात् परमात्मानं निमित्तीकृत्य उभयेषामुत्पत्तिः। उत्पत्तिलय- पदबोध्याविर्भावतिरोभावाख्यव्यापाराश्रया पराशक्तिरिति बोधार्थः। उक्तं च—"ईशावशस्य या जाया सास्मिन् वर्णमाभरत्" (अथर्व० ११- ८-१७) ॥१॥

परतत्त्वस्वरूपमाह—

दिव्योह्यमूर्तः पुरुषः स वाह्याभ्यन्तरो ह्यजः।
अप्राणो ह्यमनाःशुभ्रो ह्यक्षरात् परतः परः ॥२॥

दिव्यः प्रकाशात्मा हि निश्चयेन अमूर्तं आकृत्यादि मूर्तिरहितः पुरिशयनात् पुरुषः सवाह्याभ्यन्तरः पूर्णत्वात् तत्परिच्छेदरहित इत्यर्थः। हि निश्चयेन अजः जन्मादिरहितः अप्राणः क्रियाशून्यः व्यापकत्वात् अमना मनुत इति मनः ज्ञानशक्तिः तद् रहितः। ननु अज्ञत्वाद् ब्रह्मणो जडत्वमितिचेन्न शक्तिमद् रूपेण प्रकाशकत्वात् अतएवाह शुभ्रः इच्छा- शक्तिरहित इत्यर्थः। "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" तथा "न प्रज्ञं नाप्रज्ञं" मा० एवं भूतं तत्त्वं हि ब्रह्मपुरुषः अक्षरात् शब्द- ब्रह्मतत्त्वात् परो विन्दुः, शिवशक्तिसामरस्यात्मकः तस्मादपि परोऽ वाङमनसयोरगोचरोऽद्वैतरूपः परमात्मा निर्गुणपदवाच्य इत्यर्थः। एतद्बोधनेनैव सर्वं ज्ञायते एतस्यैव सर्वरूपमिदं दृश्यमानं जगत्। यद्यपि शक्तिशक्तिमतोरतिरिक्तो नास्ति सामरस्यभावस्तथापि शक्ति- भावनिरपेक्षविचारो ब्रह्मभावस्य केवलबुद्ध्या एव कृत्वा समर्थितः। स एव निर्गुणपदवाच्यत्वेन गृह्यते। योगे उन्मनीवृत्या तस्य गृहीतत्व मभ्युपगतम्। सामरस्यं तु समनीवृत्या सगुणत्वात्, शक्तितत्त्वादेव प्रेरणां प्राप्य माया आकाशादि क्रमेण तत्त्वजातानि निर्मीति। भेदप्रति- पादिकाया मायायाः शक्तितत्त्वादेव आविर्भावः। एतस्या एव मिथ्यात्वं वेदान्तेष्वधिगतम्। मन्त्रद्वयेनोक्तेन उभयं ब्रह्मस्वरूपं दर्शितम् ॥२॥

ब्रह्मणः स्वरूपं प्रदर्श्य प्रकृतं सृष्टिविषयमाह—एतस्मादिति :—

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्यधारिणी ।।३।।

एतस्मात् पूर्वमन्त्रोक्तात् सगुणेश्वरात् ईक्षणवशात् प्राणः क्रिया मनो ज्ञानं सर्वेन्द्रियाणि च पुनः खमाकाशवायुतेजोजलानि तथा विश्वस्य निखिलचराचरस्य धारिणी पृथिवी जायते । समस्तं कार्यं दृश्यमानं तस्मादेव जातमित्यर्थः ।।३।।

विराड्रूपेण सर्वमयश्च स एव प्रत्यक्षं भाति :—

अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग् विवृताश्च वेदाः ।
वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूता-न्तरात्मा ।।४।।

अस्य ब्रह्मणोऽग्निर्द्युलोकाख्यो मूर्धा शिरः स्थानीयः चन्द्रसूर्यौ सूर्याचन्द्रमसौ चक्षुषी नेत्रे दिशः प्राच्याद्याः श्रोत्रे कर्णे विवृताः सव्याख्यानाश्चत्वारो वेदा वाक् वाणी, वायुः प्राणाः प्राणापानादिरूपः इदं दृश्यमानं विश्वं सर्वं हृदयं हृदयस्थानीयं पृथिवी भूमिः पद्भ्यां पादौ, एष हि परमात्मा सर्वभूतान्तरात्मा सर्वव्यवहारसाक्षित्वेन सर्व-प्राणिनां मध्ये स्थितोऽस्ति । अनेकविधशक्तिमाहात्म्यं प्रदर्शयन् विराड्रूपेण परमात्मैव सर्वं नामरूपात्मकं निर्माय तत्तदाकृति विशिष्टः स्वयं चाविकृतोऽस्तीत्यभिप्रायः, "सर्वं खल्विदं ब्रह्मेति" श्रुतेः ।।४।।

पञ्चाग्निविद्यया सृष्टिप्रकारमाह—तस्मादितिः :—

तस्मादग्निः समिधः यस्य सूर्यः सोमात् पर्जन्यः ओषधयः पृथिव्याम् ।
पुमान् रेतः सिञ्चति योषितायां बह्वीः प्रजाः पुरुषात् सम्प्रसूताः ।।५।

तस्मात् सगुणेश्वरात् द्युलोकाख्योऽग्निः प्रसूतः । यस्य सूर्यः समिधः काष्ठस्थानीयः । तत्सम्पन्नात् सोमात् पर्जन्यः मेघः सञ्जातः द्वितीयोऽग्निः । पर्जन्यात् पृथिव्यां तृतीयाग्निरूपायामौषधयः ब्रीहि-यवादयः वृष्टिद्वारा जायन्ते । पुनश्च अग्निरूपेण चतुर्थाग्निरूपः पुरुषः रेतः शुक्रम् । पञ्चमाग्निरूपायां स्त्रियां सिञ्चति । एवं क्रमेण

बह्वीः प्रजाः अनेके प्राणिनः पुरुषात् सम्प्रसूताः आविर्भवन्तीत्यर्थः। छान्दोग्ये वृहदारण्यके च विस्तरेण प्रतिपादितमेतत् ।।५।।

अक्षरादेव कर्मसाधनानि फलानि च जातानि इति दर्शयितुमाह—तस्मादितिः—

तस्मादृचः सामयजूꣳषि दीक्षा यज्ञाश्च सर्वे क्रतवो दक्षिणाश्च ।
संवत्सरश्च यजमानश्च लोकाः सोमो यत्र पवते यत्र सूर्यः ।।६।।

तस्माद् ब्रह्मणः ऋचः नियताक्षरपादावेदभेदाः साम स्तोमादिगीतिविशिष्टं यजूंषि अनियताक्षरपादवन्ति वेदविशेषवचनानि "ऋचो यजूंषि सामानि तथैवाथर्वणानि च। ब्रह्मणः सहजं रूपं नित्यैषा शक्तिरव्यया", इति पुराणम्, दीक्षा मौञ्जीबन्धनादिरूपाः, सर्वे यज्ञा क्रतवश्च अग्निहोत्रादयोऽश्वमेधादयश्च श्रौतस्मार्तसंज्ञकाः, दक्षिणा हिरण्यादि, संवत्सरश्च कर्मसिद्धिकरः कालः, यजमानः कर्मकारी, लोकाः स्वर्गादयः, यत्र सोमः पवते यल्लोकस्थान् पवते पुनाति, सूर्यश्च प्रकाशयति। सूर्यचन्द्राधिष्ठिता हि लोका इति भावः ।।६।।

तथा च :—

तस्माच्च देवा बहुधा सम्प्रसूताः साध्या मनुष्याः पशवो वयाꣳसि ।
प्राणापानौ व्रीहियवौ तपश्च श्रद्धा सत्यं ब्रह्मचर्यं विधिश्च ।।७।।

तस्माद् ब्रह्मणो बहुधा बहुप्रकारका देवाः कर्माङ्गभूताः वस्वादयः, साध्या देवविशेषा, मनुष्याः कर्माधिकारिणः प्राणिनः, पशवश्चतुष्पाज्जातिमन्तो, वयांसि पक्षिणः, प्राणापानौ जीवनमरणे, व्रीहियवौ उभयर्तुभवे अन्ने भोग्यजातं हविश्च, तपश्च, हूयमानद्रव्यदोषोपशमनार्थं व्रतविशेषौ श्रद्धा धार्मिकबुद्धिः, सत्यं सत्यभाषणं, ब्रह्मचर्यमुपस्थेन्द्रियनियमनं, विधिः विधायकं वाक्यं, येन कर्मणि प्रवर्तते—"व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम्। दक्षिणयाप्नोति श्रद्धां श्रद्धया सत्यमाप्यते", (यजुः १९-३०) इति सर्वे सम्प्रसूताः ।।७।।

बाह्यहोमसामग्रीं निरूप्याध्यात्मिकीमाह—सप्तेति :—

सप्तप्राणाः प्रभवन्ति तस्मात् सप्तार्चिषः समिधः सप्तहोमाः ।
सप्त इमे लोका येषु चरन्ति प्राणा गुहाशया निहिताः सप्त सप्त ।।८।।

तस्मादक्षरात् सप्त उत्तमाङ्गप्रदेशीयाः प्राणा इन्द्रियाणि तेषां सप्तार्चिषो दीप्तयः स्वस्वविषयावभासनात्मिकाः सप्तसमिधः तेषां विषयाः सप्तहोमास्तेषां सप्तविज्ञानानि इमे भूताः सप्तलोकाः स्थानानि येषु प्राणाः सञ्चरन्ते। स्वापकाले गुहायां शेरते इति गुहाशयानिहिताः स्थापिताः परमात्मना सप्तसप्तेति प्रतिजीवम्। आधिदैविकाध्यात्मिकयाजिनां कर्माणि तत्फलानि च परब्रह्मण एव भवन्तीत्याशयः ॥८॥

तथा च :—

अतः समुद्रागिरयश्च सर्वेऽस्मात् स्यन्दन्ते सिन्धवः सर्वरूपाः।
अतश्च सर्वा ओषधयो रसश्च येनैष भूतैस्तिष्ठतेह्यन्तरात्मा ॥९॥

अतः अस्मात् पुरुषात् सर्वे समुद्रा गिरयो हिमालयादयः सम्प्रसूतास्तथा सर्वरूपाः सिन्धवः अनेकप्रकारिका नद्योऽस्मात्स्यन्दन्ते प्रवहन्ति। अस्मादेव पुरुषात् सर्वा ओषधयः व्रीहियवादयः रसश्च मधुराम्लादिः षड्रसः येन रसेन भूतैः पञ्चमहाभूतैर्मिलितैः हि अन्तरात्मा प्रभुस्तिष्ठति। भूतपदमुपलक्षणं सूक्ष्मस्य। स्वशक्तिमुपारूढः सन् परमात्मैवानेकविधभेदभिन्नं नामरूपं निर्माय कारणत्वमुपगतः। स एव सम्पूर्णकार्यं समुदायस्य आश्रयः। उक्तं च—"असति सत् प्रतिष्ठितं सति भूतं प्रतिष्ठितम्। भूतं ह भव्ये आहितं भव्यं भूते प्रतिष्ठितं तवेदविष्णो बहुधा वीर्याणि। त्वं नः पृणीहि पशुभिर्विश्वरूपैः सुधायां मा धेहि परमे व्योमन्' (अथर्व० १७-२-१९)। प्रधानतः शक्तेरेवकारणता शक्तिशक्तिमतोरभेदमास्थाय ब्रह्मणि निर्देशः ॥९॥

कार्यकारणयोरभेदं मत्वा भेदनिवृत्यर्थमभेदमाह—पुरुष इति :—

पुरुष एवेदं विश्वं कर्मतपोब्रह्मपरामृतम्।
एतद् यो वेद निहितं गुहायां सोऽविद्याग्रन्थि विकिरतीह सोम्य ॥१०॥

पुरुष एवेदं विश्वं सर्वं कर्म क्रियात्मकं तपो ज्ञानं, ब्रह्म शब्दब्रह्मपरामृतं मोक्षाख्यं यावत् किञ्चित्सर्वं तदभिन्नमेव। हे सोम्य प्रिय !

य एतत्तत्त्वज्ञानं गुहायां निहितमतीवसूक्ष्मं वेद जानाति, स इह शरीर एव अविद्याग्रन्थिं ग्रन्थिवद्दृढमविद्यासंस्कारं विकिरति नाशयतीत्यर्थः। मायया भेदप्रतीतिर्विद्यया अद्वैतरूपया सर्वेषु पदार्थेषु ब्रह्मबुद्धिः मायां विनाश्य जायते इति वेदपदेन प्रदर्शितम्। ज्ञानादेव मोक्षः इति सिद्धान्तः। "कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति"। इत्यस्य तत्त्वमनेन मन्त्रेण स्पष्टीकृतम् ॥१०॥

इति द्वितीयमुण्डके प्रथमः खण्डः समाप्तः

पूर्वस्मिन् खण्डे परमात्मनः सकाशात् सृष्टिरूपं कार्यं कथं भवति इति निरूपितम्। सम्प्रति पुनश्च ससाधनं ब्रह्मस्वरूपमुपदिश्यते—आविरिति :—

आविः सन्निहितं गुहाचरन्नाम महत्पदमत्रैतत् समर्पितम्। एजत् प्राणन्निमिषच्च यदेतज्जानथ सदसद्वरेण्यं परं विज्ञानाद् वरिष्ठं प्रजानाम् ॥१॥

आविः प्रकाशात्मकमपरोक्षं सन्निहितं सर्वविषयेष्वनुगतं "तमेव-भान्तमनुभातिसर्वम्" इति श्रुतेः। गुहाचरं सर्वबुद्धिवृत्तिसाक्षित्वेन नाम प्रसिद्धं, महत्पदं सर्वेषामाश्रयभूतम्, अत्र ब्रह्मणि एतत् सर्वं समर्पितम्, एजत् क्रियावत्, प्राणत् श्वासप्रश्वासवत् मनुष्यादिप्राणिजातं, निमिषत् निमेषादिक्रियावद् वस्तुजातं, मृत्पिण्डे शराबोदञ्चनादीनामिव यदेतद् ब्रह्मतत्त्वं प्रजानां विलक्षणाल्लौकिकानुभवात् परं विलक्षणं वरिष्ठं श्रेष्ठं सदसद्भ्यां स्थूलसूक्ष्माभ्यां वरेण्यं भजनीयमाश्रयत्वेन, तद् ब्रह्मतत्त्वं हे अधिकारिणः! जानथ अवगच्छत सर्वं ब्रह्मैवेति निश्चिनुतेत्यभिप्रायः ॥१॥

सच्चिदानन्द स्वरूपं सगुणं ब्रह्मस्वरूपमाह—यदिति :—

यदर्चिमदणुभ्योणु च यस्मिँल्लोका निहिता लोकिनश्च। तदेतदक्षरं ब्रह्म स प्राणस्तदुवाङ्मनः। तदेतत्सत्यं तदमृतं तद्वेद्धव्यं सोम्य विद्धि ॥२॥

यदर्चिमद् दीप्तिमद् अणुभ्योऽपि अणु अतीव सूक्ष्मं "अणोरणीयान् महतो महीयान्", इति श्रुतेः। यस्मिन् भूरादि लोका लोकिनः

तन्निवासिनश्च निहिताश्चक्रे अरा इव। तदेतदक्षरं ब्रह्म, सप्राणः सर्वक्रियाश्रयः, तदु हि वाक् शब्दशक्तिमान्, मनश्च ज्ञानोपाधिमान्, तदेतत् सत्यं त्रिकालाबाधितं, तदमृतमनश्वरं तद् हे सोम्य प्रिय! वेद्धव्यं मनसाभिलक्ष्य चिन्तयितव्यं, विद्धि जानीहि, अथवा तस्मिन् मनः समाधानं कुर्वित्यर्थः ॥२॥

द्वाभ्यां साधनमुपदिशति धनुरिति :—

धनुर्गृहीत्वौपनिषदं महास्त्रं शरं ह्युपासानिशितं सन्धयीत।
आयम्य तद् भागवतेन चेतसा लक्ष्यं तदेवाक्षरं सोम्य विद्धि ॥३॥

हे सोम्य प्रिय! औपनिषदं वेदान्तप्रतिपाद्यं रहस्यमयं महास्त्रं महदस्त्रस्थानीयं धनुः कार्मुकं गृहीत्वा आदाय उपासानिशितं सततचिन्तनेन तीक्ष्णीकृतं शरं वाणं संधयीत संदध्यात्। तद्भावगतेनचेतसा ब्रह्मभावनया विष्टेन मनसा आयम्य आकृष्य विषयेभ्यः सेन्द्रियमन्तःकरणं निवर्त्य लक्ष्यभूते ब्रह्मणि संयोज्येत्यर्थः। तदेव लक्ष्यं विद्धि मनसा गृहाण ॥३॥

तदेव स्पष्टयति प्रणवेति :—

प्रणवो धनुः शरोह्यात्मा ब्रह्मतल्लक्ष्यमुच्यते।
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥४॥

प्रणवो धनुः ओंकारः कार्मुकं शरो वाणो हि आत्मा चेतः ब्रह्माक्षरतत्त्वं लक्ष्यं वेद्धव्यमुच्यते कथ्यते। वाचकभूतेन मन्त्रेणाभ्यस्यमानेन साधकेन ब्रह्मतत्त्वं प्राप्यते। मन्त्राभ्यासेन ज्ञानदीप्तिरज्ञानतनूभावश्च सम्पद्यते। तथाचाहुः "तस्य वाचकः प्रणवः" तज्जपस्तदर्थभावनम्, ततः प्रत्यक्चेतनाधिगमोप्यन्तरायाभावश्च, तथा च-"अकारं ब्रह्मणोरूपं उकारं विष्णुरूपवत्। मकारं रुद्ररूपंस्यादर्धमात्रं परात्मकम्। वाच्यं तत्परमं ब्रह्म वाचकः प्रणवः स्मृतः।" गोपथब्राह्मणे च— ओंकारं पृच्छामः को धातुः किं प्रतिपादिकं किं नामाख्यातं किं लिङ्गं का विभक्तिः कः स्वर इत्यादिना तन्निर्णयः। अप्रमत्तेन समाहितेन मनसा वेद्धव्यं, यथा धानुष्को लक्ष्यं प्रमादरहितेन मनसैव भेत्तुं समर्थो भवति तथैव साधकेन भवितव्यमित्याशयः। शरवत्तन्मयो भवेत्

लक्ष्यं प्राप्य नान्यं चिन्तयेत् । प्रणवाभ्यासेनैवाक्षराधिगमः मन्त्रविहीनाभ्यासो निष्फलः केवलं श्रम एव तस्मादित्थमेवाचरणीयमितिभावः।।४।।

ब्रह्मणोऽतिसूक्ष्मत्वात् तदेव पुनः पुनरुपदिशति यस्मिन्निति :—

यस्मिन् द्यौः पृथिवीचान्तरिक्षमोतं मनः सहप्राणैश्च सर्वैः ।
तमेवैकं जानथ आत्मानमन्यावाचो विमुञ्चथ अमृतस्यैष सेतुः ।।५।।

यस्मिन् परस्मिन् ब्रह्मणि द्यौः पृथिवी अन्तरिक्षं च ओतं समर्पितं तथाध्यात्मिके कूटस्थे सह प्राणैः सर्वैः वागादीन्द्रियैः सह मनश्च संकल्पादिरूपमोतं प्रोतं सूत्रे मणिगणा इव तमेव एकं सजातीयादिभेदरहितमात्मानं पूर्णमद्वैतरूपं हे मुमुक्षवः ! जानथ, अन्या वाचोऽपरविद्या विषया विमुञ्चथ । अमृतस्य मोक्षस्य एष ब्रह्मसाक्षात्कारः सेतुः सेतुवत्संसारतरणस्य प्राप्त्युपायः "ज्ञात्वा देवं मुच्यते सर्वपाशैः" "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इति ज्ञानादेवाद्वैतसाक्षात्कारः, एतेन समसमुच्चयपक्षनिरासो ज्ञातव्यः । ननु सच्चिदानन्दस्यसगुणपरमात्मनोऽद्वैतरूपस्य च को भेदः? सच्चिदानन्दात्मकस्य शक्तितत्त्वस्य सगुणे व्यक्तिर्हिमोपलवत्, तस्यामवस्थायामेव उपासका दिव्यलीलाभावं मन्यन्ते । गुणगुणिविशिष्टा हि साऽवस्था, सगुणेन ईश्वरेण सार्धं भोगमात्रेणाद्वैतस्वीकारः । "भोगमात्रसाम्यंलिङ्गाच्चेति" न्यायात् । अयमद्वैतवादः गौणः आपेक्षिकः एतस्मात्परं साम्यबोधकमद्वैतं ब्रह्म । "निरञ्जनः परमं साम्यमुपैति" इति श्रुतेः । वस्तुत उभयोर्भेदो नास्ति तथापि पराशक्त्या व्यक्ताव्यक्तस्वरूपत्वात्तदन्तः पात्येव सगुणः । तथापि अमायिकत्वं तस्याभ्युपेतव्यम् सच्चिदानन्दरूपत्वात् । यथा हिमोपलः कदाचित् जलरूपेण विलीयते तत्र व्यक्तेरव्यक्तपूर्वकत्वमधिगतं तदेव प्रकृतश्रुतिरुपदिशति । अन्यावाचो विमुञ्चथेति । सगुणब्रह्मण्येव वेदान्तपर्यवसानं केचिन्मन्यन्ते । तच्च न्यूनमेव मध्यमाधिकारिणां कृते भेदेनायमुपदेशः, इति संक्षेपः ।।५।।

अद्वैतज्ञानस्यान्तरङ्गसाधनं ध्यानमाह—अरा इवेति :—

अरा इव रथनाभौ संहता यत्र नाड्यः स एषोऽन्तरश्चरते बहुधा जायमानः । ओमित्येवं ध्यायथ आत्मानं स्वस्ति वः पाराय तमसः परस्तात् ।।६।।

अरा इव यथा रथनाभौ समर्पिता अरास्तथा यत्र हृदये नाड्यः संहताः सन्ति तत्र स एव प्रकृत आत्मा अन्तर्मध्ये चरते मनोवृत्तिभिर्व्यवहरति, बहुधा अनेकाकारकः सन् अजायमानः जायमान इव वा "न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूय" इत्यनुरोधात् हे शिष्याः! ओमित्येवं पूर्वोक्तमन्त्रानुसारं ध्यायथ आत्मानं चिन्तयथ, वः युष्माकं युष्मभ्यं वा स्वस्ति कल्याणमस्तु। तमसः पाराय परस्तात् उत्तरणाय अविद्यानिवृत्तये भवत्वित्यर्थः। उक्तं च—"तत् स्वयं योगसंसिद्धः कालेनात्मनि विन्दति" शब्दविज्ञानमाश्रित्य प्राणापाननिरोधेन मनसा निरोधमापाद्याद्वैतबोधेन लक्ष्यस्य सुसम्पन्नत्वादितिपरमार्थः ।।६।।

आत्मनो याथात्म्यं पञ्चकोशविवेकेनाह—य इति :—

यः सर्वज्ञः सर्वविद् यस्यैषमहिमा भुवि दिव्ये ब्रह्मपुरे ह्येष व्योम्नि आत्मा प्रतिष्ठितः। मनोमयः प्राणशरीरनेता प्रतिष्ठितोऽन्ने हृदयं सन्निधाय। तद् विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपं अमृतं यद् विभाति ।।७।।

योऽक्षरः परमात्मा सर्वज्ञः सर्वज्ञानवान् सर्वविद् व्यापकः, यस्य महिमा एष प्रत्यक्षभूतः, भुवि पृथिव्यां दिव्ये ब्रह्मपुरे वर्तमानो हि निश्चयेन एष आत्मा व्योम्नि हृदयाकाशेऽन्तर्यामिरूपेण प्रतिष्ठितः। अन्ने प्रतिष्ठितः अन्नमयरूपेण मनोमयः प्राणशरीरनेता प्राणमयकोशेन हृदयं सन्निधाय चित्तवृत्ति सम्यङ्ग निरुध्य धीरा ब्रह्मविदः तद्ब्रह्मतत्त्वं विज्ञानमयकोशोत्थजीवब्रह्मैक्यबोधेन परं सर्वेभ्यः कोशेभ्यः परमानन्दरूपममृतं यद् विभाति तत् परिपश्यन्ति साक्षात्कुर्वन्तीत्यर्थः कोशानां पञ्चत्वेन स्वीकारात् ।।७।।

फलमभिधीयते भिद्यत—इति :—

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्तेचास्य कर्माणि तस्मिन् दृष्टे परावरे ।।८।।

तस्मिन् परस्मिन् अवरे सगुणे च परावरे उभयस्वरूपात्मके ब्रह्मणि साक्षात्कृते कर्माणि संचितक्रियमाणाख्यानि अस्य साक्षात्कर्तुः

क्षीयन्ते विलयं गच्छन्ति। हृदयग्रन्थिः तादात्म्याध्यासरूपो भिद्यते भेदमापद्यते। सर्वसंशया असम्भावनाविपरीतभावनाजन्या उभयकोट्यवगाहिज्ञानात्मकाः छिद्यन्ते द्वैधीभावमापद्यन्ते। उक्तं च— "ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन"। ननु ब्रह्मात्मैक्यबोधे सति सर्वकर्मणां क्षेयत्वात् कथं सञ्चितक्रियमाणयोरेवेति चेन्न— प्रारब्धं विना ज्ञानेन नाश्यत्वाभ्युपगमात्। प्रारब्धकर्मणां तु भोगादेव क्षयः ज्ञानेन सह तेषामविरोधः। प्रतिपादितं च आचार्यैः—"भोगेन त्वितरे क्षपयित्वा सम्पद्यते" (वे० ४-१-१९)। "तस्य तावदेवचिरं यावन्न विमोक्ष्येऽथसम्पत्स्ये" इति श्रुतेः। तस्मात् प्रारब्धव्यतिरिक्तं सर्वं कर्म ग्राह्यम् ॥८॥

ज्योतिःस्वरूपमाह—हिरण्मय इति :—

हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम्।
तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः ॥९॥

हिरण्मये प्रकाशमये परे सर्वाभ्यन्तरे आनन्दमये कोशे असेः कोशवदाच्छादके विरजं मायादिमलरहितं ब्रह्मतत्त्वं निष्कलं निरवयवं पूर्णं शुभ्रं निर्मलं ज्योतिषां सूर्यादीनामपि ज्योतिः प्रकाशकं तद्यद् प्रसिद्धम् आत्मविदो ब्रह्मविदः विदुः जानन्ति। केचिदानन्दमयमेव ब्रह्मतत्त्वं ब्रुवते "आनन्दमयोभ्यासात्" तथापि हिरण्मये इति सप्तमीनिर्देशात् तस्याब्रह्मत्वं स्फुटमेव। केवलमानन्द एव ब्रह्म तत्त्वं यथा "आनन्दरूपममृतं यद् विभाति" इत्यत्रोक्तम्। आनन्दमयस्य कोशत्वात् आत्मत्त्वं तस्य ब्रुवतोऽसांगत्यमेव अथवा पूर्वस्मिन् मन्त्रे-चत्वारः कोशाः पञ्चमं तु अस्मिन् मन्त्रे कृत्वा पञ्चत्वं पूरणीयमिति ॥९॥

उक्तं ज्योतिष्ट्वं स्पष्टयति :—

न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥१०॥

तत्र ब्रह्मणि सूर्यो न भाति न प्रकाशयति न चन्द्रतारकं न चन्द्रनक्षत्रं नेमा विद्युतस्तडितो भान्ति। अयं तु प्रसिद्धोऽग्निः कुतः

प्रकाशयितुं समर्थो भवेत्। तमेवात्मानं भान्तं प्रकाशयन्तं अनु पश्चात् इदं सर्वं भाति तस्य ब्रह्मणो भासा प्रकाशेन इदं दृश्यमानं सर्वं प्रपञ्चजातं विभाति। एतेषां ज्योतिषां स्वतः प्रकाशो नास्त्येव प्रत्युत आत्मन एव प्रकाशमादाय एतानि सर्वाणि प्रकाशवन्तीत्यभिप्रायः स्वतः प्रकाशत्वात्तस्येतिभावः ॥१०॥

एतत्पूर्वोक्तं सर्वमद्वैतमेव यतोऽद्वैतस्य ब्रह्मातिरिक्तसत्ताशून्यत्वात्तदात्मकमेवोपसंहारेणाह—ब्रह्मैवेत्यादि :—

ब्रह्मैवेदममृतं पुरस्तात् ब्रह्म पश्चाद् ब्रह्म दक्षिणतश्चोत्तरेण।
अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ॥११॥

पुरस्तादग्रे ब्रह्मैवेदममृतमविनाशितत्त्वं ब्रह्म पश्चात् पृष्ठभागेदक्षिणतो ब्रह्मैव तथा उत्तरेण उत्तरे वर्तमानं ब्रह्मैव अधो नीचैर्भागे तथा चोर्ध्वमुपरि ब्रह्मैवेदं सर्वत्र प्रसृतमिदं वरिष्ठं सर्वश्रेष्ठं ब्रह्मैव विश्वाकारेण परिणतं जलहिमोपलवत्। अनेकभेदभिन्नं द्वैतं केवलं गुणपरिणामवैचित्र्येणैव भिन्नाकारं प्रतीयते। वास्तविकं तु सर्वमद्वैतमेव निश्चेयमित्याशयः ॥११॥

इति द्वितीयमुण्डके द्वितीयः खण्डः समाप्तः

पूर्वस्मिन् खण्डेऽक्षरतत्त्वात्कथं स्थूलमिदं जगदुत्पद्यते इति विस्तरेण उपदिष्टम्। साम्प्रतं भोक्तृभोग्यनियामकतत्त्वनिर्णयाय जीवेश्वरस्वरूपं लक्षणं च, तथा तदधिगमाय साधनानि सत्यब्रह्मचर्यादीनवबोधयितुमपरोत्थानिकया रूपकव्याजेन द्वा सुपर्णेति जीवेश्वरस्वरूपं तथा वृक्षस्थानीयं जगदिति मन्त्रवर्णेन उपदिशति द्वा सुपर्णेति :—

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योऽभिचाकशीति ॥१॥

द्वा द्वौ सुपर्णा सुपर्णौ सयुजा सयुजौ सखाया सखायौ "सुपां सुलुक्" इति आकारादेशः, समानं तुल्यम् ईश्वरकृतं जीवकृतं च एतत् तुल्यत्वं वृक्षमिव एकस्मिन् शरीरे परिषस्वजाते परिष्वक्तवन्तौ व्रश्चनात् वृक्षमिव शरीरं तत्सागान्यात्। तयोर्मध्ये एकः स्वादुफलं पिप्पलं

पुण्यापुण्यस्वरूपमत्ति खादति। अन्यः केवलमनश्नन् अभुञ्जानः सन् अभिचाकशीति अभिपश्यत्येव। यथैकस्मिन् वृक्षे सख्यभावमासाद्य पक्षिणौ परस्परं मिलितौ प्रतिवसतः। तथा जीवेश्वरावपि शरीरे अनादिकालान्निवसतः। एको जीवः कर्तृत्वादिस्वात्म्यीकृत्य वास्तविकं तत्त्वं विस्मृत्य अविद्यया लौकिकेष्वेव सदाप्रवृत्तिं कुर्वन्नास्ते। अपरस्तु साक्षी केवलः कूटस्थत्वेन सर्वदा अविद्याव्यवहारतः मुक्तः भोग्यजातं परया शक्त्या प्रेरितं मायातत्त्वं प्रसूते। इत्थं तत्त्वत्रयेण जगद्व्यवहारः प्रवर्तते। भोक्तृतत्त्वं भोग्यतत्त्वं साक्षितत्त्वं च संक्षेपेणायं मन्त्र उपदिशति। तच्च सर्वं द्विविधं यथा हि—बद्धमुक्तभेदेन भोक्तृतत्त्वं द्विविधं, दिव्यादिव्यभेदेन भोग्यमपि द्विविधम्। अकल सकल भेदेनेश्वरतत्त्वमपि द्विप्रकारकमतएव द्वेति पदं सर्वत्रान्वयि बोध्यम्। एतेषु सर्वत्रान्वयिनी पराशक्तिस्तयैव सर्वं व्यवस्थाप्यते, सा पुराणागमेषु तथा श्रुतिस्मृतियुक्तिभिः स्पष्टं प्रतिपाद्यते। ननु शक्तिमतोऽतिरिक्तं शक्तितत्त्वमेव नास्ति तस्याङ्गीकारो निरर्थक ऐवेतिचेन्न—प्रमाणभावात् "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" "य एको वर्णो बहुधा शक्तियोगात्" "शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः। यतोऽतो ब्रह्मणस्तास्तु सर्गाद्याभावशक्तयः", "वस्तु धर्मा नियम्येरन् शक्त्या नैव यदा तदा" "अन्योन्यधर्मसांकर्याद् विप्लवेत जगत् खलु"। (प० ३-३६)। इति। अतएव कथनमात्रेण न निषेद्धं शक्यते शक्तितत्त्वम्। सैव सर्वं कार्यं नियमयति परब्रह्म तु निष्क्रियत्वात्सृष्टिकार्याय नोपयुज्यते। आविर्भावतिरोभावौ पुरस्कृत्य सृष्टिव्यवस्था। परमार्थतस्तु अद्वैत एव। भेदस्य जलतरङ्गवत् प्रतीतिः। अतएव वक्ष्यति चान्ते श्रुतिः—"ब्रह्मवेद ब्रह्मैव भवति", तथा—"यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय" इति दृष्टान्तेन स्पष्टीकरणाच्च। एतेन द्वैतं व्यावहारिकमेव सिद्ध्यति तदन्तर्गत एव कर्मोपासनाशास्त्रविचारः ॥

जीवव्यवहारं ब्रवीति समान——इति :——

समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः।
जुष्टं यदा पश्यति अन्यमीशमस्य महिमानमिति वीतशोकः ॥२॥

समानवृक्षे समष्टिव्यष्टिरूपे समष्टचभिमानीसगुणः परमात्मा सकलकल्याणगुणनिधिः स एव सकल इति कथ्यते, सच्चिदानन्दात्मकविग्रहत्वात् जगतः कर्ता ब्रह्मविष्णुरुद्राख्यां स एव भिन्नभिन्नकार्यकरणैः संज्ञां लभते, स एव आनन्दाख्यां दिव्यलीलाकारिणीं स्वरूपभूतां शक्तिं नियमयति उत्पत्तिस्थितिसंहारात्मिकामिति संक्षेपः। व्यष्टचभिमानी जीवः अविद्या कामकर्मवशात् अनीशत्वमल्पज्ञत्वं च प्राप्तः। स तस्मिन् वृक्षे स्वरूपं विस्मृत्य मुह्यमानः जगज्जाले भ्रमन् जलवीचिषु कीट इव निमग्नः अनीशया स्वहीनत्वानुभवेन शोचति शोकास्पदो भवति। यदा जुष्टं परमप्रेमास्पदत्वेन सेव्यं "जुषी प्रीतिसेवनयोः", सगुणमीश्वरम् ईशमस्यैवायं महिमा पुरोवर्ती इति पश्यति साक्षात् करोति तदा वीतशोको विमुक्तो भवति सगुणपरमात्मनो विभूतिमनुभूय मुच्यत इत्यर्थः ॥२॥

संसाराख्ये वृक्षे जीवो निमग्नः ईश्वरो मुक्तः सच्चिदानन्दरूपः तं साक्षात्कृत्य जीव आनन्दात्मकं मोक्षं प्राप्नोति इत्यर्थं कथयन् यदेत्याहः—

यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्।
तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥३॥

यदा यस्मिन् काले पश्यः पश्यतीति पश्यः सर्वकार्येषु कर्तृत्वाभिमानी जीवः रुक्मवर्णं प्रकाशात्मकं कर्तारं सृष्टिविधायकं स्थितिप्रलययोरपि ग्रहणमेतेन, ईशमीशनशीलमीश्वरं पुरुषं पूर्णं ब्रह्मयोनिं शास्त्राभिव्यक्तिकारणं पश्यते साक्षात्करोति। तदा विद्वान् पुण्यपापे उभे विधूय अविद्याकृतं सर्वं मिथ्यात्वेनानुभूय निरञ्जनः शुद्धः सन् परमं साम्यं ब्रह्मणा साकं "भोगमात्रसाम्यलिङ्गाच्चेति", आनन्दभोगे तुल्यत्वं गच्छति। "इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः" इति सूत्रगीताभ्यां सगुणोपासकानां मुक्तिः प्रदर्शिता साधर्म्यसाम्यपदयोरेकार्थत्वात्। श्रुतौ परमविशेषणेन श्रौतमद्वैतं सर्वथा भेदशून्यं प्रादर्शयत् तेन मुख्यत्वं तस्य विज्ञायते। अन्यथा ऐक्यं चेत्तर्हि परमविशेषणवैयर्थ्यं स्यात्। विशेषार्थबोधकत्वमिति विशेषणलक्षणमपि लुप्येत्। तस्मात्साम्यपदेन गौणाद्वैतसम्मता मुक्तिरेव ग्राह्या, परमसाम्यपदेन

मुख्याद्वैतिनां च इति विवेकः। श्रुतिस्मृत्योरविरोधश्चान्यथा स्मृतिवाक्यस्य त्यागः स्यात्। उक्तं च—"विरोधेत्वनपेक्ष्यं स्यादसति ह्यनुमानम्", इति न्यायेन। अन्यच्च—"तत्र को मोहः कः शोकः", इतिमन्त्रार्थेन ऐक्यं चात्र वर्णितम्। पूर्वस्मिन् मन्त्रे "वीतशोक" इति तेन सद्योमुक्तिलभ्यमद्वैतमेवात्र ग्राह्यम्। नापेक्षिकमद्वैतकल्पमिति निर्णयः गौणंमुख्यन्यायात् ॥३॥

तत्त्वज्ञं स्तौति प्राण इति :—

प्राणो ह्येष यः सर्वभूतैर्विभाति विजानन् विद्वान् भवते नातिवादी।
आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठः ॥४॥

एष प्रसिद्धः यः परमात्मा हि प्राणः प्रकृष्टचेष्टावान् सर्वभूतैर्नामरूपात्मकैः सह विभाति तं विजानन् अपरोक्षीकुर्वन् विद्वान् अतिक्रम्य वादी न भवति। यो हि सातिशयं वेत्ति सोऽतिवादी, सर्वातिशयं ब्रह्मण्येवमन्यमानस्य नातिवादीति संज्ञा, ब्रह्मणोऽधिकं किमपिनास्ति-इत्यभिप्रायः ॥ उक्तं च—"तत्र निरतिशयं सार्वज्ञबीजम्" एवं वदनशीलस्य स्थितिं ब्रूते—"आत्मक्रीड" इति आत्मक्रीडो बाह्यविषयेष्वपेक्षाशून्यः सन् केवलमात्मन्येव क्रीडनशीलः, प्रकृष्टवैराग्यात्, आत्मरतिः आत्मन्येवरतिर्यस्यासौ आत्माराम इति यावत्, क्रियावान्—आत्मन्येव पूर्वोक्तैव क्रिया प्रशस्ता व्यवहृतिरस्य, एष जीवन्मुक्तो विपश्चिद्वरः ब्रह्मविदां तत्त्वज्ञानिनां मध्ये वरिष्ठः श्रेष्ठः, सर्वस्मात् कर्मणो विरक्तः केवलमात्मन्येव रमते क्रीडते कुरुते वा एतादृश्येव तस्य क्रिया जायते। उक्तं च—"यस्त्वात्मरतिरेवस्यादात्मतृप्तश्च मानवः। आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते।" क्रियावान् इत्यनेन आत्मरमणात्मक्रीडनमात्रमेव क्रियात्वेन ग्राह्यम् ॥४॥

आत्मज्ञानसाधनान्याह—सत्येनेति :—

सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्-ज्ञानेन ब्रह्मचर्येण नित्यम्।
अन्तः शरीरे ज्योतिर्मयो हि शुभ्रो यं पश्यन्ति यतयः क्षीणदोषाः ॥५॥

एष हि आत्मा सत्येन सदाचारेण न लभ्यः प्राप्यः नित्यं सततं तपसा चित्तेन्द्रियाणां निग्रहेण, सम्यग्ज्ञानेन भ्रमप्रमादरहितेन "अहं ब्रह्मास्मि" इति ज्ञानेन, नित्यं ब्रह्मचर्येण अष्टविधमैथुनपरित्यागेन,

क्षीणदोषाः मलविक्षेपावरणरहिताः यतयः सन्यासिनः, प्रत्यग्ब्रह्मयोगिन एव आत्मानं पश्यन्ति साक्षात्कुर्वन्ति । यो हि आत्मा अन्तः शरीरे मनसि शुभ्रः, सर्वदोषविवर्जितः ज्योतिर्मयः प्रकाशरूपो विभाति इति शेषः । ननु क्रियावान् वरिष्ठ इति कथनेन कथं ज्ञानस्य संगतिरिति चेन्न—मायिककर्मणामेव समुच्चयो ज्ञानेन विरुध्यते, यत्तु शुद्धं कर्म तेन सार्धमविरोध एव । यथा परमात्मा सर्वं जगद्-व्यवहारं कुर्वन्नपि निर्लिप्त एव नित्यज्ञानस्वरूपत्वात् शुद्धो मुक्तश्च, तद्वत् तत्त्वविदपि सर्वं कुर्वन् क्रियावत्वेन गृहीतः बहिरन्तः सर्वमात्मैव तस्य, क्रियाचरणमपि आत्मक्रीडनमेव तस्य, "जन्म कर्म च मे दिव्य" मित्यनेन इदमेव गृहीतम्। "तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते ।" इत्यनेनापि समर्थितम् । अत एव प्राणो ह्येष इति श्रुत्या क्रियावत्वेनैव ब्रह्मणो निर्देशः । अत एव वेदादिप्रतिपादितकर्मणां दिव्यत्वात् प्रमाणत्व-मप्रतिहतम् । यत्रानुपयोगित्वं कथ्यते तत्र केवलं ज्ञानप्रधानार्थम् । यतः मोक्षो ज्ञानेनैव तथापि ज्ञानसहायकत्वेन कर्मणोऽविरोधः । कर्म-योगं विहाय ज्ञानेनापि मोक्षस्यासिद्धेरतएव सत्यतपोब्रह्मचर्यादीना-मुपादानम् । यदि सर्वथा कर्मणामनुपयोगःस्यात् तर्हि आत्मरतिः आत्मक्रीडनमपि न सम्भवेत् । अतएव लोकसंग्रहात्मकमाचरणं संगच्छते । एतेन ब्रह्मविदां कर्मणां सर्वथा निषेधो वैराग्यार्थमेव विभाव्यम् ॥५॥

पूर्वोक्तसाधनेषु मध्ये सत्यस्यैव मुख्यत्वमाह—सत्यमेवेति :—

सत्यमेव जयते नानृतं सत्येन पन्था विततो देवयानः ।
येनाक्रमन्त्यृषयो ह्याप्तकामा यत्र सत्यस्य परमं निधानम् ॥६॥

सत्यमेव जयते सर्वदा विद्यमानत्वात्, नानृतमसत्यं न, छिन्नमूल-त्वात् । सत्येनैव सदाचारणेनैव देवयानः पन्थाः प्रकाशात्मको मार्गो विततो भवति ज्ञानात्मक इति । येन मार्गेण आप्तकामा ऋषयो जीवन्मुक्ताः महात्मानः आक्रमन्ति स्वस्वरूपबोधं लभन्ते । यत्र सत्ये तत्परमार्थतत्त्वं, सत्यस्य सत्यरूपोत्कृष्टसाधनस्य परमं प्रकृष्टं निधानं विद्यते । अथवा सत्योपासनया देवयानमार्गस्य प्राप्तिस्तया परम-

सत्यस्य ब्रह्मण उपलब्धिरिति, "परस्यान्ते कृतात्मानः प्रविशन्ति परं पद" मिति स्मृतेः ॥६॥

आध्यात्मिकं साक्षात्कारमाह—बृहदिति :—

बृहच्च तद् दिव्यमचिन्त्यरूपं सूक्ष्माच्च तत् सूक्ष्मतरं विभाति ।
दूरात् सुदूरे तदिहान्तिके च पश्यत्स्विहैव निहितं गुहायाम् ॥७॥

बृहच्च तद् ब्रह्मतत्त्वं विभुत्वात् दिव्यं स्वयंप्रभमिन्द्रियाणामविषयमतएव अचिन्त्यरूपं चिन्तयितुमशक्यं सूक्ष्मादाकाशादेरपि सूक्ष्मतरमतिशयाणुरूपं विभाति सर्वत्र पदार्थेषु । दूरात् सुदूरेऽल्पमतीनां विद्यते । विदुषामन्तिके समीप एव । इह जगति पश्यत्सु साक्षात्कुर्वत्सु विद्वत्सु इहैव गुहायां संस्कृतबुद्धौ निहितं लक्ष्यते साक्षात् क्रियत इति शेषः ॥७॥

ज्ञानेनैवात्मसाक्षात्कार इति कृत्वा अन्यसाधनं निषिध्यते न चक्षुषेति :—

न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा ।
ज्ञानप्रसादेन विशुद्धसत्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः ॥८॥

न चक्षुषा गृह्यते नेत्रेन्द्रियेण न गृह्यतेऽरूपत्वात् । नापि वाचा वागिन्द्रियेण शब्दातीतत्वात् । तथाऽन्यैर्देवैरिन्द्रियैरपि तपसा द्वन्द्व सहनेन क्रियात्मकसाधनेन वा न प्राप्यते । कर्मणा अग्निहोत्रादिना वा न, तपःकर्मणी स्वरूपबोधाय नालमित्यर्थः । शुद्धसत्त्वोऽधिकारी निष्कलमात्मानं ध्यायमानः योगमनुतिष्ठन् ज्ञानप्रसादेन पश्यते साक्षात्करोति, ध्यानसाध्यं ज्ञानं ब्रह्मबोधः, तेनाद्वैतसाक्षात्कार इत्यर्थः । तपःकर्मणी ध्यानसाधनीभूते ध्यानसाधनं ज्ञानं तेन चात्मसाक्षात्कार इति क्रमः ॥८॥

स्वरूपप्रकाशावस्थामाह—एष इति :—

एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश ।
प्राणैश्चित्तं सर्वमोतं प्रजानां, यस्मिन् विशुद्धे विभवत्येष आत्मा॥९।

एषोऽणुः सूक्ष्म आत्मा परमात्मा चेतसा शुद्धेन मनसा वेदितव्यः ज्ञातुं योग्यः । यस्मिन्नात्मनि प्राणः प्राणतत्त्वं पञ्चधा प्राणापानादिभेदैर्विभक्तः सन् संविवेश स्थितः । प्राणैः सार्वं प्रजानां प्राणिनां सर्वं

चित्तं विज्ञानं समारोपितं प्राणाश्रितमेव विज्ञानतत्त्वमोतमन्वितम्। यस्मिन् चित्ते विशुद्धे एष आत्मा विभवति विभु परिमाणेन प्रकाशते शिवत्वं लभत इत्यर्थः। "बुद्धेर्गुणेनात्मगुणेन चैवाराग्रमात्रोह्यवरोऽपि दृष्टः। "स चानन्त्याय कल्पते" इतिश्रुत्यन्तरम्, अतः अल्पत्वमौपाधिकं विभुत्वं स्वाभाविकं चेति विज्ञेयम्। उक्तं च "अतत्त्वार्थवदल्पं च" (गीता १८-२२-)। "आभास एव च" इति सूत्रेण अन्तःकरणे चिदाभास एव जीवतत्त्वमिति च निर्णयः ।।९।।

आत्मज्ञो भूतिकामेनापि पूज्य इत्याह—यं यमिति :—

यं यं लोकं मनसा संविभाति विशुद्धसत्वः कामयते याँश्च कामान्।
तं तं लोकं जयते ताँश्च कामान् तस्मादात्मज्ञं ह्यर्चयेद् भूतिकामः ।।१०

विशुद्धतत्त्वः शुद्धान्तःकरणो ब्रह्मविद् यं यं पित्र्यादि लोकं प्राप्नुवन्निच्छति तथा यान् यान् कामान् कामयते तं तं लोकं संकल्पेनैव सर्वान् कामाँश्च जयते लभते। "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति" श्रुतेः। ब्रह्मविदि निखिलस्य काम्यविषयाणामन्तर्भावात्, "तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः" इत्युक्तेश्च। तस्मात् कारणात् भूतिकामेनापि स आत्मज्ञो हि अर्च्यः पूज्य इति। अर्चयेद् भूतिकाम आत्मज्ञमिति विधीयते। आत्मज्ञानिनामर्चनेन सर्वा विभूतयो जायन्त इति भावः यथाग्निहोत्रेण स्वर्गः ।।१०।।

इति तृतीयमुण्डके प्रथमः खण्डः समाप्तः।

पूर्वेषु खण्डेषु ब्रह्मविज्ञानं ससाधनं विस्तरेणोपदिष्टम् इदानीं ब्रह्मविद्यायाः परमं प्रयोजनं वक्तुमन्यप्रकारमाह—स इति :—

स वेदैतत्परमं ब्रह्मधाम यत्र विश्वं निहितं भाति शुभ्रम्।
उपासते पुरुषं ये ह्यकामास्ते शुक्रमेतदतिवर्तन्ति धीराः ।।१।।

स विद्वान् एतत् प्रसिद्धं शुभ्रम् प्रकाशस्वभावं परमं श्रेष्ठं ब्रह्मधाम ब्रह्मतेजो वेद जानाति, यत्रेदं दृश्यमानं विश्वं मृदिघटवदारोपितम्। ये केचिदकामा वैराग्यसम्पन्नाः पुरुषमात्मानमुपासते ते धीराःस्थितप्रज्ञा योगिनः एतत् शुक्रं शुक्लस्वरूपमतिशयेन वर्तन्ते, ब्रह्मीभाव-

मुपयान्तीत्यर्थः । अथवा शुक्रं वीर्यवासं पुनर्जननार्थं पञ्चाग्निविद्याया-मुपदिष्टमतिवर्तन्ति अतिक्राम्यन्ति, जननमरणरहितास्ते भवन्तीत्यर्थः ॥१॥

मुमुक्षुभिः कामत्यागः कार्यः यतस्तस्मादेव संसारोत्पत्तिः । अतस्तन्निवृत्तये उपदिशति कामानिति :—

कामान् यः कामयते मन्यमानः सकामभिर्जायते तत्र तत्र ।

पर्याप्तकामस्य कृतात्मनस्तु इहैव सर्वे प्रविलीयन्त कामाः ॥२॥

यो मुमुक्षुः कामान् दृष्टादृष्टविषयकान् कामयते इच्छति, मन्यमानश्चिन्त्यमानः स कामभिः स्वाहितसंस्कारैः "बहुलं छन्दसि" इति ऐसभावः, तत्र तत्र तासु तासु योनिषु जायते उत्पद्यते । पर्याप्तकामस्य पर्याप्ताः पूर्णाः कामा यस्य, विषयदोषदृष्टया निवृत्ततर्षस्य अथवा सर्वकामस्य "अकामः सर्वकामो वा" इति उक्तत्वात् अतएवं कृतात्मनः कृतकृत्यस्य "एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत" इहैवास्मिन्नेवजीवत्काले सर्वे कामाः प्रविलीयन्ति विलयमुपगच्छन्ति "न तस्य प्राणाउत्क्रामन्ते ब्रह्मैवसन् ब्रह्माप्येति" इति श्रुतेः । ब्रह्माद्वैतकृतसाक्षात्कारो लोकान्तरगमनागमनादिना न क्लिश्यते इत्याशयः ॥२॥

आत्मप्राप्तौ तस्य वरणमेव मुख्यं साधनं तथा प्रवचनादीनामकारणत्वमाह—नायमात्मेति :—

नायमात्मा प्रवचनेन लभ्यो न मेधया बहुना श्रुतेन ।

यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनु ँ स्वाम् ॥३॥

नायमात्मा प्रवचनेन लभ्यः, अयमात्मा परमात्मा प्रवचनेन केवलेन व्याख्यानेन न लभ्यः, न लब्धुं शक्यः । न मेधया ग्रन्थधारणशक्त्या बुद्ध्या, तथा बहुना श्रुतेन शास्त्रश्रवणेन च न लभ्यः । यमात्मानमेषोऽधिकारी वृणुते सातिशयं भजते तेनाधिकारिणा पुरुषेण लभ्यः । तस्याधिकारिण एष आत्मा स्वां तनुं स्वस्वरूपं विवृणुते प्रकाशयति । उक्तं च—"समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः । ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ।" "तस्याहं न प्रणस्यामि स च मे न प्रणश्यति ।" "अपि च संराधने प्रत्यक्षानुमानाभ्याम्" ।

(वै० द० ३-२-२४)। "योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम्।" इत्यादि प्रमाणैः स्फुटमेतत् ॥३॥

अन्यच्च :—

नायमात्मा बलहीनेन लभ्यो न च प्रमादात्तपसोप्यलिङ्गात्।
एतैरुपायैर्यतते यस्तु विद्वान् तस्यैष आत्मा विशते ब्रह्मधाम ॥४॥

अयं पूर्वोक्त आत्मा बलहीनेन कामक्रोधादिभिः पराभूतेन न लभ्यः न प्राप्तुं योग्यः। न च प्रमादात् सावधानत्वाभावात् देहगेहादौ संसक्तचित्तः प्रमाद्यति, तेनात्मसाक्षात्कारे प्रमादो जायते अतएव प्रमादादपि न लभ्यः। तथा अलिङ्गात् तपसोऽपि न, लीनमर्थं बोधयतीति लिङ्गं मननं तर्कोपकरणं तद्रहितात् तपसः ज्ञानात् "यस्य ज्ञानमयं तपः" इति प्रमाणात्, अन्धश्रद्धया गृहीतेन ज्ञानेनेत्यर्थः॥ एतैः पूर्वोक्तैरुपायै र्यो विद्वान् यतते एष आत्मा तस्य ब्रह्मधाम ब्रह्मस्वरूपेण जीवब्रह्मैक्यरूपेण विशत इत्यर्थः ॥४॥

जीवस्य तद्भावापत्तिमाह—सम्प्राप्येत्यादिना :—

संप्राप्यैनमृषयो ज्ञानतृप्ताः कृतात्मानो वीतरागाः प्रशान्ताः।
ते सर्वगं सर्वतः प्राप्य धीरा युक्तात्मानः सर्वमेवाविशन्ति ॥५॥

ऋषयो ब्रह्मविदः एनमात्मानं सम्प्राप्य सम्यग् विज्ञाय ज्ञानतृप्ता ज्ञानेन तृप्ताः सन्तुष्टाः कृतात्मानः शुद्धान्तःकरणा वीतरागा रागादिदोषरहिताःप्रशान्ताः शमपरा निगृहीतेन्द्रियास्ते धीरा विवेकिनो युक्तात्मानः समाहितचित्ताः सन्तः सर्वगं सर्वत्र व्याप्तं सर्वतः सर्वभावेनोपलभ्य सर्वमेवाविशन्ति, शरीरपाते सति ब्रह्मैव भवन्ति। ननु ज्ञानेन अविद्याभङ्गे दिव्यानन्द भोगो जीवस्य कथमिति चेन्न—आनन्दात्मविग्रहस्वीकारात् तच्च मायामयत्वेनानाक्रान्तं चिन्मयत्वात्। शरीरेण विना भोगासिद्धेः। उपासनाबलेन चैव स्यात्। यथा पापभोगे नारकीयशरीराङ्गीकारः। परन्तु ब्रह्माद्वैतबोधे नास्ति शरीरावश्यकता। अभोक्तृत्वात् द्वैताभावाच्चेति संक्षेपः ॥५॥

परान्तकालिकमोक्षमाह वेदान्तेति :—

वेदान्तविज्ञानसुनिश्चितार्थाः सन्यासयोगाद् यतयः शुद्धसत्त्वाः।
ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे ॥६॥

वेदान्तविज्ञानेन सुनिश्चितोऽर्थो (यत्सगुणोपासनया गौणाद्वैतानुभवस्तथा जीवब्रह्मैक्यबोधेन सद्योमुक्तिरिति) येषां ते वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद् यतयः शुद्धसत्वा, आत्मनि कर्तृत्वभोक्तृत्वबुद्धित्यागात् परमगुरौ परमात्मनि समस्तकर्मणां फलानां समर्पणाद् वा, शुद्धसत्वाः शुद्धान्तःकरणाः यतयः सन्यासिनः सिद्धा ब्रह्मलोकेषु सगुणब्रह्मलोकेषु वसन्तः परान्तकाले सृष्टिसमाप्तिकाले अथवा ब्रह्मात्मैक्यबोधे जाते "बहूनां जन्मनामन्ते" इत्युक्तेः परामृताः सन्तः पूर्णमोक्षसुखमनुभवन्तः, परिमुच्यन्ति ब्रह्मभावं प्राप्नुवन्ति जीवन्मुक्तिं प्राप्य विदेहकैवल्यं लभन्त इत्यभिप्रायः। केचिज्ज्ञानरहितानां ब्रह्मलोकगतानां पुनरावर्तनं परिमुच्यन्ति, इति पदेन मन्यन्ते ॥ ६॥

ऐक्यप्रकारमाह—गता इति :—

गताःकलाः पञ्चदश प्रतिष्ठां देवाश्च सर्वे प्रतिदेवतासु ।
कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवन्ति ॥७॥

मोक्षकाले पञ्चदशकलाः प्राणश्रद्धामहाभूतपञ्चकादयः प्रश्नोपनिषत्प्रसिद्धाः प्रतिष्ठां गताः कार्यभावं परित्यज्य स्वस्वकारणे लीना भवन्ति। चक्षुरादिकरणस्था देवाश्च स्वस्वकारणभूतासु देवातासु सर्वे प्रतिष्ठां गता भवन्ति। कर्माणि सर्वाणि कृतानि सांसारिकावस्थायां विज्ञानमय आत्मा जीवश्च कर्ताभोक्तेति यावत् एते सर्वे परेऽव्यये सर्वव्यापिनि ब्रह्मणि एकीभवन्ति अनेकमेकं सम्पद्यन्त इत्येकीभवन्ति व्यावहारिकं द्वैतं प्रविलाप्य अभेदात्मकमद्वैतमुपगच्छन्ति। परिच्छिन्नाधारस्थं जलं यथाधारापाये स्वरूपतां गच्छतीतिवत् अथवा घटापाये जल सूर्यको यथादित्यमितिवत् सूक्ष्मशरीरभङ्गे जीवब्रह्मैक्यं सम्पद्यते इत्यर्थः ॥७॥

ननु घटो जलाशये प्रक्षिप्तोऽपि जलात् पृथगेव तिष्ठन् स्वसत्तया वर्तते एवमेव ब्रह्मणि मोक्षत्वमुपगतोऽपि जीवो भिन्न एव कथं न स्यात्। इति चेन्न—साजात्यात् घटो हि जलाद् भिन्नजातीयः। जीवात्मा तु

एकजातीयस्तस्माददृष्टान्त इति प्रकटयन्नाह यथेति :—

**यथा नद्यः स्यन्दमानाःसमुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान् नामरूपाद् विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ।।८।।**

यथा नद्यःस्यन्दमाना प्रवहन्त्यो नामरूपे स्वकीयं गङ्गादिनाम तथा रूपं च विहाय परित्यज्य अस्तं गच्छन्ति घटवत्पृथक् तासां स्थित्यभाव इत्यर्थस्तथा विद्वान् ब्रह्मविदपि नामरूपाद् दिव्यादिव्य भेदात् विमुक्तः सर्वोपाधिरहितः परात् ब्रह्मविष्णुरुद्रसंज्ञकात् भावादपि उत्कृष्टं यत्परं सर्वत्र पूर्णं निराकारं परमात्मानमुपैति तेन सार्धमभिन्नतां गच्छति । एतेन द्वैतं व्यावहारिकमेव गम्यते । एवमेव द्वा सुपर्णेतिश्रुत्युक्तं, नेयम् । तस्मान्मुक्तौ भेदवादोऽसंगतः ।।८।।

कस्मिन्नु विज्ञाने सर्वं विज्ञातं भवति, इति उपक्रमोक्ताद्वैततत्त्वमनेकप्रकारेणोपदिश्योपसंहृत्य च तत्फलमाह स यो ह वा इति :—

**स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति नास्याब्रह्मवित्कुले भवति ।
तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तो अमृतो भवति ।।९।।**

यः कोऽपि पुरुषः ह वै निश्चयेन तत्प्रसिद्धं परमं ब्रह्म सर्वव्यापकं वेद जानाति ब्रह्मैव भवति ब्रह्मस्वरूप एव भवति किं चास्य विदुषः कुले पुत्रादिवंश्ये शिष्यादिवंश्ये वा अब्रह्मविद् स्वरूपज्ञानरहितो न भवति ब्रह्मवेदनपरम्पराया अभावो न भवतीत्यर्थः । किं च शोकमिष्ट वियोगजनितं सन्तापाख्यं तरति जीवन्नेव तद्रहितो भवति । पाप्मानं कल्मषमधर्ममितियावत् तरति अतिक्राम्यति । गुहाग्रन्थिभ्यः अविद्याध्यासवशाज्जाता अहंममाभिमानरूपास्तेभ्यो रहितः सन् अमृतो भवति मरणभावाद् रहितो भवतीत्यर्थः ।।९।।

विद्याप्रदाननियममाह—तदेतदिति :—

तदेतदृचाभ्युक्तं क्रियावन्तः श्रोत्रिया ब्रह्मनिष्ठा स्वयं जुह्वत एक ऋषिं श्रद्धयन्तः । तेषामेवैतां ब्रह्मविद्यां वदेत् शिरोव्रतं विधिवद् यैस्तु चीर्णम् ।।१०।।

तदेतद् विद्यासम्प्रदानमृचामन्त्रेण अभ्युक्तं कथितं तं मन्त्रमाह क्रियावन्तः निष्कामकर्मानुष्ठाने तत्पराः श्रोत्रिया वेदाध्येतार अपराविद्याविद इत्यर्थः । ब्रह्मनिष्ठाः सगुणोपासकाः श्रद्धयन्तः आस्तिक्य-

बुद्धिमन्तः सन्तः स्वयमेक ऋषिं नामेकाग्नि जुह्वतः साग्निकाः यैश्च विधिवच्छिरोव्रतमाथर्वणिकानां व्रतविशेषं चीर्णमनुष्ठितं तेषामेव एतां ब्रह्मविद्यां वदेत्। विधिवदपराविद्यानुष्ठानपराणामेवास्यामधिकार इति भावः ॥१०॥

प्रकृतकथामुपसंहरति तदेतदिति :—

तदेतत् सत्यमृषिरंगिराः पुरोवाच नैतद चीर्णव्रतोऽधीते।
नमः परमऋषिभ्यो नमः परमऋषिभ्यः ॥११॥

तदेतत् प्रकृतं सत्यं ब्रह्मप्रतिपादकज्ञानम् ऋषिरंगिराः पुराकाले शौनकायोवाच उपदिदेश अन्योऽपि एवमेवाचरेत् इति भावः। एतदचीर्णव्रत आथर्वणिकव्रताचरणरहितः तेनाध्येतुं न शक्यते इति भावः। ब्रह्मविद्यासंप्रदायप्रवर्तकेभ्यः परमऋषिभ्यो नमः अभ्यासः समाप्त्यर्थः ॥११॥

इति मुण्डकोपनिषद् प्रकाशभाष्यं समाप्तम्

माण्डूक्योपनिषद्

भूमिका

ब्रह्मप्रतिपादकवेदान्त वचसां द्वैतरूपेणाद्वैतरूपेण च प्रवृत्तिर्दृश्यते । अतएव केचिद् वेदान्तिनः द्वैते, अद्वैते, द्वैताद्वैते विशिष्टाद्वैते वा तात्पर्यं वेदान्तानां कल्पयन्ति । तन्निर्णेतुं किञ्चित्प्रक्रम्यते । द्वैतिनः "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिसष्वजाते"इत्यादिश्रुत्या रूपकेण जीवेश्वरप्रकृतितत्त्वानां ग्रहणेन एतेषां च भेदस्य नित्यत्वेन द्वैतसिद्धान्तः सिद्धयति । अन्यच्चाद्वैतबोधकवाक्यानि गौणान्येव परमात्मनः एकत्वे तेषां तात्पर्य्यमिति वदन्ति । केश्चिद् "एकमेवाद्वितीयम्" "आत्मा वा इदमेक एवाग्र आसीत्" इत्यादि वाक्यैरद्वैतं श्रूयते । तेन द्वैतवचनानां गौणत्वमद्वैतवाक्यानां च मुख्यत्वमभ्युपगम्यते । केचिद् द्वैताद्वैतं, स्वाभाविकभेदभिन्नं च वर्णयन्ति । केचिद् जीवप्रकृतिविशिष्टं ब्रह्मतत्त्वं विशिष्टाद्वैतमिति कृत्वा मन्वते, इत्यादि मतभेदानां समवायोवेदान्तसाहित्येषूपलभ्यते । द्वैतस्य स्वतः सिद्धत्वात् तदुपदेशोऽज्ञातार्थज्ञापकत्वं शास्त्रत्वमिति लक्षणेनोपदेशकोटिबहिर्भूत इत्यनुमन्यते "नेह नानास्ति किञ्चन" "तत्र को मोहः कः शोक एकत्वमनुपश्यतः" इत्यादिवचनैरद्वैतं स्तूयते । "द्वितीयाद् वै भयं भवति" "यदल्पं तन्मर्त्यम्" योऽन्यादेवतामुपास्ते. . .असौ पशुः स देवानाम्, इति द्वैतनिन्दावचनं च दृश्यते । एतादृशं क्वापि अद्वैतनिन्दाऽनुपलब्धेरद्वैत एव तात्पर्य्यं निश्चीयते । द्वैताद्वैतमतमपि एतादृशमेवास्ति मुण्डकभाष्ये विस्तरेण प्रदर्शितं चैतत् । सर्वैरद्वैतवादिभिः अद्वैतप्रदर्शनार्थं माण्डूक्योपनिषदवलम्बिता अनेकटीकाटिप्पण्यादय आविष्कृताश्च । परं वस्तुत अस्या अभिप्रायः शैवसिद्धान्तानुसारमेव प्रतीयते । यतः "शान्तं शिवमद्वैतम्" "शिवोऽद्वैत एव" इतिवचनेन शैवाद्वैत एव तात्पर्यमवसीयते । शैवशाक्तमतप्रसिद्धानां तत्त्वानां च निरूपणदर्शनात् अभ्यर्हितत्वमस्य सिद्धयति । एतेनान्येषां मतानामत्रावकाशो दृश्यते । अतएव एतत्स्पष्टीकर्तुमारम्भः । शक्तिशक्तिमतोरभेदमास्थाय शाक्तसम्मतविषयाणामपि निरूपणं कृतम् । यत उभयोरैक्यात् । उक्तं च शक्तिसूत्रे--"चितिस्वतन्त्रा विश्वसिद्धिहेतुः" "चैतन्यश्चात्मा" इति शिवसूत्रम्, इत्युभयोरैक्यमवगतमन्यच्चोक्तम्--"शक्तो यया शम्भुर्भुक्तौ मुक्तौ च पशुगणस्यास्य । "तामेनां चिद्रूपामाद्यां सर्वात्मनास्मि नतः" एतयोर्मतयोरद्वैतं समानमेव सम्मतम् । भगवत्पादमते यदद्वैतं सम्मतं तच्च मायातत्त्वपर्यन्तं निरूप्य मायानिवृत्त्यनन्तरमद्वैतमात्रमवशिष्यते । विद्यातत्त्वं, ईश्वरतत्त्वं, सदाशिवतत्त्वं, शिवशक्तितत्त्वं च निरूपणत्वे,नाङ्गीकृतं तत्त्वमसि इत्यादि वाक्योत्थं ज्ञानमपि

अविद्याकोटावेव मतम्। परमेतन्मते शुद्धविद्यातत्त्वं अद्वैतबोधकं सत्यमस्ति अनपायात्। सत्ख्यातिवादमतानुसारं जगत्सत्यत्वमभिमतं केवलं मायाजन्यो-भेदो मिथ्यात्वेनाभिमतः। श्रीभगवत्पादमते भेदेनसार्धं जगतोऽपि मिथ्यात्वम्। एवं स्वीकृते शास्त्रगुरुशिष्यादीनां सर्वेषां च व्यर्थत्वमायातमितिवदन्ति। श्रीभगवत्पादमते ईश्वरतत्त्वं मायातत्त्वान्तर्गतं मायासिद्धौ तत्सिद्धिः कल्पितैश्वर्य-युक्तः सः। परन्तु एतन्मते नित्यैश्वर्ययुक्तो मायातत्त्वाद् भिन्नस्तत्स्वामी च इत्यनयोर्भेदः। सच्चिदानन्दरूपस्य परतत्त्वस्य इच्छया आनन्दांशतः शिवशक्ति-तत्त्वं समुद्भूतम्। चिदंशतः ईश्वरसदाशिवविद्यातत्त्वानि, सदंशतः जडतत्त्वं मायामारभ्य पृथिवीपर्यन्तानि एकत्रिंशत्तत्त्वानि इति। पूर्वोक्तानां सर्वेषां तत्त्वानां परस्मिन् ऐक्यमस्ति। तदेव सच्चिदानन्दरूपेणाभिमतमद्वैताख्यम्। ईश्वरसदा-शिवतत्त्वं तु एकमेव। उक्तं च "ईश्वरता कर्तृत्वं स्वतन्त्रता चित्स्वरूपता चेति"। एतेचाहन्तायाः पर्यायाः सद्भिरुच्यन्ते। पराहन्ता एव ईश्वरतत्त्वं शुद्धसत्त्वप्रधानम् "एकोऽहं बहुस्याम" इति श्रुत्युक्तं यदा विरलतरसत्त्वप्रधानस्तदा ईश्वर एव सदा-शिवेति पदवाच्यो भवति मन्त्रेश्वरो वा कथ्यते। शब्दब्रह्मतत्त्वावच्छिन्नो ब्रह्मा-त्मैव सदाशिवो भवति। उभयोरैक्यं कृत्वा ईश्वर एव श्रुतौ निर्दिष्टः "प्रभवाप्ययौ हि भूतानामित्यादि। "अयमात्मा ब्रह्मेति" विद्यातत्त्वं सर्वेषु तत्त्वेषु अभेदबोधकं निर्दिष्टं "सर्वं खल्विदं ब्रह्म" "शिवोऽहम्" "अहं ब्रह्मास्मि" "सोऽहम्" इत्यादि श्रुति-प्रोक्तम्। पञ्चकञ्चुकाविष्टो जीवपदार्थोऽपि अहंममाभिमानवान् सन् प्रवर्तते। यदा विद्यया अद्वैतरूपया शिवतत्त्वं साक्षात्करोति तदा शिवतां लभते। स द्विविधः समष्टिरूपो व्यष्टिरूपश्च। हिरण्यगर्भो विराडिति समष्टिः। प्राज्ञस्तैजसो विश्व इति व्यष्टिः अङ्गाङ्गिविवक्षया उक्तः। "सप्ताङ्गः" इति पदेन मायादिसप्तशुद्धा-शुद्धतत्त्वानि निर्दिष्टानि। "एकोनविंशतिमुखः" इत्यनेन प्रकृतिमारभ्य पृथिवी-पर्यन्तानि तत्त्वानि उपदिष्टानि एवमेकत्रिंशत्तत्त्वानि भवन्ति। "स्थूलभुग्" इत्यत्र स्थूलानां पञ्चशब्दादीनामपि पञ्चार्थानामपि संग्रहः कर्तव्यः उभयोरैक्यं कृत्वा निर्देशः। एवं षट्त्रिंशत्तत्त्वानां समावेशः। ओंकारमवलम्ब्य ब्रह्मसाक्षा-त्कार इति सम्प्रदायः, ओंकारजन्यमन्त्राणां वीजानां च विभूतिमात्रविषयः। प्रणवेन भुक्ति-मुक्ति उभयमेव अतएव प्रणव एवाश्रितः। जगत आविर्भावति-रोभावौ शक्त्या एव भवतः। कारणात्मना विद्यमानमेव जगत् आविर्भवति पुनश्च तिरोधत्ते। "अहमिप्रलयं कुर्वन्निदमः प्रतियोगिनः" इत्युक्तेः आविर्भावेन अभ्युदय-धर्मोपदिष्टाचरणेन भुक्तिः, तिरोभावेन मोक्षाख्यधर्माचरणान्निःश्रेयसमिति प्रयोजननिष्पत्तिः। अत्राद्वैताख्यमोक्ष एव परम प्रयोजनम्। एवमुपनिषद् वर्णितानामर्थानां संगतिर्भवति।

श्रीपीताम्बरापीठ—दतिया }

श्रीपीताम्बरापीठस्थः
स्वामी

माण्डूक्योपनिषद्

ओं भद्रं कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमाक्षिभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेम देवहितं यदायुः॥
स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥

ओं शान्तिः शान्तिः शान्तिः॥

मङ्गलाचरणम्

जाग्रदादिषु भावेषु प्रणवाभ्यासपाटवात्
सर्वेभ्यश्च परं तत्त्वं शिवं पश्यन्ति योगिनः॥१॥

इयं माण्डूक्योपनिषदथर्ववेदान्तर्गता, अस्या एकस्या एवानुसन्धानेन उपनिषत्परमप्रयोजनस्य सिद्धिर्भवति। उक्तं च मुक्तिके— "माण्डूक्यमेकमेवालं मुमुक्षूणां विमुक्तये" इति। मुण्डके परमात्मप्राप्तिहेतुकं "प्रणवो धनुः शरो ह्यात्मा" इत्यादिमन्त्रे यत्तत्त्वमुपदिष्टं तस्यैव वैशद्यप्रदर्शनार्थमस्या आरम्भः, वाच्यवाचकसम्बन्धमभिलक्ष्य निखिलं तत्त्वमुपदिष्टम्। षट्त्रिंशत्तत्त्वरूपं यच्छिवशक्तिपरिणामभूतं तत्सर्वमस्यामुपनिषदि निर्दिष्टम्। एतद् विज्ञाय योगी अद्वैतनिष्ठो भवति। शिवतां चोपगच्छति। वाच्यवाचकतत्त्वज्ञानादेव तत्त्वरूपावगतिरिति प्रथमं परब्रह्मवाचकमोङ्कारस्वरूपमुपदिशन्नाह— ओमिति :—

ओमित्येकाक्षरमिदꣳ सर्वं तस्योपव्याख्यानं भूतं भवत् भविष्यदिति सर्वमोङ्कार एव यच्चान्यत् त्रिकलातीतं तदपि ओङ्कार एव॥१॥

ओमिति अवति साधकवृन्दमज्ञानादित्योम् अथवा एतद् भजतः साधकान् स्वीकरोति इत्येवं नामकमेकं प्रधानमक्षरं न क्षरतीति अनश्वरम् "ओमित्येकाक्षरं ब्रह्म" इति स्मृतेः। स्फोटवर्णात्मकः शब्दः प्रणवस्वरूप एवेति शाब्दिकाः। परब्रह्मपरमात्मनो वाचकः वाच्यवाचकयोरभेदः अत एव वाच्येन सार्धमभेदं कृत्वा उच्यते—"इदं

सर्वमिति" यथा "सर्वं खल्विदं ब्रह्म" तथा सर्वं शब्दब्रह्मैवेदमित्यभिप्रायः। तस्य प्रणवस्य उपव्याख्यानं विस्तरेण कथनं कर्तव्यमिति शेषः। भूतं भवद् भविष्यदिति सर्वमोङ्कार एव कालकृत एव सृष्टिव्यवहारः तमधिकृत्य सर्वात्मता ओङ्कारस्याह—भूतमित्यादि—भूतमतीतं भवत् प्रवर्तमानं भविष्यद् आगामि यद् भविष्यति तत्सर्वमोङ्कार एव। कार्यस्य कारणादव्यतिरेकात् कालतत्त्वादपि ऊर्ध्वं-यन्मनसा वाचा निर्वक्तुमशक्यं ब्रह्मतत्त्वं तदपि ओङ्कार एव अतएव यच्चेत्युक्तं यच्चकार्यमतीतं, अन्यत् त्रिकालातीतं तदपि ओङ्कार वाच्यमेव ॥१॥

वाचकस्वरूपमभिधाय वाच्यतत्वमाह--सर्वमिति :--

सर्वं ह्येतद् ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पाद् ॥२॥

एतन्नामरूपविभागेन भिन्नं सर्वं जगद् ब्रह्म तदुत्पन्नत्वाद् ब्रह्मण उपादानत्वाच्च अयमात्मा ब्रह्म अन्तःकरणवृत्तिसाक्षी प्रत्यक्त्वेन प्रसिद्धः आत्मा चेतनो ब्रह्मैव "तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुतेः। स तत् पदबोध्य आत्मा तथायमात्मा जीवसाक्षित्वेन प्रसिद्धश्चतुष्पाद् उभयोश्चतुष्पादत्वेन तुल्यत्वम्। ननु आत्मन एकत्वात्कथमुभयोरित्युच्यते ? सत्यम्, भेदस्य व्यावहारिकत्वादभेदस्य च पारमार्थिकत्वाददोषः, सुवर्णकटककुण्डलादिव्यवहारवत्तस्मान्नास्ति चोद्यावकाश इति ॥२॥

प्रथमपादमाह—जागरितेति :—

जागरितस्थानो बहिः प्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग् वैश्वानरः प्रथमः पादः ॥३॥

जागरितं स्थानं यस्यासौ जागरितस्थानः स बहिःप्रज्ञः, बहिः शब्दादिविषयेषु प्रज्ञा प्रवणाबुद्धिर्यस्य स आत्मानमविषयीकृत्य अविद्यया केवलं बहिः पदार्थेष्वेव रतिं कुर्वन्नास्त इत्यर्थः। सप्ताङ्गो माया-विद्या-कला-नियति-राग-काल-जीवाः सप्ताङ्गानि व्यष्टिसमष्टिरूपाणि अङ्गानि यस्य सः, एकोनविंशतिमुखः—ज्ञानेन्द्रियपञ्चकं, कर्मेन्द्रियपञ्चकं, तन्मात्रपञ्चकमहंकारतत्त्वं महत्तत्त्वं मनस्तत्त्वं प्रकृतितत्त्वमित्येकोनविंशतिमुखत्वेन कथ्यते एभिरात्मा शब्दादीन् विषयानुपलभते। स्थूलभुक्—स्थूलानि पञ्चमहाभूतानि भुङ्क्ते इति स्थूलभुक्, शब्दादीनां

भूतानां च एकत्वमभिप्रेत्योक्तं पञ्चेति, वैश्वानरः विश्वेनरा यस्य स "नरे च संज्ञायाम्" इति दीर्घः विश्वानर एव वैश्वानरः स्वार्थिकोऽण्- सर्वेषां स्थूलव्यवहर्तॄणां नराणामधिष्ठाता विराडित्यर्थः। स्थूल-देहानां विश्वेषामधिष्ठाता जीवो वैश्वानर इति व्यष्टिपक्षीयोऽर्थः। जीवदृष्टया समष्टिरूपस्याङ्गत्वं समष्टिदृष्टया व्यष्टेरङ्गत्वमिति विवेकः एष आत्मनः प्रथमः पादः स्वरूप इत्यर्थः ॥३॥

द्वितीयंपादमाह—स्वप्नस्थान इति :—

स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्गः एकोनविंशतिमुखः प्रविविक्त-भुक् तैजसो द्वितीयः पादः ॥४॥

स्वप्नस्थानः जागरितसंस्कारजन्यं स्थानं यस्यासौ, अन्तःप्रज्ञोऽन्त-र्हृदि प्रज्ञा बुद्धिर्यस्यासौ, सप्ताङ्ग एकोनविंशतिमुख इति व्याख्यातं, प्रविविक्तभुक् प्रविविक्तं सूक्ष्मं केवलं वासनामयं भुङक्त इत्यर्थः, स तैजसः प्रकाशमयः द्वितीयः पादः स्वरूपः ॥४॥

तृतीयपादं यत्रेत्याह :—

यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति तत्-सुषुप्तम्। सुषुप्तस्थान एकीभूतः प्रज्ञानघनएवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः ॥५॥

यत्र यस्यामवस्थायां सुप्तो न कंचन कामं काम्यं विषयं कामयते इच्छति न कंचन जागरितवासनाजन्यं स्वप्नं पश्यति तत्सुषुप्तमित्यु-च्यते। सुषुप्तिस्थाने एकीभूत एकत्वमापन्नः प्रज्ञानघनः सर्वेषां जाग्रत्स्वप्नज्ञानानां कारणरूपेण घन एक पिण्डीभावो यस्मिन् स प्रज्ञानघन एव आनन्दमयः केवलमानंदमेव भुङक्ते चेतो मुखः चिद्रूपः प्राज्ञः समष्टिरूपेण प्रकृष्टज्ञानवानित्यर्थः तृतीयपादः ॥५॥

समष्टिव्यष्टिरूपेणात्मनः पादत्रयं सामान्येन प्रदर्श्य साम्प्रतं सर्व-कारणं सर्वेश्वरं नित्यषड्विधैश्वर्ययुक्तं पादत्रयात्मकं विशेषतः वर्णय-न्नाह—एष इति :—

एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्यामी एष योनिः सर्वस्य प्रभवा-प्ययौ हि भूतानाम् ॥६॥

एष समष्टि–प्राज्ञः सर्वेश्वरः सर्वेषां स्थूलसूक्ष्मकार्यभूतानां पदार्थानामीश्वरः स्वामी ईशनशीलः एष सर्वज्ञः सर्वं ज्ञातृ-ज्ञेय-ज्ञान-स्वरूपं जानाति वेत्ति इति, समष्टिज्ञानशक्त्यधिष्ठितत्वात् एष सर्वस्य कार्यजातस्य योनिः कारणम्, "जन्माद्यस्य यतः" इति न्यायात्, हि निश्चयेन भूतानामुक्तपदार्थानां प्रभवाप्ययौ उत्पत्तिविनाशकृदिति "यतो वा इमानि भूतानि जायन्त" इत्यादि। "सर्वसामर्थ्ययुक्ताद् ब्रह्मण एव भूतानामुत्पत्तिस्थितिप्रलया भवन्ति। "जनिकर्तुः प्रकृति" रितिस्मरणात्। "आनन्दमयोभ्यासात्" इत्यत्र इदमेव कारणत्वेन गृहीतम्। वस्तुतः शक्तितत्त्वमेव कारणं शिवतत्त्वं कार्यकारणभाव-रहितमेव। ये शक्तिरूपादानकारणं शिवस्तु कर्ता एव उत्पत्तिस्थिति-संहारपदेनोपलक्षणेन च पञ्चकृत्यमपि कथयन्ति तेषामपि मतमौप-निषदमेव। उक्तं च—"नारायणं शिवं शान्तं सर्ववेदान्तगोचरम्। सृष्टिस्थितिश्च संहारतिरोधानानुसम्मतम्। पञ्चकृत्यस्य कर्तारं नारायणमनामयम्।। (नारायणपूर्वतापिनी)। "उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्त" मितिश्रुतेः। "सर्वोप्युभयसंयुक्तः प्रकृत्या पुरुषेण च, "प्रकृतिर्ह्यस्योपादानमाधारःपुरुषः परः" (भा० ११ स्क० १६-१९)। ये च कथयन्ति शाक्ताभिमतं ब्रह्मोपादानं शक्ति-निमित्तकारणमिति तेषां मूलं मृग्यम्।।६।।

पादत्रयेण शिवाभिन्नशक्तितत्त्वस्य महिमानं प्रदर्श्य इदानीं चतुर्थ-पादस्वरूपं केवलं शिवतत्त्वं प्रदर्शयन्नाह—नान्तःप्रज्ञमित्यादि। यद्यपि शक्तितत्त्वाद्व्यतिरिक्तः शिवः कदापि भवितुं नार्हति तथापि बुद्ध्यैव केवलं भेदं कृत्वा स्वरूपमात्रविवक्षया आह :—

नान्तः प्रज्ञं न बहिः प्रज्ञं नोभयतः प्रज्ञं न प्रज्ञानघनं न प्रज्ञं ना-प्रज्ञम्। अदृष्टमव्यवहार्यमग्राह्यमलक्षणमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा विज्ञेयः ।।७।।

तच्छिवतत्त्वं नान्तःप्रज्ञमन्तःप्रज्ञा जागरितवासनाजन्यस्वप्न-विषयाणि तद्रहितं न बहिःप्रज्ञं स्थूलविषयकप्रवृत्तिरहितं नोभयतः प्रज्ञमुभयसन्धिज्ञानरहितं तथा न प्रज्ञानघनं सुषुप्तिविलक्षणं न प्रज्ञं न अप्रज्ञमपि चराचरविलक्षणत्वात्,अदृष्टं दृष्टविलक्षणमिन्द्रियाग्राह्यत्वात्

अव्यवहार्यं नामरूपात्मकस्य जगतो तिरोभूतत्वाद् व्यवहारानर्हम्, अग्राह्यं निरवयवत्वात् सावयवं हि ग्राह्यत्वेन व्याप्तम्। लक्ष्यत्वावच्छिन्नं मिथ्यात्वेनाविनाभूतमतएवालक्षणम्, लक्षणप्रवृत्तिरहितं स्वप्रभत्वात्, लक्षणेन प्रकाशयितुमयोग्यमित्यर्थः। अचिन्त्यं मनसा मन्तुमशक्यमव्यपदेश्यं हेतुवादेन निर्देष्टुमशक्यमनुमानप्रवृत्तेर्बहिर्भूतत्वात्। व्याप्तिनिष्ठ (करणता) निरूपितसाध्यत्वावच्छेदकावच्छिन्नंहि हेतुत्वावच्छेदकावच्छिन्नेन साधितं भवति तच्च मिथ्याविषयत्वमेव भेदविषयत्वात्तस्येत्यभिप्रायः। एकात्मप्रत्ययसारं एकआत्मा एव प्रत्ययः सारो मुख्योऽस्मिन् तत् केवलं स्वेनैवानुभवितुं शक्य इति भावः। यतः प्रपञ्चोपशमं प्रपञ्चस्य जगत उपशमो यत्र तत् प्रपञ्चोपशमं शिवरूपेण तिरोधानं कार्यकारणबुद्ध्योर्निवर्तनात् अतएव शान्तं क्रियाभाववत्वेन शान्तजलाशयतरङ्गवत् इति भावः। शिवं कल्याणस्वरूपं सच्चिदानन्दस्वरूपमद्वैतं द्वैतरहितं निवृत्तप्रपञ्चाधिष्ठानमित्यर्थः। चतुर्थं विश्वतैजसप्राज्ञापेक्षया चतुर्थमात्मत्वेन तु एकमेव मन्यन्ते तत्त्वविदः, स आत्मा विज्ञेयो मुमुक्षुभिः इत्यर्थः। अथातो ब्रह्मजिज्ञासेति न्यायात्। अद्वैतस्य मुख्यत्वात् प्रपञ्चस्य शक्तिविलसितत्वाच्चसामरस्येनशिवशक्त्योरभेदावस्थायां स्थितायां प्रपञ्चाप्रतीतेर्मृदि घटो यथा। शक्तितत्त्वमपि शिवस्यात्मभूतत्वेन सम्मतम्। "ननु अद्वैते सिद्धान्ते प्रपञ्चमिथ्यात्वं श्री भगवत्पादैः प्रतिपादितं तत्कथमेवंस्यादितिचेन्न—तच्च मायातत्त्वपरम्, इतिमन्तव्यम्। तथा च "मायामात्रमिदं सर्वमद्वैतं परमार्थतः" "नेह नानास्तिकिञ्चन" मायाकल्पितस्य जगतोऽधिष्ठानं ब्रह्मतत्त्वं रजतप्रतीतिजनकशुक्तिवत्। वस्तुतस्तु ब्रह्मपरिणामभूतत्वं जगतस्तेन जगत्सत्यत्वं मृद्घटवत् स्वीकारेण अद्वैतश्रुतीनामविरोधः द्वैतनिर्वाहश्च। एतावन्मात्रेण व्यवस्थोपपत्तेः सर्वस्य जगतो मिथ्यात्वकल्पनं निरर्थकमेव भेदमात्रस्य मिथ्यात्वात्। एतेन विशिष्टाद्वैताजातवादादय आपेक्षिका एव मन्तव्याः। केवलमद्वैतदृढीकरणार्थं युक्तिवादमाश्रित्यैव तेषां प्रवृत्तिः। अजातवादस्य कारणे मतिदार्ढ्यार्थमेव प्रवृत्तिः। श्री भास्कररायाचार्येण द्वैताद्वैतमेवं व्यवस्थापितम्—शास्त्रस्य सत्यावेदकत्वरूपप्रामाण्यनिर्वाहाय

सर्वेषां वेदान्तानामद्वैते पारमार्थिके परब्रह्मणि साक्षात्परम्परया वा तात्पर्यस्य वक्तव्यत्वाद् भेदप्रतिपादकशास्त्रस्य पञ्चषाङ्गुलग्रासावेदकोपरागशास्त्रस्येव व्यावहारिकदृष्ट्यैव प्रवृत्तिरिति न भेदाभेदयोः समकक्षतेतिभावः ।।७।। (ललिता सहस्रनाम भा० १८६) ।

संक्षिप्तं विवरणम्

"एकमेवाद्वितीयम्" इति श्रुत्युक्तरीत्या उक्तैः प्रकारैरद्वैतोपदेशः प्रदर्शितः । परमतत्त्वमवाङ्मनसयोरविषयत्वेन सर्वत्रवेदान्तेषु निश्चितम् । तच्च "अयमात्मा ब्रह्म, "तत्त्वमसि, "अहं ब्रह्मास्मि" इत्यादि वाक्यैर्ज्ञायते । तस्मादेव पराशक्त्या कारणतत्त्वमभिव्यज्यते अन्तर्यामितत्त्वं च तदेव प्रकाशविमर्शात्मकं कारणं जगत इति सिद्धान्तः आगमविदाम् । शक्तिसाहचर्येणैव जगद् रचनायाः सम्भवात् । उक्तं च—"जगत्कारणमापन्नः शिवो यो मुनिसत्तमाः । तस्यापि साभवच्छक्तिस्तया हीनो निरर्थकः ।" "शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितु" मित्यादि । तुरीये शिवेऽपि स्वरूपभूतेयं महाभागा वर्तते । तथा चाहुर्भगवत्पादाचार्याः—"तुरीया कापि त्वं दुरधिगमनिःसीममहिमा" (सौन्दर्यलहरी) । "परास्यशक्तिर्विविधैव श्रूयते, "एकोऽवर्णो बहुधा शक्तियोगात्" इति श्रुतेश्च । शिवशक्तिस्वरूपकमेव महाविन्दुस्तस्मान्नादः सम्भवति तद् शब्दब्रह्मेति कथ्यते । उक्तं च—"विन्दोस्तस्माद् भिद्यमानाद् रवोऽव्यक्तात्मकोऽभवत् । स एव श्रुतिमापन्नः शब्दब्रह्मेति कथ्यते ।" परापश्यन्ती-मध्यमा-वैखरीति चतस्रः संज्ञास्तस्यैव अवस्थाभेदेन भवन्ति । "चत्वारि वाक् परिमिता पदानि" इति श्रुतेः । सर्वा वाच ओंकार एवान्विताः सन्ति सर्वासां कारणत्वात् । "ओंकार एव सर्वा वाक् स्पर्शोष्मभिर्व्यज्यमाना नानारूपा भवति" इति श्रुतेः । ओंकार एव स्वभेदैश्चतुर्भिर्विराड् हिरण्यगर्भेश्वरशिवतत्त्वाख्यं वाच्यंवाचकरूपेण विषयीकरोति । तदवच्छिन्नश्चेतनः सदाख्यतत्त्वं मन्त्रेश्वरो वा कथ्यते तदधीनाः मन्त्राः सिद्धाः साधकाश्च, ओमित्येकाक्षरमित्यनेनात्र दर्शितम् । ईश्वरतत्त्वं समष्टिप्राज्ञः "एष सर्वज्ञ" इत्यादिनोपदिष्टम् । अयमात्माब्रह्मेति महावाक्यं सर्वशास्त्रसमन्वयात्मकं

विद्यातत्त्वाभिमानि शुद्धतत्त्ववाच्यानि पञ्चतत्त्वानि, परब्रह्मणः स्वरूपभूतान्येव। चतुर्विधतत्त्वस्वरूपमुक्तम्। "मायान्तमात्मतत्त्वं विद्यातत्त्वं सदाशिवान्तं स्यात्। शक्तिशिवौ शिवतत्त्वं तुरीयतत्त्वं समष्टिरेतेषाम्।" एतदनन्तरं मायातत्त्वेन तादात्म्यीकृत्य जीवतत्त्वं हिरण्यगर्भविरान्नामकं समष्टिरूपेणाविर्भवति। विद्यातत्त्वमेवान्योन्याभावरूपभेदबुद्धिप्राधान्यं सूक्ष्मतत्त्वेषु मायातत्त्वमुच्यते अनेनैव द्वैतं भवति। अपूर्णत्वाल्पत्वदुःखित्वादिमन्यमानं जीवतत्त्वमुच्यते। प्राज्ञःतैजसादिः तस्यैव अवस्थाभेदाः। कलाविद्या (किंचिज्ज्ञत्वरूपम्) रागः, कालो, नियतिः सप्तैतानि शुद्धाशुद्धरूपाणि तत्त्वानि। किंचित्कर्तृत्वरूपं कलातत्त्वं, रागो विषयेषु प्रीतिः, सृष्टिव्यवहारं व्यञ्जयन्ती कालाख्या शिवस्य शक्तिः, यत् त्रिकालातीतमित्यादिना सूचितम्। पञ्चानां कञ्चुकानामुपलक्षणंचैतत्। अवशमात्मानं कृत्याकृत्येषुनियोक्त्री शक्तिः नियतिः। अपूर्णा किंचिज्ज्ञत्वरूपाशक्तिर्विद्यातत्त्वम्। "सप्ताङ्ग" इति पदेनात्र सूचितम्। एतत्सर्वं जीवतत्त्वेऽन्तर्गतं बोद्धव्यम्। चतुर्विंशति संख्याकानि प्रकृतिमारभ्य पृथिवीपर्यन्तानि जातानि तत्त्वानि सांख्यप्रसिद्धानि "एकोनविंशतिमुखः" इत्यनेनोपवर्णितानि। "मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः" (सां० का० ३)। इमानि अशुद्धतत्त्वानि कथ्यन्ते। नारदपरिव्राजकोपनिषदि "षट्त्रिंशतत्तत्त्वातीतः" इत्युक्त्वा ततः पश्चात् माण्डूक्यमन्त्राः कथितास्तेन ज्ञायते तत्त्वानामस्यामुपनिषदि समावेशो भवति। "ब्रह्माण्डादिशिवान्तायाः षट्त्रिंशत्तत्त्वसंहृतेः। भगश्च व्याप्यवृत्तित्वमैश्वर्यं महिमाह्वयम्। (परमात्मिकोपनिषद् १००)। शिवशक्त्योः परिणामभूतानि सर्वाणि ; त्रिगुणमधिकृत्य ब्रह्मविष्णुरुद्रेति संज्ञाभिः स एव भगवान् शिवो व्यवहरति इति समुदितार्थः। सर्वं ह्येतद् ब्रह्मेति उक्तत्वात्। मायया अल्पीभावमाप्तं जीवतत्त्वं शुद्धविद्यां लब्ध्वा शिवत्वं लभते। "ज्ञात्वा देवं मुच्यते सर्वपाशै" रिति श्रुतेः, आगमेषु लज्जाघृणादिकं पाशाष्टकं प्रसिद्धमस्ति। श्रीगौडपादैः अजातवादः समर्थितः स तु यौक्तिक एव। वेदेषु जगत्सत्यत्वमपि

श्रूयते "विश्वं सत्यं मघवाना युवोरिदापश्च न प्रमिनन्ति वाम्" (ऋ० सं० २-६-३-२)। "तुच्छेनाभ्वपिहितं यदासीत्" (ऋ० सं० ८-७-१७-३)। इत्यस्मिन् मन्त्रे मिथ्यार्थं परित्यज्य सूक्ष्मार्थस्य विवक्षणात्। सत्यस्य सत्यमिति श्रुतेस्तु व्यावहारिकपारमार्थिकयोर्भेदनिरूपणे संगतिः। मिथ्यात्वं तु केवलं जगदन्तर्गतभेदमात्रे मायाकल्पिते चरितार्थमुक्तप्रकारेण इति संक्षेपः ॥

शिवतत्त्वमुपदिश्य तत्स्वरूपाधिगमाय साधनश्रेष्ठं प्रणवं वक्तुं प्रक्रमते :—

सोऽयमात्माध्यक्षरमोङ्कारोऽधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकारो मकार इति ॥८॥

सोऽयमात्मा अध्यक्षरम् अक्षरमोङ्कारमधिकृत्य कथ्यमानोऽध्यक्षरम् ओङ्कारो मात्रामधिकृत्य वर्तमान इत्यधिमात्रम्। आत्मनो ये पादास्ते ओंकारमात्रा अनुवर्तन्ते। ता मात्रा अकार उकार मकार इति ॥८॥

विशेषेण कथयति—जागरितेति :—

जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्राप्तेरादिमत्वाद्वाप्नोति ह वै सर्वान् कामान् आदिश्च भवति य एवं वेद ॥९॥

जागरितस्थानो वैश्वानरः समष्टिव्यष्टिरूपोऽकाराख्यामोङ्कारस्य प्रथमां मात्रामनुगतश्चिन्तनीयः। आप्तेर्व्याप्तेरकारस्य "अकारो वै सर्वा वाक्" इति श्रुतेः आदिमत्वाद्वा सर्वेषां वर्णानां प्रथमत्वाद्वा एवं चिन्तकः साधकः सर्वान् कामान् मनोवाञ्छितान् काम्यमानान् पदार्थान् ह वै निश्चयेन आप्नोति। तथा सर्वेषां साधकानां मध्ये आदिः प्रथमो भवति, य एवं वेद जानाति इत्यर्थः "प्रयत्नः साधकः" इति प्रमाणात् ॥९॥

विश्वेन सार्धमकारस्यैक्यचिन्तनफलं प्रदर्श्य तैजसेन सार्धमुकार मात्राया ध्यानरीतिं फलं चाह—स्वप्नस्थानेति :—

स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रा उत्कर्षादुभयत्वाद् वा उत्कर्षति ह वै ज्ञानसन्ततिं समानश्च भवति नास्याब्रह्मवित्कुले भवति य एवं वेद ॥१०॥

स्वप्नस्थानस्तैजस ओंकारस्य उकाराख्यमात्रया चिन्त्यते। उत्कर्षाद् अकाराद् उत्कृष्टा हि उकारमात्रा उभयत्वाद् वा—अकार-मकारयोर्मध्यस्थत्वाद्, विश्वप्राज्ञयोर्मध्ये तैजसः सूक्ष्मत्वात्। विश्वा-दुत्कृष्टस्तैजसो य एवं वेद। स ह वै निश्चयेन ज्ञानसन्ततिं विज्ञान-परम्परामुत्कर्षति वर्धयति समानश्च मित्रारिपक्षयोः भवति। अस्य कुले वंशे अब्रह्मवित् ब्रह्मज्ञानरहितो अन्योऽपि कश्चिन्न भवतीत्यर्थः ।।१०।।

मकारमात्रया प्राज्ञस्यैक्यचिन्तनप्रकारमाह—सुषुप्तस्थानेति :—

सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रामितेमितेरपीतेर्वा मिनोति ह वै इदं सर्वमपीतिश्च भवति य एवं वेद ।।११।।

सुषुप्तस्थानः प्राज्ञः समष्टिव्यक्तिरूपः मकारो मकाराख्यो वेदितव्यः। तृतीया मात्रा ओंकारस्येयं चिन्तयितव्या। तया सममेकी-कृत्य मितेर्मितिर्मानं परिमाणमित्यर्थः। मीयतेऽनया मात्रया विश्व-स्तैजसश्च तयोराविर्भावतिरोभावौ हि प्राज्ञादेवेति भानकार्यनिर्देशः। अपीतेर्वा अपितिर्लय एकीभाव इति यावत् विश्वतैजसौ हि लयं गच्छतः सुषुप्तौ य एवं वेद जानाति। सह वै निश्चयेन इदं सर्वं जगन्मिनोति जानाति। तथा अपीतिश्च भवति। सर्वस्य आत्मा कारणरूपो निखिलजनप्रियो वा भवतीत्यर्थः। अत्र श्लोको भवति—"अकारो नयते विश्वमुकारश्चापि तैजसम्। मकारश्च पुनः प्राज्ञं नामात्रे विद्यते गतिः" ।।११।।

एवं पादत्रयस्य मात्रात्रयेण चिन्तनं विधाय चतुर्थपादममात्ररूपं लक्ष्यात्मकमोंकारस्यामात्रया प्रदर्शयत्यमात्रेति :—

अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत एवमोङ्कार आत्मैव संविशत्यात्मनात्मानं य एवं वेद य एवं वेद ।।१२।।

चतुर्थः पादत्रयापेक्षो न तु वस्तुतो, यतो हि कार्यकारणविलक्षणः स संख्यारहितः, अव्यवहार्यः केनापि हेतुना व्यवहर्तुमयोग्यः, प्रपञ्चोप-शमः प्रपञ्चस्य क्रियात्मकव्यवहारस्य जगत उपशमो लयस्तिरोभावो निवृत्तिर्वा यत्रासौ, शिवो ब्रह्मतत्त्वं सामरस्याभिधेयोऽद्वैत एवोंकार आत्मैव ब्रह्मस्वरूप एव, वाच्यवाचकयोरभेदात्। य एवमोंकारतत्त्वं वेद जानाति। स आत्मनास्वरूपेणात्मानं विशति ब्रह्मरूपो भवति

जीवब्रह्मणोरैक्यमनुभवति इत्यर्थः। साधनप्रयोजनं सम्यक् तस्यैव भवतीत्यभिप्रायः। एवं ब्रह्मविद्यायास्तत्त्वं संक्षिप्ताक्षरैः सम्पूर्णमुपदिश्य श्रुतिरभ्यासेनादरातिशयेन वा समाप्तिं च सूचयति य एवं वेद य एवं वेदेति ॥१२॥

इति अथर्ववेदान्तर्गतमाण्डूक्योपनिषदः प्रकाशभाष्यम् सम्पूर्णम् ॥

अत्रैते श्लोकाश्च संगच्छन्ते :—

विश्वं पादं सुचिन्त्यं विमलमतिवरैः स्थूलकार्ये निमग्नम् ।
ओंकारस्यादिमात्रामनुगतमखिलामाद्यरूपं विभक्तम् ॥
ध्यात्वा प्राथम्यमाप्तिं निखिलमिह सुखं प्राप्यमोदं गतास्ते ।
भावैस्तत्त्वज्ञश्रेष्ठैः सकलशुभगुणैराद्यभावं लभन्ते ॥१॥

सूक्ष्मं स्वप्नेस्वरूपं द्वितयमनुगतं पादश्रेष्ठं मुनीन्द्रा-
जाग्रद्भावात् प्रकृष्टं मननरतियुतास्तैजसं यान्ति रूपम् ।
तेषां वंशे कदाचिन्नहिभवति जनो ब्रह्मतत्वाद् विरक्तः ।
साम्यं सर्वत्र लब्ध्वा परमपदगता भान्तिवन्द्याः सुरेन्द्रैः ॥२॥

सौषुप्तं स्थानमुक्तं मितिरिति च त्रयं प्राज्ञसंज्ञोऽत्र देवः ।
स्वानन्दं सर्वसंस्थो विलयमुपगतो भुञ्जयन् कारणात्मा ।
मात्रां तार्तीयरूपां विततसुविमलां मान्तरूपां प्रसिद्धाम् ।
एतां संचिन्त्य नित्यं मुनिवरमुकुटो नैव गच्छेद् भवाब्धिम् ॥३॥

शैवं तत्त्वं चतुर्थं निखिलभुवनगं स्वात्मना भेदशून्यम्
द्वैताद् दृष्टादिरूपाद् व्यवहृतिरहितान्मात्रयाऽचिन्त्यरूपम् ।
शान्तं प्राज्ञादिभावैरवहितमनसा लक्ष्यरूपेण बोद्धुम् ।
शक्यं शम्भोःपदाख्यं स्तुतममरगणैः प्राप्य तं नौमि नित्यम् ॥४॥

आद्यं तत्त्वं शिवाख्यं श्रुतिमुनिवचसां नैव दृष्टं पराख्यं,
शक्तिस्तस्यात्मभूता चितिरितिविमला स्व स्वरूप प्रतिष्ठा ।
तत्त्वं तद्योगसिद्धं सदिति शुभमतिश्चेश्वरं मन्यते हि ।
विद्यां शुद्धां प्रसिद्धामनुभवविततं पञ्चकं शुद्धतत्त्वम् ॥५॥

माया विद्या कलाख्या नियतिरतियुता कालजीवौ प्रसिद्धौ,
सप्तैषा शुद्धशुद्धा मुनिजनविदिता तत्त्वरूपा समाख्या ।
सांख्यानां शेषसिद्धा स्वमतसुनिहिता विंशतिस्तुर्ययुक्ता ।
माण्डूक्ये भाष्यरत्ने श्रुतिगतिनिपुणैर्बुध्यते सर्वमेतत् ॥६॥

सम्पूर्णम्

शुद्धि पत्रम्

पृष्ठाङ्क	पंक्तयः	अशुद्धम्	शुद्धम्
प्रा० १	१	महाषिणामनि	महर्षीणामति
„ १	७	प्रदीपस्तम्भवादा	प्रदीपस्तम्भवदा
„ १	१५	अगम:	आगम:
„ १	२२	पाञ्चब्राह्म	पञ्चब्राह्म
„ २	१	षार्ट्त्रिशादिकं	षार्ट्त्रिशाद्विकं
„ २	२०	ईश-केन-कठ-	ईश-केन-कठ-मुण्डक
„ २	२८	नाशक्यता	नाशक्यत
„ ३	४	प्रिण्डिर्स	प्रिण्टर्स
भूमिका (क)	२६	वदान्तार्थ	वैदान्तार्थ
२	१	मतर्थानां	मतदर्थानां
२	१३	इश्वरस्य	ईश्वरस्य
२	२६	महन्व	महत्त्व
५	१	कर्मानुष्ठातृन्	कर्मानुष्ठातृन्
५	२१	साक्षात्कणात्	साक्षात्करणात्
६	१६	अपसध्यानि	अपसाध्यानि
६	२८	सम्पन्नानानां	सम्पन्नानां
७	४	शिवशक्तिसारस्य	शिवशक्तिसामरस्य
७	१६	प्रणश्यमि	प्रणश्यामि
८	३	अद्वैतबह्म	अद्वैतब्रह्म
८	२६	तथाभासित्वमच्युते	तथाभासितत्वमच्युत
९	१२	प्रव्रजिनो	प्रव्राजिनो
९	२५	कर्मयेगेन	कर्मयोगेन
११	१७	आत्माहन्तृत्वात्	आत्महन्तृत्वात्
११	२८	ब्रह्मविद्या	ब्रह्मविद्या
१३	१६	अन्धेतम:	अन्धन्तम:
१३	२२	पङ्वन्धवदु	पङ्गवन्धवदु
१३	२७	प्रदर्शितंम्	प्रदर्शितम्
१५	११	भ्रान्तिर्विवद्यापरं	भ्रान्तिर्विद्यापरं
१५	२३	समुच्चितुवन्त:	समुच्चिन्वन्त:-

पृष्ठाङ्क	पंक्तयः	अशुद्धम्	शुद्धम्
२१	३	इष्ट	ईष्ट
२३	७	सिद्धिर्लभते	सिद्धीर्लभते
२३	२५	सूर्यचन्द्रमसौ	सूर्याचन्द्रमसौ
२३	२६	दध्यङ्ङ्थर्वण	दध्यङ्ङ्थर्वण
२४	१०	नवनादमया	नवनादमयी
२५	२६	लोकभीयु:	लोकमीयु:
२६	१८	संशय:	जायते
३३	१३	नग्न	नग्ना
४३	२२	चक्षुष्ंषि	चक्षूंषि
४५	२१	कर्तृणां	कर्तृणां
४६	२	शक्तिवेन	शक्तितत्त्वेन
४६	२०	बिवृत्य	निवृत्य
४६	२७	कटककुण्डादिरूपेण	कटककुण्डलादिरूपेण
४८	१३	एवमनिा	एवमग्निना
५१	१८	ह्येनन्	ह्येतन्
५६	२०	श्रवस्याचरणे	श्रवमस्याचरणे
५७	१	भवविष्यति	भविष्यति
५८	१२	पाद्याद्यार्थं	पाद्याद्यर्थं
५८	१६	सम्प्रातं	सम्प्राप्तं
६०	२७	उक्तवान्	उक्तवान्
६१	४	संधि	सन्धिं
६३	१	सुविज्ञेयणुरेष	सुविज्ञेयमणुरेष
६४	२०	परिचायस्व	परिचारयस्व
६६	१८	बल	बत
७०	५	नचिकेतोऽत्तोऽत्यस्राक्षी:	नचिकेतोऽत्यस्राक्षी:
७१	१६	ब्रह्मोपलब्धय	ब्रह्मोपलब्धये
७३	५	निहिजो	निहितो
७५	२६	तीतीर्षतां	तितीर्षतां
७७	२६	सारथिर्यस्य	'सारथिर्यस्तु' इतिपाठः
८४	२२	मयिकत्वात्	मायिकत्वात्
८५	५	समयि-ब्रह्म-ब्रह्मवादिनाम्	समयि-ब्रह्म-वादिनां
८७	८	मारकंडेयपुराणात्	मार्कण्डेयपुराणात्

पृष्ठाङ्क	पंक्तयः	अशुद्धम्	शुद्धम्
९०	६	मन्यते	मन्यन्ते
९८	४	अथर्वाङ्गीरे	अथर्वाङ्गिरे
१००	२७	तथात्वत्	तथात्वात्
१०६	५	ल्यबभावच्छान्दसः	ल्यबभावश्छान्दसः
१०७	२५	माश्रित्वयैं	माश्रित्यैव
११३	२५	वाङ्मनः	वाङ्मनः
११४	८	भागवतेन	भावगतेन
११४	२५	प्रतिपादिकं	प्रातिपदिकं
११४	७	ह्यपासानिशितं	ह्यु पासानिशितं
११५	६	वाचोऽपर	वाचोऽपरा
११६	२०	निषेद्धं	निषेद्धुं
१२१	२७	नलभ्यः	लभ्यः
१२२	२४	सदाचारणेनैव	सदाचरणेनैव
१२४	११	विशुद्धतत्वः	विशुद्धसत्त्वः
१२५	६	सकामभिर्जीयते	सकामभिर्जायते
१२५	७	प्रविलीयन्त	प्रविलीयन्ति
१२६	१२	बह्मधाम	ब्रह्मधाम
१२७	१७	देवातासु	देवतासु
१२९	६	नैतद चीर्णव्रतो	नैतदचीर्णव्रतो
१३१	२४	पयाशम्भुः	यया स शम्भुः
१३३	२०	त्रिकलातीतं	त्रिकालातीतं
१३४	४	सर्वात्मता	सर्वात्मताम्
१३७	६	व्याप्तिनिष्ठ (करणता)	व्याप्तिनिष्ठकरणता
१३८	७	परमतत्त्वभवाङ	परमतत्त्वंवाङ्
१३९	१	विद्यातत्वाभिमानि	विद्यातत्त्वमिमानि
१३९	५	विरान्नामकं	विराण्नामकं

श्री पीताम्बरा पीठ

ह्लीं

दतिया (म.प्र.)